प्रकाशितग्रन्थसंख्या— १३९.

❀ श्रीश्रीगौरहरिर्जयति ❀

श्रीमद्रूपगोस्वामिप्रभुविरचित—

❀ दानकेलिकौमुदी ❀

श्रीलविश्वनाथचक्रवर्त्ती-विरचित—
"महती" टीकया समलंकृता
तथा
कुसुमसरोवर्द्धनिवासिना कृष्णदासेन कृतया
हिन्दीभाषया सुपरिष्कृता

सम्बत्—२०२४.
न्योंछावर—रु० १. २५ पैसे

प्रकाशक—
कृष्णदासबाबा

मुद्रकः—गौरहरिप्रेस, कुसुमसरोवर, (ग्वालियरमन्दिर)
राधाकुण्ड [मथुरा]

❁ दो शब्द ❁

नाटकीय उपरूपक भेद के अन्तर्गत "भाणिका" नामक यह एकांक नाटक है जिस का नाम दानकेलिकौमुदी है। इस में आलोच्य विषय यह है कि—श्रीवसुदेवजी अपने पुत्र वलदेव एवं मित्र-पुत्र श्रीकृष्ण की शान्तिकामना से गर्गजामाता भागुरिजी को प्रतिनिधि रूप में नियुक्त कर गोपन से गोविन्दकुण्ड के तट पर एक यज्ञ का अनुष्ठान करते हैं। मुनियों ने यह वतलाया था कि जो कोई उस यज्ञ में हैयङ्गवीनादि वेचने को उपस्थित करेगा वह शीघ्र ही मनोवाञ्छित कामना प्राप्त होगा। अतएव श्रीराधा सखियों के साथ गुरुजनों का आदेश प्राप्त कर हैयङ्गवीनादि वेचने के लिये यात्रा करती हैं तथा दानघाटी के पास पहुँच जाती हैं।

यथा—

शोणे मण्डितमूर्द्धिन कुण्डलतया क्लृप्ते दुकूलोत्तमे
न्यस्तां स्वर्णघटीं वहन्त्यचटुलां हैयङ्गवीनोज्ज्वलाम्।
दूरे पश्य तथाविधाभिरभितः स्मेरा सखीभिर्वृता
राधा मानसजान्हवीतटभुवं स्वैरं परिक्रामति ॥२७॥

अर्थात्—"वृन्दा सुबल से कह रही है-हे सुबल ! दूर से देखो, रक्तवर्णवस्त्र से आच्छादित मस्तक पर कुण्डलाकार बेड़ा है, उस पर हैयङ्गवीन से पूर्ण अचलायमान सुवर्णघट को धारण कर श्रीराधिका सखीगण से परिवृता हो कर मानसगंगा तट पर स्वेच्छापूर्वक भ्रमण कर रही है।" यह तो कृष्णसुख तात्पर्यमात्र है।

ग्रागे वृन्दा का वचन यथा—

हैयङ्गवीन - मृदुला त्वमत: कथम्बा
हैयङ्गवीनकलसीं चलिता वहन्ती ।
हा मल्लिकार्पणपदं व्यथते शिरस्ते
मूर्द्धन्यमुं मम निधेहि कृपां विधेहि ॥५७॥

ग्रर्थात्—"हे राधे ! तुम तो हैयङ्गवीन (मक्खन) की भाँति कोमलाङ्गी हो, किस प्रकार हैयङ्गवीन कलस को वहन कर चल रही हो । वड़े खेद को बात है, तुम्हारे मस्तक में मल्लिपुष्प का ग्रर्पण करने पर व्यथा होती है, ग्रहो ग्राज उस मस्तक पर कलस देख रही हूँ, कृपा करके मेरे मस्तक पर कलस को रख दो" ॥५७॥

इधर श्रीकृष्ण नान्दीमुखी से यह सम्वाद सुन कर दानघाटी में पहुँच जाते हैं एवं मधुमङ्गल-सुबलादि सखाग्रों के साथ दानी वेश में सजमज कर घाटी के स्वामी वन कर उन से "शुल्क" दावा करते हैं। दानघाटी में दोनों पक्ष का संघर्ष होता है । जिस से हास्य-परिहासमय नाना बाद-विवाद उपस्थित किया जाता है ॥

श्रीकृष्ण राधिका का वर्णन करते हैं कि—

ग्रप्रौढ़द्विजराजराजदलिका लब्धा विभूतिं रुचां
नव्यामात्मनि कृष्णवर्त्मविलसद्दृष्टिर्विशाखान्विता ।
कन्दर्पस्य विदग्धतां विदधती नेत्राञ्चलस्य त्विषा
त्वं राधे शिवमूर्त्तिरित्युरसि मां भोगीन्द्रमङ्गीकुरु ॥१२६॥

ग्रर्थात्—"हे राधे ! तुम मङ्गलमयमूर्त्ति धारण कर रही हो, तुम्हारा ललाट ग्रर्द्धचन्द्र शोभा को धारण कर रहा है । ग्रपूर्व-कान्ति द्वारा तुम्हारा शरीर विभूपित हो रहा है। मुझ कृष्णमार्ग में तुम्हारी दृष्टि विलास कर रही है। तुम विशाखा नाम्नी सखी के साथ हो, नेत्राञ्चलकान्ति द्वारा कन्दर्प विदग्धता का विधान कर

रही हो, ग्रतएव भोगिराज मुझ को ग्रपने वक्ष:स्थल में स्थान दो ॥

पक्षान्तर में—हे राधे ! तुम शिवमूर्त्ति को धारण कर रही हो, ग्रर्द्धचन्द्र से तुम्हारा ललाट विराजमान है, तुम ग्रपने शरीर में नवीन कान्तियों की विभूति को धारण कर रही हो, तुम्हारे नेत्र ग्रग्निरूप हो रहे हैं, तुम विशाखा ग्रर्थात् कार्त्तिकेय के साथ युक्त हो, ग्रौर नेत्र के द्वारा कन्दर्प का दग्ध किया है, ग्रतएव भोगीन्द्र ग्रर्थात् सर्पसमान मुझे ग्रपने वक्ष:स्थल में ग्रङ्गीकार करो ।" इस प्रकार दानघाटी पर घाटीकर के लिये दोनों का वाद-विबाद होता है। शेष में पौर्णमासीजी की मध्यस्थता में चरम सीमापन्न हास्य परिहासमय बाद-विवाद की निष्पत्ति होती है ॥

इस भाणिका का निर्माण कारण यह है कि—

श्रीराधाकुण्ड़निवासी श्रीपाद रघुनाथदासगोस्वामीजी महान् विप्रलम्भ से परिपूर्ण ललितमाधवनाटक का पाठ कर उन्मत्त प्राय हो गये, उन की जीवन रक्षा ग्रसम्भव सी हो गयी । श्रीरूप-गोस्वामीजी ने हास्यमय सम्भोगरस से परिपूर्ण दानकेलिकौमुदी का निर्म्माण कर उन के मन को रसान्तर में ग्रभिनिवेश कराने के लिये शोधन-बहाना देकर ललितमाधव को लेकर इसका ग्रर्पण किया है। जिस का पाठ कर रघुनाथजी स्वस्थ हुए । उन्होंने भी समयान्तर में सम्भोगरस प्रचुरमय "दानकेलिचिन्तामणि" तथा "मुक्ताचरित" की रचना की। प्रस्तुत दानकेलिकौमुदी का निर्माण काल १४७१ शकाब्दि में है। बहरमपुर संस्करण में इसकी टीका श्रीजीवगोस्वामी नाम से तथा संस्कृत कालेज के एसियाटिक सोसा-इट तथा पुना भाण्डाराकार ग्रनुसन्धान समिति की ग्रन्थतालिका में श्रीविश्वनाथचक्रवर्त्तीजी नाम से उल्लिखित है । टीका का नाम "महती" है। श्रीरसिकोत्तंसविरचित "प्रेमपत्तन" ग्रन्थ से इसका स्पष्टीकरण हो जाता है कि—"यत्राधर्म एव धर्म: स्थापित:" इस

प्रकरण में—तथोक्तं श्रीविश्वनाथचक्रवर्त्तिमहाशयैः दानकेलि-कौमुदीटीकायाम्—

"दानकेलिकलौ लुप्तधर्म्ममर्य्यादयोर्भजे ।
राधा-माधवयोः कामलोभदम्भमदानृतम्" ॥ इति ।

अतएव चक्रवर्त्तीजी टीकाकार अवश्य हुए। अस्तु बहुत दिनों से देवाक्षर में इस का सटीक-सानुवाद प्रकाशन करने की इच्छा थी जो कि आज फलवती हुई। डाक्टर नवेन्दुदत्त मजूमदार महोदय वृन्दावन गोपालबाग निवासी ने इस का प्रकाशन में उत्साहित किया तथा सहानुभूति दी। हम उन को हार्दिक धन्यवाद देते हैं। परिशेष में हम उन महानुभावों को स्मरणपद्धति में लाते हैं कि जिन्होंने प्रारम्भमें इस सेवा कार्य में हार्दिक सहानुभूति दी थी तथा उत्साहित किया था। जिन की इस मरजगत् में अब स्थिति न होकर प्रभु के पास नित्यधाम में स्थिति हो रही है ।

वे यथा—डाक्टर गोकुलनारायणव्यासजी, आगरा ; श्रीयुक्त हरिदासदासजी, हरिबोलकुटीर, नवद्वीप ; श्रीमान् लाला चेतरामजी, कोसीकलाँ ; राजा रघुनन्दनजी, मूँगेर ; उन की धर्मपत्नी रानी सरस्वतीदेवीजी, मूँगेर ; ॥ इत्यादि ॥

कृष्णदासबाबा—

❀ दानकेलिकौमुदी ❀

श्रीश्रीराधाकृष्णौ जयतः ॥

अन्तःस्मेरतयोज्ज्वला जलकणव्याकीर्णपक्ष्माङ्कुरा
किञ्चित् पाटलिताञ्चला रसिकतोत्सिक्ता पुरः कुञ्चती ।

श्रीश्रीहरिर्जयति । दानकेलिकलौ लुप्तधर्म्ममर्य्यादयोर्भजे । राधामाधवयोः कामलोभदम्भमदानृतम् ॥ अथ सोऽयं रसिकमुकुट-मणिरभिनीतविदग्धमाधवादिनाटकार्थरत्नो यत्नोरीकृत-राधा-माधवलीलाविलासाविराम-रामणीयकपीयूषपरिवेषणव्रतः परम-भागवतानुरागिणः प्रियसुहृदोऽनुरञ्जयन्नखिलकविमण्डलाखण्डलः श्रीरूपनामा अमृततरङ्गिणीमिव दानकेलिकौमुदीं नाम भाणिकां निर्म्मिमाणः प्रवरनान्दीमुपश्लोकयन्मङ्गलमाचरति अन्तःस्मेरत-येति। माधवेन पथि पुरोऽग्रत एव रुद्धाया राधाया दृष्टिर्वो युष्माकं श्रियं प्रेमसम्पत्तिं क्रियात् करोतु । कथम्भूता किलकिञ्चितं भाव-विशेषं स्तवकयितुं स्तवकीकर्त्तुं वहिरीषत्प्रकटयितुं शीलं यस्याः सा। "स्याद्गुच्छकस्तु स्तवक" इत्यमरः । "गर्व्वाभिलाप-रुदित-स्मितासूया-भय-क्रुधाम्। सङ्करीकरणं हर्षादुच्यते किलकिञ्चितम्"। अत्र अन्तःस्मेरतयेति हर्षोत्थं स्मितम्। स्तवकपक्षे अन्तःस्मेरता अन्त-रीषत्फुल्लता, जलकणेति रुदितं अवहित्थोत्थम्, पक्षे मकरन्दोद्गमः । किञ्चित् पाटलितं श्वेतरक्तीकृत अञ्चलं यस्याः सा इति शितिम्ना स्मितं आरुण्येन क्रोधः। पक्षे श्वेतारुणवर्णद्वयोद्गमः । रसिकतया उत्कर्षेण सिक्तेत्यभिलापः पक्षे मधुररसोद्गमः । कुञ्चेति सङ्कु-चितरूपेति भयम्। पक्षे कुञ्चनं कोरकता । मधुरा व्याभुग्ना-कुटिला

रुद्धायाः पथि माधवेन मधुरव्याभुग्नतारोत्तरा
राधायाः किलकिञ्चितस्तवकिनी दृष्टिः श्रियं वः क्रियात् ॥१॥
विभुरपि कलयन् सदातिवृद्धिं
गुरुरपि गौरवचर्य्यया विहीनः ।
मुहुरुपचितवक्रिमापि शुद्धो
जयति मुरद्विषि राधिकानुरागः ॥२॥
नान्द्यन्ते सूत्रधारः ॥
अलमतिविस्तरेण ॥३॥
(समन्तादवलोक्य) हन्त कथं मदीय-नान्दीचन्द्रिकासन्दी-
पित-भाववन्धुरा नन्दीश्वरगिरेरुपत्यकायां घूर्णते सतां
मण्डली ॥४॥

च या तारा कनीनिका तया उत्तरा श्रेष्ठा । मधुरव्याभुग्नेति गर्व्वा-
सूये । पक्षे माधुर्य्यं कुटिलाकृतित्वञ्च तदा मधुरव्याभुग्नतां राति
गृह्णातीति छेदः उत्तरा श्रेष्ठा ॥१॥

विभुर्व्यापकोऽपि चिच्छक्तिरूपत्वात् । सदैवाभितो वृद्धिं कल-
यन् धावन् लोकवल्लीलाकैवल्यात् । अनुरागो नाम-सदानुभूयमानेऽपि
वस्तुन्यपूर्व्वतया अननुभूतत्वभानसमर्पकः, प्रेम्नः पाकरूपभाव-
विशेषः स च प्रतिक्षणं वर्द्धत एवेति । गौरवचर्य्यया दाक्षिण्यचर्य्यया
हीनो मदीयतामयमधुरस्नेहोत्थत्वात् । उपचितो वक्रिमा कौटिल्य-
पर्य्याय-वाम्यलक्षणो यस्मिन् सोऽपि शुद्धः शुद्धसत्त्वविशेषात्म-
कत्वात् निरुपाधित्वाच्च । जयति सर्व्वोत्कर्षेण वर्त्तताम् ॥२॥

नान्द्यन्ते सूत्रधार आह इत्यन्वयः । यदुक्तं "प्रस्तावनयान्तु मुखे
नान्दीकार्य्या शुभावहा । आशीर्नमस्क्रिया वस्तुनिर्द्देशान्यतमान्वि-
ते"ति ॥३॥

चन्द्रिकादीपितत्वेन भावस्य समुद्रत्वं व्यञ्जितम् । "उपत्यकाद्रेरा-

(पुनरवेक्ष्य)
भक्तः कोऽपि तनोस्तनोति पुलकैर्नृत्यन्निहोत्फुल्लतां
शुष्यन् कोऽपि चिराद्विवर्णवदनो धत्ते विदीर्णं मनः ।
गर्ज्जन् धावति कोऽपि विन्दति पतन् कोऽप्येष निष्पन्दता-
मुद्यत्यच्युतविभ्रमे गतिरभूत् का स्थेयसामप्यसौ ॥५॥
(क्षणं विमृष्य)
आमभिज्ञातं निदानं साधिष्ठप्रेमकदम्वकादम्वराणा-
माड़म्वरोऽयम् ॥६॥

सन्ना भूमिरि"त्यमरः । वन्धुरा मनोज्ञा ॥४॥

पुलकैस्तनोरुत्फुल्लतां तनोतीति तल्लीलाश्रवणोत्थेन सहसैव
हर्षेण । शुष्यन् कोऽपीति तत्र अविशेषानुसन्धानेनौत्कण्ठातिशयेन
दैन्यनिर्व्वेदग्लानिभिः । गर्ज्जन्-धावतीति सद्य एव तदाकारया-
मन्तःकरणवृत्तौ तत्साक्षात्कारेण स्वस्य तत्परिजनत्वभावनया गर्व्व-
मदहर्षैः । कोऽपि पतन् सन् निष्पन्दतां विन्दतीति तद्दर्शनानन्द-
जाड्यमोहाभ्याम् । तत्र यथोत्तरमेव प्रेमवतां श्रैष्ठ्यम् । यद्वा वैष्णव-
तोषण्युक्तयुक्त्या प्रेम्नो विश्रम्भप्रधानतोत्कण्ठाप्रधानत्वाभ्यां भेदाभ्यां
तदधिष्ठानानां भक्तानामपि द्वैविध्येन समानेनाप्युद्दीपनेन विभावेन
युगपदनुभवगोचरीकृतेन परस्परविजातीयभावोद्गमो नानुपपन्नः ।
तत्र विश्रम्भप्रधानानां संयोगस्फूर्त्तितारतम्यात् पुलक-नृत्य-गर्ज्जन-
धावनानि । उत्कण्ठाप्रधानानां विश्लेषस्फूर्त्तितारतम्येन दैन्यानुताप-
निर्व्वेदादितारतम्यात् मुखशोष-वैवर्ण्य-भूपात-मूर्च्छा ज्ञेयाः । अच्यु-
तस्य विभ्रमे विलासे उद्यति सति स्थेयसामतिस्थिराणामप्येषां
काप्यनिर्व्वचनीया गतिरवस्था अभूत् ॥५॥

आमिति मान्तमव्ययं स्मरणे । साधिष्ठोऽतिश्रेष्ठो यः प्रेमसमूहः
स एव कादम्वरा मदभेदास्तेषामाड़म्वरः संरम्भः । "कादम्वरस्तु
दध्यग्रे मद्यभेदे नपुंसकम् । आड़म्वरस्तुर्य्यपक्षसंरम्भगजगर्जित" इति

यतः—
गभीरोऽप्यश्रान्तं दुरधिगमपारोऽपि नितरा-
महार्य्यां मर्यादां दधदपि हरेरास्पदमपि ।
सतां स्तोमः प्रेमण्युदयति समग्रे स्थगयितुं
विकारं न स्फारं जलनिधिरिवेन्दौ प्रभवति ॥
(पुनर्निभाल्य)
तत्रापि विश्वविलक्षणा सा निर्भरमतिमोहिनी केलिचर्य्या ।
(इति मूर्द्धानमाधुन्वन् सधैर्य्यम् ।७॥)
प्रेमोर्जिता नर्म्मविवादगोष्ठी
गोपेन्द्रसूनोः सह राधयासौ ।
हंसानपि श्रोत्रतटीमवाप्ता
शुद्धामृतादप्यभितो रुणद्धि ॥८॥
(प्रविश्य नटः सानन्दम्)
अवगणितसन्धिभूमा नाट्यकलेयं वलिष्ठसप्ताङ्गा ।
परमसुवृत्तियुगाढ्या वरराज्यश्रीरिव स्फुरति ॥९॥

मेदिनी ॥६॥

अहार्य्यां केनाऽपि हर्त्तुमशक्यां अत्याज्यां समग्रे सम्पूर्णे स्थगयितुं सम्वरीतुम् ॥७॥

प्रेम्ना ऊर्जिता प्रवलिता हंसानपि आत्मारामानपि शुद्धामृतां ब्रह्मानन्दादपि । पक्षे स्पष्टम् ॥८॥

इयं नाट्यकला नृत्यवैदग्धी श्रेष्ठा राज्यश्रीरिव स्फुरति । अवगणितः तिरस्कृतसन्धिभूमा सन्धिवाहुल्यं यस्यां सा । मुख-प्रतिमुख-गर्व्व-विमर्ष-निर्व्वहणानां नाटकोक्त – पञ्च – सन्धीनां मध्ये भाणिकाया प्रथम-पञ्चम-सन्धिभ्यां युक्तत्वात् । पक्षे पञ्चभिः सह प्रीत्या स्वकार्य्यसाधनार्थं सन्धानं सन्धिः स च वलवता राज्ञा नाद्रि-

सूत्र । भोस्ताण्डवाचार्य्यपाण्डित्यपारङ्गत ! सम्यगभिज्ञातम् ।
यदेष नियोगेन सुहृदामुपरूपकभिदां दानकेलिकौमुदीं नाम
भाणिकामभिनेतुमुद्यतोऽस्मि । तदत्र निजाभीष्टदैवतानुस्मरण-
मङ्गलमाचरेयम् ।
(इत्यञ्जलिं कृत्वा) ॥१०॥
नामाकृष्टरसज्ञः शीलेनोद्दीपयन् सदानन्दम् ।
निजरूपोत्सवदायी सनातनात्मा प्रभुर्जयति ॥११॥
नट । भाव पश्य पश्य—
गान्धार-ग्रामगुरोस्तव गान्धर्व्वविद्याप्रवन्धेन कुरङ्ग-
धर्म्ममुपलम्भिता रसज्ञरत्नमण्डली नात्मानमप्यनुसन्धातु-
मसौ क्षमते ॥१२॥

यत एव वलिष्ठानि सप्ताङ्गानि यस्यां सा । "उपन्यासोऽथ विन्यासो विरोधः साध्वसं तथा समर्पणं निवृत्तिश्च संहारश्चाऽपि सप्तम" इति नाट्ये सप्ताङ्गानि । पक्षे स्वाम्यमात्य-सुहृत्-कोष-राष्ट्र-दुर्ग-वलानि चेति राज्यसप्ताङ्गानि । परमसुवृत्त्योर्भारती कैशिक्योर्युगेन आढ्यः पक्षे परमसुवृत्तियुक् आढ्यश्च ॥९॥

उपरूपकभिदां नाटिकाविशेषां ॥१०॥

नाम्नैव आकृष्टा रसज्ञाः रसिकाः रसज्ञा जिह्वाचयेन यस्य सः, शीलेन स्वचरितेन नन्दं श्रीव्रजेश्वरं सदा सतामानन्दं च उद्दीपयन् प्रकाशयन् निजरूपेण स्वसौन्दर्य्येण उत्सवं दातुं शीलं यस्य सः । पक्षे निजः स्वीयो रूपः मल्लक्षणो जनः तस्य उत्सवदायी, सनातनो नित्य आत्मा श्रीविग्रहो यस्य । पक्षे सनातनो नाम आत्मा देहो यस्य सः ॥११॥

गान्धारः सङ्गीतनिष्ठस्तृतीयो ग्रामः तत्र गुरोरध्यापकस्य गान्धर्व्वं गानं रसज्ञरत्नमण्डली श्रेष्ठरसिकश्रेणी ॥१२॥

सूत्र। प्रकटितललितालङ्कृतगान्धर्व्वेयं महाविद्या।
नान्दीमुखी न हि कथं रसिकेन्द्रानन्दिनी भविता॥

(नेपथ्ये)

साधु भोः कुशीलवाचार्य्य तथ्यं कथयसि। यदद्य नान्दीमुखी गान्धर्व्विकामावेद्य रसिकवृन्दमौलेर्व्रजेन्द्रनन्दनस्य चिरमानन्दाय भवित्री॥

सूत्र। कथं वनदेवीयं वृन्दा सुबलेन सार्द्धमित एवाभिवर्त्तते। तदत्र नाट्ये नटान्नियुक्तामितः प्रयाव (इति निष्क्रान्तौ) ॥१३॥

(प्रस्तावना)

(ततः प्रविशति सुबलेन समं सङ्कथयन्ती वृन्दा।)

वृन्दा। साधु भोः कुशीलवाचार्य्येति पठित्वा सुबल कथमेतयापि मङ्गलवार्त्तया त्वमुत्फुल्लमुखो नाभिलक्ष्यसे॥१४॥

सुबल। वृन्दे इमस्स पसङ्गस्स विसेस विण्णाण सुण्णदाए मुद्धो विअ जादोह्मि ता फुड़ं कहिज्जउ॥१५॥

इयं भाणिका महाविद्या महामन्त्ररूपा। प्रकटितं ललितालंकृतं सङ्गीतनिष्ठललितालङ्कारयुक्तं गान्धर्व्वं गानं यस्याः सा। नान्दी मुखे यस्य सा। पक्षे नान्दीमुखीति विशेष्यपदम्। प्रकटिता ललितयालंकृता गान्धर्व्वा श्रीराधा यया सा। महती विद्या यस्याः सा। पात्रप्रवेशार्थं कथोद्घातसंज्ञं नाम मुख्याङ्गमिदम्। यदुक्तम्—"सूत्रिवाक्यं तदर्थं वा स्वेति वृत्तमिमं यदा। स्वीकृत्य प्रविशेत् पात्रं कथोद्घातः स कीर्त्तित" इति॥१३॥

अस्य प्रतिपाद्यस्य तीर्थं प्रस्तावनोच्यते इति प्रस्तावलक्षणम्॥ ४॥

"वृन्दे अस्य प्रसङ्गस्य विशेषविज्ञानशून्यतया मुग्ध इव जातोऽस्मि तस्मात् स्फुटं कथ्यताम्॥१५॥

वृन्दा। अद्य राधा सखीभिर्मण्डितसनीड़ा गोविन्दकुण्डरोधसि मखमण्डपे गुरूणामभ्यनुज्ञया हैयङ्गवीनं विक्रेतुं अभिक्रमिष्यति तदावेदयितुं नान्दीमुखी सान्दीपनेर्मातुरुपदेशेन मुकुन्दमुपलब्धा॥१६॥

सुबल। (सानन्दम्) वुन्दे एसा निहिलमाहुरी वरीअसी राहिआ कहं एत्थ लहुअम्मि अत्थे गुरुअणेहिं अणुण्णादा॥१७॥

वृन्दा। यदहनि हवनीयं हारि हैयङ्गवीनं
स्वयमिदमुपहार्य्यं गोदुहामङ्गनाभिः।
उपहरणकरीणामप्यभीष्टार्थसिद्धि-
र्मुनिभिरभिहितास्य प्रक्रियेयं मखस्य॥१८॥

सुबल। एरिसो सो कस्स महन्तस्स महो।

वृन्दा। सुगृहीतनामधेयस्यानकदुन्दुभेः॥१९॥

सुबल। महुपुरं मुक्किअ कहं वणमज्झे तिणा आरम्भिदो जण्णो।

वृन्दा। जीवति कंसहतके कथं मथुरायां तस्य यज्ञसिद्धिः अतस्तेनात्र भागुरिर्नाम गर्गस्य जामाता स्वप्रतिनिधिर्न्यधायि॥२०॥

मण्डितं सनीड़ं निकटं यस्याः सा। "समीपे निकटासन्न-सन्निकृष्ट-सनीड़वदि"त्यमरः। शखीभिरलंकृतपार्श्वा इत्यर्थः॥१६॥

वृन्दे एषा निखिलमाधुरीवरीयसी राधिका कथं अत्र लघौ अर्थे गुरुजनैरनुज्ञाता॥१७॥

हवनीयं हवनयोग्यम्। "तत्तु हैयङ्गवीनं यत् सद्योगोदोहोद्भवं घृतमि"त्यमरः॥१८॥

ईदृशोऽसौ कस्य महतो मखः॥१९॥

मधुपुरं त्यक्त्वा कथं वनमध्ये तेनारब्धो यज्ञः॥२०॥

सुवल। फुड़ आहिआरिओ एसो जण्णो ॥२१॥

वृन्दा। नहि नहि किन्तु शान्तिकोऽयम्। यत्र सुतादप्यधिकस्य मित्रसूनोः कृष्णस्य स्वपुत्रस्य च रामस्य निखिलानिष्टशान्तिः फलम्।

सुवल। क्षणं विभाव्य सकौतुकम् ॥२२॥

पिअवअस्सस्स सुइरं हिअअट्ठिदा सा गरिट्ठा केलिघट्टाहिआरिदानुरूवस्स राहिआपहुदीहिन्तो दाणग्गहविलासस्स लालसा अज्ज च्चेअ सिद्धा। २३॥

वृन्दा। सुवल मद्विधानामपि निधानायते सा दानलीला। तदेहि मानसगङ्गातीरमवतरावेत्युभौ तथा कुरुतः ॥२४॥

सुवल। वुन्दे वणन्तराले अकरालाणं मरालाण ध्वणीधोरणी धुणीडाहिणे सुनिज्जउ ॥२५॥

वृन्दा। नायं मरालानां ध्वनिः किन्तु पशुपालवालातुलाकोटीनाम्। (पुनर्निरूप्य सानन्दम्) ॥२६॥

स्फुटं आभिचारिक एप यज्ञः ॥२१॥

शान्तिकः शान्तिप्रयोजनकः तदस्य प्रयोजनमित्यर्थे अध्यात्मादिभ्यष्टिकन् ॥२२॥

प्रियवयस्यस्य सुचिरं हृदयस्थिता सा गरिष्ठा केलिघट्टाधिकारितानुरूपस्य राधिका-प्रभृतिभ्यो दानग्रहविलासस्य लालसा अद्यैव सिद्धा ॥२३॥

निधानं निधिः तद्वदाचरति निधानायते ॥२४॥

वनान्तराले अकरालानां मरालानां ध्वनिधारणी ध्वनिश्रेणी धूनी नदी तस्या दक्षिणे मानसगङ्गाया दक्षिणपार्श्वे श्रूयतां। २५॥

तुलाकोटिर्नूपुरः ॥२६॥

शोणे मण्डितमूर्ध्नि कुण्डलतया क्लृप्ते दुकूलोत्तमे
न्यस्तां स्वर्णघटीं वहन्त्यचटुलां हैयङ्गवीनोज्ज्वलाम्।
दूरे पश्य तथाविधाभिरभितः स्मेरा सखीभिर्वृता
राधा मानसजाह्नवीतटभुवं स्वैरं परिक्रामति ॥२७॥

सुवल। अम्महे चञ्चलाहिं सहअरीहिं पुणोपुणो उद्दीविदाए राहिआए आहण्डलकोअण्डलदाए विअ जलदमण्डलो मण्डिज्जई णिअ माहुरिएण वुन्दाड़ई।

वृन्दा। सुवल राधामाधुर्य्यस्य गिरामप्यग्रगामित्वाद्दुद्देशोऽपि साहसिक्यमेत्रावधारयामीति मुखमानमय्य सापत्रपम् ॥२८॥

अनालोच्य व्रीड़ां यमिह वहु मेने वहुतृणं
त्यजन्नीर्षापन्नां मधुरिपुरभीष्टामपि रमाम्।
जनः सोऽयं यस्याः श्रयति न हि दास्येप्यवसरं
समर्थस्तां राधां भवति भुवि कः श्लाघितुमपि ॥२९॥

शोणे दुकूलोत्तमे कथम्भूते कुण्डलतया कुण्डलीकृतत्वेन क्लृप्ते मूर्द्धा येन तस्मिन्। तदपि एकं भूपणमिव तत् नतु दूपणमिति भावः,अचटुलां सुस्थिरः वृहत्तिमिरमण्डलोपरिस्तोकमार्त्तण्डमण्डलं तदुपरिस्थिरविद्युन्मण्डलमिव शिरसि शोभेवेति भावः ॥२७॥

अहो चञ्चलाभिः सहचरीभिः पुनः पुनरुद्दीपितया राधिकया आखण्डलकोदण्डलतया इव जलदमण्डलो मण्ड्यते निजमाधुर्य्येण वृन्दाटवी। पक्षे चञ्चलाभिर्विद्युद्भिः सहचरीभिः सह गामिनीभिः। आखण्डलकोदण्ड इन्द्रधनुः तच्च स्वरूपतः पीतवर्णमपि नीलवर्णारुणश्वेतादि किर्म्मिरितम्। दार्ष्टान्तिके विविधमणिभूपणादिवत्त्वेन तथात्वम् ॥२८॥

यन्मल्लक्षणं जनं निकृष्टमपि वहु यथास्यात्तथा मेने। अभीष्टां प्रेष्ठामपि रमां लक्ष्मीं तृणमिव त्यजन् अतएव ईर्षापन्नां इर्पावतीं

भवतु तथापि स्वगिरं वासयितुं तत् सौरभं किञ्चिदुदञ्चयामीति
सुबलमालोक्य ।।३०।।

राधाया मुखमण्डलेन बलिना चन्द्रस्य पद्मस्य वा
व्याक्षिप्ता सुषमेति केयमवुधैः श्लाघा विनिर्म्मीयते ।
यद्दुरेऽप्यनुभूय भूयसि सुधाशुद्धापि चन्द्रावली
पद्मालीच विसृज्य शीर्य्यति निजां सौन्दर्य्यदर्पश्रियम् ।।३१।।

सुवल । एसो वि कित्ति तिए उक्करिसो ।।

वृन्दा । सुवल गोवर्द्धनमूर्द्धनि श्यामलमण्डपिकायाः पृष्ठतः शिखण्ड-मौलिस्त्वयोपनीयताम् । मयातु मनोहरमासां विहारकौशल-मवलोकयन्त्या शनैरवगन्तव्यमिति सुवलेन सह निष्क्रान्ता ।।

विष्कम्भकः ।।

ततः प्रविशति सखीचतुष्टयेनासज्यमाना राधा ।।३२।।

राधा । अम्महे वणलेहाए लोअणलोहणिज्जदा ।
(इति संस्कृतमाश्रित्य) ललिते पश्य पश्य ।।३३।।
पदततिभिरलं कृतोज्ज्वलेयं
ध्वजकुलिशांकुशपङ्कजाङ्किताभिः ।

सोऽयं मल्लक्षणो जनः वृन्दारूपः यस्या दास्यमपि प्राप्तं नार्हतीत्यर्थः ।।२९।।

वासयितुं सुगन्धिकर्त्तुं इति तद्वर्णयित्र्या मत्सरस्वत्या एव माहात्म्यं भविष्यति न तु वर्णनीयायास्तस्या इति भावः ।।३०।।

सुषमा शोभा भूयसि वहुतरे दूरेऽपि किं पुनर्निकटे इति भावः । सुधा अमृतं मधुच चन्द्राणामावलिः पद्मानां आली श्रेणी पक्षे चन्द्रावली यूथेश्वरी पद्माली लक्ष्मी समूहश्च तत्पक्षे सुधातोऽपि शुद्धा ।।३१।।

एषोऽपि कियान् तस्या उत्कर्षः ।।३२।।

अहो वनलेखाया लोचनलोभनीयता ।।३३।।

इयं वनालिर्वनश्रेणी वनरूपा सखीच । ध्वजाद्यैरङ्किताभिः

नखरलुठित - कुट्मलावनाली
किमपि धिनोति धुनोति चान्तरं मे ।।३४।।

ललिता । (स्मित्वा) विसाहे पेक्ख पेक्ख (इति संस्कृतेन) ।
सदा सुधावन्धुरवेणुमाधुरी
विस्मारिताशेषशरीरकर्म्मणाम् ।
चिरं तिरश्चामपि यत्र कानने
मनः समाधेर्न कदाप्युदास्यते ।।३५।।

राधा । (स्वगतं) अवि णाम अतक्किदं, आअदुअ, हैअङ्गवीणोवहारिणीणं अम्भाणं मग्गं अज्ज रुन्धिस्सदि वइन्दणन्दणो ।।३६।।
(प्रकाश) हला ललिदे एहि पत्थाणओसरे, ईसि विहसिअ, किं भणिदं, भअवदो ए ।।३७।।

पदततिभिः अलकृता उज्ज्वला स्वाधीनभर्त्तृकेवेति भावः । नखरेषु कृष्णस्य नखेषु लुठितं कुट्मलं तच्चयनकाले यस्याः सा । पक्षे नखराङ्कितस्तना इत्यर्थः । धिनोति प्रीणयति कृष्णसंभुक्तस्वसखीमिव दृष्ट्वा सुखमेव प्राप्नोमीत्यर्थः । धुनोति कम्पयति इति तद्दर्शनेन ममाप्यौत्सुक्योदयादिति भावः । कम्पः सात्त्विकविकारः ।।३४।।

स्मित्वेति वनाङ्कदर्शनेनैव तवाद्य गाम्भीर्य्यं विगलितमभूत् आस्तां तद्वेणुमाधुरीवार्त्तापि इत्याह सदेति । तिरश्चामित्यतिचपलानां ज्ञानशून्यानामपि समाधिश्चित्तैकाग्र्यं अतिदृढ़ं अतिस्थिराणां ज्ञानवतीनामपि भवतीनां चापल्यं विचारशून्यत्वं च भावीत्यहो विपरीतवैचित्रिकारित्वं वेणोरधुनापि भवत्यानुभूतमेवेति भावः ।।३५।।

अपि नाम अतर्कितं आगत्य हैयङ्गवीनोपहारिणीनामस्माकं मार्गमद्य रोत्स्यति व्रजेन्द्रनन्दनः ।।३६।।

सखि ललिते इदानीं प्रस्थानावसरे ईषद्विहस्य किं भाणितं भगवत्या ।।३७।।

ललिता । एव्वं भणिदं, अज्ज तुम्भाणं, कोवि अऊरूव्वो उवन्थिदो दीसई लाहो ॥३८॥

राधिका । ललिदे कधापसङ्गे पुच्छीअदु, सा महातावसी सव्वण्णा तत्त होदी पोण्णमासी ॥३९॥

ललिता । कि तं पुच्छिदव्वम् ।

राधा । पुव्वभवे नन्दीमुही पहुदिहिं कीदिस महाव्वदं किदं त्ति ॥४०॥

ललिता । एदाणं महाव्वदकारिदा कधं तुए तक्किदा ॥४१॥

राधा । हद्धो हद्धी, अइ मुद्धे तुमंवि एव्वं पुच्छसि ।

जं तस्स मन्दान्दोलिद-मअरकुण्डलकिरणराअ-कन्दलो-सुन्दरस्स मुहारविन्दस्स अच्चरिअं सिविणे वि सुदूरादो तुम्भादिसोणं दुल्लहगन्धलअं महामाहुरीमअरन्धं णेत्तेन्दिन्दिरेहिं सव्वदा ताओ अणि-अरिदं पिअन्ति ॥४२॥

ता भणामि परमाहिट्ठाणुवलम्भमुम्मरजालिदाणं तुम्भाणं वि

एवं भणितं अद्य युष्माकं कोऽप्यपूर्व्वं उपस्थितो दृश्यते लाभः ॥३८॥

राधाह ललिते कथाप्रसङ्गे पृच्छतां महातापसी सर्व्वज्ञा तत्र भवती पौर्णमासी ॥३९॥

ललिता किं तत्प्रष्टव्यं राधा पूर्व्वभवे नान्दीमुखीप्रभृतिभिः कीदृशं महाव्रतं कृतमिति ॥४०॥

एतासां महाव्रतकारिता कथं तया तर्किता ॥४१॥

हद्धो खेदे मुग्धे त्वमपि एवं पृच्छसि, यत्तस्य मन्दान्दोलितमकरकुण्डलकिरणरागकन्दलोसुन्दरस्य मुखारविन्दस्य आश्चर्य्यं स्वप्नेऽपि सुदूरतो युष्मादृशीनां दुर्ल्लभगन्धलवं महामाधुरीमकरन्दं नेत्रेन्दिन्दिरैर्नेत्ररूपभ्रमरैस्ता नान्दिमुखीप्रभृतयः सर्व्वदा अनिवारितं पिवन्ति ॥४२॥

तद्भणामि, परमाभीष्टानुपलम्भमुर्म्मुरज्वालितानां युष्माकमपि

तत्थ महाव्वदे दिक्खा सव्वधा ज्जेव्व जुत्ता । जधा ताणं णान्दोमुहीपहुदीण पहवी भाविणि भवे वि ण दुल्लहाभवे ॥४३॥

विशाखा । राहे नन्दीमुही पहुदिदो गोवकण्णागणादो किम्वा अविसेसेण सव्व गोउलवासि जणादो वि कावि एक्का महाभाइणी किदमहाव्वदलक्खा लक्खीअदि ॥४४॥

राधा । (सोत्कण्ठम्) विसाहे का क्खु एसा पुण्णवदीणं सिहामणी ॥

ललिता । (स्वगतं) तुअत्तो का ईदिसी अण्णा दुदीआ ॥

राधा । सहि विण्णादं सच्चं कधेसि (इति संस्कृतेन) ॥४५॥

श्लाघ्यते कलिलकेलिकाकलीव्याकुलीकृतसमस्तगोकुला ।
श्रीहरेरधरसीधुमाधुरीमादिता मुरलिरेव नेतरा ॥४६॥

तत्र महाव्रते दीक्षा सर्व्वदैव युक्ता । यथा तासां नान्दीमुखीप्रभृतीनां पदवी भाविनि भवेऽपि न दुर्ल्लभा भवेत् । मुर्म्मुरस्तुषाग्निः युष्माकमिति सख्यैनैक्यात् औत्सुक्यन्तु स्वस्यैवातिशयितुं तास्वारोपितम् ॥४३

राधे नान्दीमुखोप्रभृतितो गोपकन्यागणतश्च किम्वा अविशेषेण सर्व्वगोकुलवासिजनतश्च कापि एका महाभागिनीकृत-महाव्रतलक्ष्या लक्ष्यते ॥४४॥

का खलु एषा पुण्यवतीनां शिखामणिः । ललिता त्वत्तः का ईदृशी अन्या द्वितीया । राधा सखि विज्ञातं विज्ञातं सत्यं कथयसि ॥४५॥

कलिला गहना या केलिमय्यः काकल्यस्ताभिः । श्लेषेण कलिं कलहं लान्ति सर्व्वतो ददतोति तां सीधुर्मधु तत्रश्च मत्ता मुखरा जगदुद्वेजिकापि तपोवलेन तथाभूताभवदिति भावः । यद्वा – तथा अतिसौभाग्येनैव अधरमधुपानं लब्धं तेन च सा उन्माद्यभूतीकृता नतु तस्याः श्रेष्ठाया औत्पत्तिकः स स्वभाव इति भावः ॥४६॥

ललिता। सस्मितं सच्चम्।

मुरलीकुइदतरलीकिदधीरमणसा गोरी।
उत्तमवंसुप्पण्णा साराहिणा महासरसमहुरा ॥४७॥

राधा। हला कीस हससि। मन्दभाइणावि इमिणा जणेन अप्पणो पणइजणाणं पसादादो तं मुहमण्डलं दो तिण्ण वारं वि दिट्ठ-मत्थि। तधावि पइदिमादएण तिणा अउरुव्वेण तस्स माहुरी महुणा हिअअं उम्महिअ तधा सव्वं विसुमारीअदि। जधा परिहा-णेण पेक्खणं वि दुल्लहम् ४८॥

(इत्यौत्सुक्यमभिनीय संस्कृतेन)

तपस्याम: क्षामोदरि वरयितुं वेणुपु जनु-

सत्यम्, मुरलीकूजिततरलीकृतधीरमानसा गौरी। उत्तमवंशोत्पन्ना साराहीना महासरसमधुरा। मुरली कीदृशी कूजितेन तरलीकृतं धीराणामपि मानसं यया सा। राधापक्षे मुरल्या: कूजितेन तरलीकृतं धीरमपि मानसं यस्या: सा। गौरी अरुणा पक्षे पीता "गौरोऽरुणे सिते पीते" इत्यमर:। उत्तमवंशाद्वृक्षविशेषादन्वयविशेषाच्च उत्पन्ना सारेण अहीना युक्तेत्यर्थ:। त्वचिसारत्वात् महासरसी च रसिका च सगीतरसिकत्वात्। पक्षे सा राही नाम सा राधानामेति भाषाश्लेष: हासरसे परिहासरसे तत्कर्त्तृतया तत्कर्म्मतया मधुरा माधुर्य्यवर्षिणीत्यर्थ: ॥४७॥

श्लिष्टमथमवगम्याह हलेति कस्माद्धससि इति त्वयेदं श्लेषेण हास्यमात्रं क्रियते मयि तद्याथार्थ्यमालक्ष्येति भाव:। मन्दभागिनाप्यनेन जनेन आत्मानं प्रणयिजनानां प्रसादात् तन्मुखमण्डलं द्वित्रि वारमपि दृष्टमस्ति तथापि प्रकृतिमादकेन तेनापूर्व्वेण तस्य माधुरीमधुना हृदयं उन्मथ्य तथा सर्व्वं विस्मार्य्यते। यथा प्रणिधानेन प्रेक्षणमपि दुर्ल्लभम् ॥४८॥

श्लाघ्यते कलिलकेली-काकलीति पद्येन व्यञ्जितमेवार्थं संप्रत्यति-

वरेण्यं मन्येथा: सखि तदखिलानां सुजनुपाम्।
तपस्तोमेनोच्चैर्यदियमुररीकृत्य मुरली
मुरारातेर्विम्वाधरमधुरिमाणं रसयति।

प्रविश्य वृन्दा। ललिते कथं कथाभिनिवेशेन संरब्धहृदया: शत्रुध्वजवेदिपदवीमधिरोहन्तमप्यात्मानं न जानीथ यूयम्। ४९॥

सर्व्वा:। (परावृत्य) सहि सच्चं कधेसि। जं गोअड्ढणो पुट्ठदो संवुत्तो। ता डाहिणे गोइन्दकुण्डवट्टणीं अणुवट्टम्भ। (इति तथा कुर्व्वन्ति।

वृन्दा। अपवार्य्य, चम्पकलते पश्य पश्य ॥५०॥

ध्रुवं निखिलमाधवप्रणयिनीकदम्वादलं
विकृष्य विविधं विधिर्मधुरिमाणमत्यद्भुतम्।
प्रभो: परमतुष्टये निरमिमीत राधां मुदा
यदत्र रमते हरि: परिहृतान्यनारीस्पृह: ॥५१॥

राधा। (दक्षिणत: प्रेक्ष्य,) अम्महे माणसगङ्गाएउप्फुल्ले कमलकलावे रोलम्बानं काअलीकलअलस्स कोमलदा ॥५२॥

तारतम्येनाभिधयैवाह तपस्याम इति विम्वाधरं उररीकृत्य अत्र प्रकरणे सर्व्वत्र कान्तविश्लेषेण जनितमौत्सुक्यमेव सञ्चारी तदप्राप्तिकारणस्य स्वायोग्यत्वस्य कल्पनया दैन्यं च स्थायिभावोऽनुराग एव अप्राणिन्यपि जन्मलालसा तस्यानुभाव: अतिशयेन सवद्धहृदया: ग्रस्तमनस: ॥४९॥

यद्गोवर्द्धन: पृष्ठत: संवृत्त:। तद्दक्षिणे गोविन्दकुण्डवर्त्तिनीं अनुवर्त्तामहे वर्त्तनीं पस्थानम् ॥५०॥

परिहृतान्यनारीस्पृह इति सर्व्वमाधुर्य्यस्यैकत्र लाभादिति भाव: ॥५१

अहो मानसगङ्गाया उत्फुल्ले कमलकलापे रोलम्बानां भ्रमराणां काकलीकलकलस्य कोमलता ॥५२॥

वृन्दा । (साकूतम्) ।

सरोजानां पुञ्जे मदकलममुं पश्यत पुरः
परागैरापिङ्गैः स्फुरदधरकायं मधुकरम् ।
मुहुर्भ्रामं भ्रामं भ्रमररमणीयैः सरभसं
निरुद्धानो ध्वानोद्धतिविधूतमूर्द्धा विहरति ॥५३॥

राधा । (स्वगतं) णुणं वुन्दाए किम्पि हियए कदुअ एदं वाहरी अदि । (प्रकाशम्) । हला वुन्दे धण्णा ओ कुसुमकीड़ ओ । जा ओ कान्तेण समं किलन्ति मन्दभाइणीण उण इमाणं सूरोवासीणीणं दूरादो क्खणं वितस्स पेक्खणं सुदुल्लहत्ति । ५४॥

(संस्कृतेन) ।

भवतु माधवजल्पमशृण्वतोः श्रवणयोरलमश्रवणिर्मम ।
तमविलोकयतोरविलोकनिः सखि विलोचनयोश्च किलानयोः॥५५॥

मदकलं मत्तं अपिङ्गैः सम्यक् पीतैः स्फुरन् अधरकायः कायस्योत्तरभागो यस्य अत्र पराग – मधुकर–भ्रमररमणी–निरोध-ध्वानोद्धत्यपदेशेन पीतवसन–कृष्ण–गोपरमणी–निरोध मिथो वाक्कलयो भाविनोऽर्था ज्ञाप्यन्ते इत्युपन्यासोऽयं सप्तस्वङ्गेपु प्रथममङ्गम् । यदुक्तम्–उपन्यासः प्रसङ्गेन भवेत् कार्य्यस्य कीर्त्तनम् ॥५३॥

नूनं वृन्दया किमपि हृदये कृत्वा इदं व्याह्रियते । हला वृन्दे धन्याः कुसुमकीट्यः भ्रमर्य्य इत्यर्थः । याः कान्तेन समं क्रीड़न्ति मन्दभागिनीनां पुनरासां सूर्य्योपासिनीनां दूरात् क्षणमपि प्रेक्षणं दुर्ल्लभं तेन धर्म्मकर्म्ममूढ़ायाः कीटजातेरपि मनुष्यजातिरियं देवपूजापरापि दुर्भगेति द्योतितम् ॥५४॥

अश्रवणिर्वाधिर्य्यं अविलोकनि रान्ध्यं आक्रोशे नञ्यनि रित्यनिः, विन्यास नाम द्वितीयमङ्गमिदम् । यदुक्तं "निर्व्वेदवाक्यव्युत्पत्ति-विन्यास इति कीर्त्यते" इति ॥५५॥

वृन्दा । सखि राधे रात्रिन्दिवं दिव्यलीलया दीव्यसि तथापि कथ निर्व्विद्य खिद्यसे ॥५६॥

ललिता । हला राहे कधं मन्थरा विअ लक्खीयसि ।

वृन्दा । हैयङ्गवीनमृदुला त्वमतः कथम्वा
हैयङ्गवीनकलसीं चलिता वहन्ती ।
हा मल्लिकार्पणपदं व्यथते शिरस्ते
मूर्द्धन्यमुं मम निधेहि कृपां विधेहि ॥५७॥

राधा । सहि कलसीअ भारो ण मं मन्थरावेदि । पेक्ख भूरि भूसणाणं च्चेअ जाइ णिआरिदाए पसहं अप्पिदाइम् ॥५८॥

विशाखा । हला राहि क्खणं चिट्ठु सुट्ठु उद्धारेमि मण्डणभारम् । (इति यथार्हमुत्तारयति) ॥५९॥

रात्रिन्दिवमित्यादिकं वृन्दावचनं मिथ्या – कल्पितत्ववुद्ध्या प्रत्युत्तरादानेनावगणितम् ॥५६॥

राधे कथं मन्थरा इव लक्ष्यसे । भारश्रमजनितमेव मान्थर्य्यमनुमिमाना वृन्दाह हैयङ्गवीनेति मल्लिकार्पणस्यापि पदं स्थानं सत् तव शिरो व्यथते कृपां विधेहीति त्वद्दुःखदर्शनमेव मम महद्दुःखं तदपाकुर्व्विति भावः ॥५७॥

कलसस्य भारो न मां मन्थरयति विप्रयज्ञोपयोगित्वेन तत्श्रद्धया उत्साहाधिक्यादिति भावः । गव्यभारशुल्कग्रहणोपाधिकस्य कृष्णकर्त्तृकमन्निरोधस्यात्यभिलपणीयत्वादिति रहस्योद्भवः पश्य भूरिः भूषणानामेव यानि निवारितयापि ललितया प्रसभं हठात् अर्पितानि स्वसौन्दर्य्य–सौकुमार्य्याभ्यां तेष्वरोचकतेति ध्वनिः ॥५८॥

सखि राधे क्षणं तिष्ठ सुष्ठु उद्धारयामि मण्डनभारमुत्तारयामीत्यर्थः ॥५९॥

वृन्दा । त्रपते विलोक्य पद्मा ललिते राधां विनाप्यलङ्कारं तदलं
मणिमयमण्डनमण्डलरचनाप्रयासेन ॥६०॥

राधा । हला वुन्दे एत्थ जण्णे हेअङ्गवीणोवहारिणीणं हरिणी-
णेत्ताणं सव्वङ्गारहस्स मण्डणउलस्स मुणिजणादो उवलद्धी
सुणीअदि ॥६१॥

वृन्दा । न केवलं मण्डनकुलस्यैवोपलब्धिः किन्तु क्रियारम्भएव निजा-
भीष्टानामपि । तदेभ्यः प्राञ्जलमञ्जलिः क्रियतां कामदेभ्यः
शैलेन्द्रतीर्थेभ्यः । (इति सर्व्वास्तथा कुर्व्वन्ति) ॥६२॥

चम्पकलता । सहि चित्ते अदिचित्ता एसा णिहिलजीअमण्डली-
कुण्डिआकुलालस्स पुण्डरीअजोणिणो कुण्डेण मण्डिदा
गिरिन्दसिहरत्थली डाहिणे रेहदि ॥६३॥

राधाया भूषणपरिधापनं ललितया विपक्षरमणीमुखमोटनमात्र तात्पर्य्यकं तच्च तद्विनापि स्वतःसिद्धमित्याह त्रपत इति पद्मा चन्द्रासखी त्रपते स्वसख्यास्तादृशसौन्दर्य्यादर्शनादिति भावः ॥६०॥

अत्र यज्ञे हैयङ्गवीनोपहारिणीनां हरिणीनेत्राणां सर्व्वाङ्गा-र्हस्य मण्डनकुलस्य मुनिजनादुपलब्धिः श्रूयते तेन प्रकृतिमण्डन-कुलस्येदानीमुत्तारमेवोचितं कृपया ब्राह्मणैर्दास्यमानानां अति-सौभाग्यसाधकत्वात् तदानीमेव श्रद्धया धारणेन भारत्वमिति भावः ॥६१॥

क्रियया यज्ञिय-हैयङ्गवीनोपहरणरूपाया आरम्भ एव गमनकाल एवेत्यर्थः । तत्तस्मादेभ्यो ब्रह्मकुण्डादिभ्यः प्राञ्जलं प्रकटं अभीष्टप्राप्त्य-न्तरायविघातार्थमपि अञ्जलिः क्रियताम् । धृतकनकघटत्वेन शिरसा नमस्कर्त्तुमशक्यत्वात् अञ्जल्यैव नमष्क्रियतामिति भावः । कामदेभ्य इति एष्वेव स्थानेषु भवतीनामभिलषणीयकामविलासो भावि नाति-दुर्ल्लभ इति सूचितम् ॥६२॥

सखि चित्रे अतिचित्रा एषा निखिलजीवमण्डलीकुण्डिकाकुला-

चित्रा । सहि इध ज्जेव्व भत्ताणं वच्छलो हरिराअ णामा णारा-
यणो वसेदि ॥६४॥

वृन्दा । (पश्य पश्य)

सखि वहुलशिरस्त्वे भूभृतौ चेह साम्य
दधदपि गिरिरश्चत्येष शेषाद्विशेषम् ।
अघरिपुरयमङ्के मूर्द्ध्नि यस्योदरे च
प्रणयति रतिलीलामद्भुतां प्रेयसीभिः ॥६५॥

ललिता । (राधामवेक्ष्य संस्कृतेन)

निविड़रुचिनि गण्डग्रावखण्डे गरिष्ठे
सुरभिणि किर दृष्टिं गौरि गोवर्द्धनस्य ।
सखि मृगमदपङ्कैः सुष्ठु यत्रोपविष्ट-
स्त्वदुरसि रसिकेन्द्रः पत्रवल्लीमलेखीत् ॥

चम्पकलता । (जनान्तिकम् । संस्कृतेन)सखि समाकर्ण्यताम् ॥६६॥

लस्य पुण्डरीकयोनेर्ब्रह्मणः कुण्डेन मण्डिता गिरिन्द्रशिखरस्थली-दक्षिणे राजते । ६३॥

इत एव भक्तानां वत्सलो हरिरायनामा नारायणो वसति ॥६४॥

वहुलशिरस्त्वे प्रचुरफणत्वे वहुशृङ्गत्वे च । अयं अघरिपुः श्रीकृष्णः पूर्णः तस्य तुला नारायणोऽंश एव अस्य तु अङ्कादौ तस्य तु भोगेष्वेव उदरे कन्दरादौ तस्य तु उदराद्बहिरेव रतिलीलां तस्य तु शयनमात्रं प्रणयति प्रीणयति स प्रणयं करोति मात्रं प्रेयसीभिस्तस्य तु कथञ्चिदेकया पादसम्वाहिकया पद्मयैवेति शेषात् विशेषं अञ्चति प्राप्नोति तेनैतत्कन्दरादावेवाद्य रतिलीलाभाविनीति सूच्यते ॥६५॥

तत्रासम्भावनानिरासेन राधामाश्वासयितुं पूर्व्ववृत्तां रतिलीलां स्मारयन्ती ललिताह निविड़ेति किर निक्षिप पत्रवल्लीमलेखीदिति तथैवाद्यापि लिखिष्यतीति विश्वस्ता भवेति भावः । अन्योन्यमन्त्रणं यत् स्यात्तज्जानन्ति जनान्तिकम् ॥६६॥

अयमुपरि परिस्फुरद्बलाकातनिरनुसञ्चलच्चञ्चलाविलासः ।
अचलशिरसि नीलमण्डपस्य द्विगुणयति द्युतिमम्बुदः स्वधाम्ना ॥६७

ललिता । (सानन्दम्) । चम्पअलदे ण क्खु अम्बुदो पेक्ख , एसो कण्ठलम्बि विप्फारहारो पीताम्बरो गिरिणिदम्बं आलम्बदि । ता पुप्फिदो अम्भाणं मणोरहसाहो ।

राधा । (वृन्दामवेक्ष्य सकम्पं संस्कृतेन) ॥६८॥

उरीकुर्व्वन् गौरीं गिरिशिखरभागम्बररुचि
जगद्वंशे युञ्जन् मदनघनघूर्णाघुणघटाम् ।
धृतिध्वान्तं भिन्दन्नमृतनिधिरिन्दीवरदृशां
दृशां बन्धुः कोऽयं विधुरिव पुरस्तादुदयते ॥

वृन्दा । सखि राधे समाकर्ण्यताम् ॥६९॥

समस्तजगतीभुवां मृगदृशामभीष्टाशिषः
समर्थमभिपूरणे किमपि दोलयन् दोर्युगम् ।

वलाका वकपङ्क्तिः चञ्चला विद्युत् अम्बुदो मेघ इति क्रमेण हार-पीताम्बर श्रीकृष्णेष्वारोपिताः ॥६७॥

चम्पकलते न खल्वयमम्बुदः पश्य एष कण्ठलम्बिविस्फारितहारः पीताम्बरो गिरिनितम्बमालम्बते । तत्पुष्पितोऽस्माकं मनोरथशाखी । विरोधो नाम तृतीयमङ्गमिदम् । यदुक्तम् – भ्रान्तिनाशो विरोधः स्यादिति ॥६८॥

गिरिशिखरभाक् सन् अम्बररुचिं आकाशस्य कान्तिं गौरीं शुक्लां उरीकुर्व्वन् । पक्षे वस्त्रकान्तिं गौरीं पीतां जगदेव वंशस्तत्र मदनघूर्णैव घुनः तत्समूहः पक्षे चन्द्रिकास्पर्श एव वंशजातौ घुन उत्पद्यते इति लोकप्रसिद्धेः । अत्र मदनघूर्णेत्युन्मादः , धृतिधान्तमिति चापल्यम् , दृशां बन्धुरित्यौत्सुक्यमिति सञ्चारिभावत्रयम् ॥६९॥

मदनवेदनया उन्मादनमेव व्रत तदेव प्रणयितुं शीलमस्य तेन

असौ कुलजवल्लवीमदनवेदनोन्मादन-
व्रतप्रणयिनोरसा रसिकमौलिरुद्भासते ॥७०॥

राधा । (सविस्मयं संस्कृतेन)

प्रपन्नः पन्थानं हरिरसकृदस्मन्नयनयो-
रपूर्व्वोऽयं पूर्व्वं क्वचिदपि न दृष्टो मधुरिमा ।
प्रतीकेऽप्येकस्य स्फुरति मुहुरङ्गस्य सखि या
श्रियस्तस्याः पातुं लवमपि समर्था न दृगियम् ॥७१॥

वृन्दा । यदा यदा पश्यसि माधवं पुर-
स्तदा तदैवास्य वदस्यपूर्व्वताम् ।
नवः सदा स्यात् किमयं तवाथ वा
रागोन्मदे विस्मयतः किमक्षिणी ॥

(ततः प्रविशति मधुमङ्गल--सुवलार्ज्जुनादिभिरुपास्यमानो नान्दीमुखीमभिपृच्छन् कृष्णः) ॥७२॥

कृष्णः । (सौत्सुक्यम्) ॥

गोवर्द्धनगिरिमुपेत्य कटाक्षवाणान्
कर्णस्फुरन्मणिशिलोपरि संक्ष्णुवाना ।

उरसा वक्षसा इति वक्षःस्थलं दर्शयति ॥७०॥

असकृदनुवारमेव नयनयोः पन्थानं प्रपन्न एव एकस्याप्यङ्गस्य प्रतीके एकस्मिन्नवयवेऽपि या श्रीः स्फुरति तस्याः श्रियः शोभायाः लवं लेशमपि पातुमियं दृङ्मदीया न समर्था तेन तया शोभालव-उत्तरङ्गया उपचितया मुहुर्विप्लुतेयं पातुमसमर्था व्याकुलायते इति भावः । अयमनुराग एव सदानुभूतवस्तुनोऽप्यननुभूतत्वमननमयः ॥७१

नवः सदा स्यादिति रागोन्मद इत्याभ्यां तस्य नित्यनवत्वं अस्या अप्यनुरागित्वं पूर्णमेवोक्तम् । अथवेत्यनेनैकस्यापि सम्भवे शश्वत् तथा भानं भवेत् किमुत द्वयोरिति द्योतितम् ॥७२॥

क्वा भ्रूधनुर्धुवनसूचितलुञ्छनेयं
व्यग्रीकरोत्यहह मामपि सम्भ्रमेण ॥७३॥

(पुनर्निरूप्य) हन्त कथं सैव मदीयहृद्विटङ्कालङ्कारपारावतीयं प्रिया । (इति नान्दीमुखीमभिनन्दन्)

तारश्रिया मूर्च्छितवल्गुरागा विस्तारयन्ती श्रुतिपालिभूषाम् ।
कलाञ्चिता हन्त मयोपलब्धा स्वराधिकेयं परिवादिनीव ॥७४॥

नान्दी । गोउलानन्द तुम्भ पासे चिट्ठन्तीं मां जाव इमाओ ण पेक्खन्ति क्खणं ताव पच्छण्णा होमि इति तथास्थिता ॥७५॥

कर्णे स्फुरन्ती या मणिशिला कुण्डलगता तस्या उपरि संक्नुवाना तेजयन्ती मद्धृदयमेव लक्षीकृत्य व्यद्धुमिति भावः । तत्प्रयोजनं स्वयमेवोन्नयन्नाह भ्रूधनुः कम्पनमात्रेणैव सूचितं लुञ्छनं मत्सर्व्वस्वापहरणं यया सा अतो मद्धैर्य्यधनं प्रत्यक्षमेव वनमध्ये वलाद्धरिष्यन्तीयं वा जनिमत्-फुत्कारशङ्कया प्रथमं वाणांस्तेजयति किञ्च तत्तेजनं दर्शयन्त्येवेयं मामपि सर्व्वजगद्धैर्य्य-सर्व्वस्वहारिणमपि व्यग्रीकरोति तैर्विद्धयन्ती सती किं करिष्यति तन्न जाने इति भावः ॥७३॥

विटङ्कः कपोतपालिका परिवादिनी सप्ततन्त्री वीणेव स्वराधिकेयमुपलब्धा । पक्षे स्वरैः षड्जाद्यैरधिका तारो मुक्ताहारः उच्चशब्दश्च तस्य श्रिया शोभया सम्पत्त्या च मूर्च्छितः वर्द्धितः एकविंशतिमूर्च्छनाप्रापितश्च । वल्गुः शोभनो रागोऽभिलाषो वसन्तादिरागश्च यस्यां सा श्रुतिः पाल्याः कर्णप्रदेशस्य "पालिः कर्णलताग्रे चे"ति मेदिनी । द्वाविंशतिश्रुतिसमूहस्य च भूषां विस्तारयन्ती कलाभिः कलेन मधुरास्फुटध्वनिना च अञ्चिता पूजिता तारश्रिया नयनकनीनिकाशोभया सूचितानुरागा इति वा ॥७४॥

गोकुलानन्द युष्मत्पार्श्वे तिष्ठन्तीं मां यावदिमा न प्रेक्ष्यन्ते क्षणं

कृष्णः । हन्त सखायस्तूर्णमाध्मायतां भवद्भिर्महावट्टाभिकाराभिव्यञ्जकं शृङ्गादिवादित्र मयापि विम्वाधरे वंशी निधेया । (इति सर्व्वे तथा कुर्व्वन्ति)॥

वृन्दा । (स्वगतम्) । कथमेताः केलिमुरलीरवाकर्णनेन विघूर्णित-मुर्द्धानस्तरून्मुहुर्धारयन्ति (इति समन्तादवलोकयन्ती) ॥

वेणोरेप कलस्वनस्तरुलताव्याजृम्भणे दोहदं
सन्ध्यागर्जभरः पिकद्विजकुहुस्वाध्यायपारायणे ।
आभीरेन्दुमुखीस्मरानलशिखोत्सेके सलीलानिलो
राधाधैर्य्यधराधरेन्द्रदमने दम्भोलिरुन्मीलति ॥७६॥

कृष्णः । (राधायामपाङ्गं निक्षिप्य सानन्दम्) ।

वक्त्राम्भोजमुदात्तनर्म्मवचसा सख्यं विनिर्म्मित्सते
मैत्रीं भंगुरवीक्षितेन नयनद्वन्द्वं क्रमादीप्सति ।

तावत् प्रच्छन्ना भवामि स्त्रीयसूचकता दोषाच्छादनार्थमिति भावः ॥७५॥

दोहदं औषध-विशेषः । दम्भोलिर्वज्रः । तर्व्वादीनां यथाक्रमं हर्षमौनौत्सुक्यचापल्यानि कुर्व्वन्नपि आकाशादीनां इव पूर्व्व-पूर्व्वधर्म्माणामुत्तरोत्तरेषु सम्भाराद्राधाया हर्षादीनि चत्वार्य्येव युगपदेव विस्तारयतीति भावः ॥७६॥

राधाया देहे स्मरवान्धवेन यौवनेन वयसा सह सन्धातुं सन्धिं कर्त्तुमिच्छति सति वाल्यवयसा क्रमत उपेक्षमाणत्वेन निःसहायतया स्थातुमशक्यतया विचार्य प्रवलेन प्रवलसहायेन यौवनेनैवात्मरक्षणार्थं स्वस्मिन्नधिकारं तस्मै दित्सति सतीत्यर्थः । वक्त्राम्भोजं कर्त्तृ उदात्तेन कृपौदार्य्यमाधुर्य्यादिगुणमयेन नर्म्मवचसा सख्यं स्वसर्व्वस्वार्पणेन विनिर्म्मातुं इच्छति वाल्यसहचरप्रहसित-वहु-व्यर्थालापेनोपेक्ष्यमाणत्वादिति भावः । उदात्तः स्वरभेदे वाचान्तरे दया-

लीलामन्दगतेन पादयुगमप्यारिप्सते सङ्गमं
राधायाः स्मरबान्धवेन वयसा देहेऽद्य संधित्सति ॥७७॥

राधा । (प्रयत्नादाकारगुप्तिमभिनयन्ती साचिकन्धरमपवार्य्य संस्कृतेन) ॥७८॥

कुवलययुवतीनां लेहयन्नक्षिभृङ्गैः
कुवलयदललक्ष्मी-लङ्घिमाः स्वाङ्गभासः ।
मदकलकलभेन्द्रोल्लङ्घिलीलातरङ्गः
कवलयति धृतिं मे क्ष्माधरारण्यधूर्त्तः ॥

कृष्णः । (शृङ्गादवरोहणं नाटयन् राधामालोक्य सानन्दम्)॥७९॥

त्यागादि युक्ते चेति मेदनी । तथैव भंगुरवीक्षितेन ऋज्ववलोकनस्य प्रोषितत्वादिति भावः । मैत्रीमीप्सति प्राप्तुमिच्छति आरिप्सते आरब्धमिच्छति लीलामन्दगतेनेति द्रुतचपलस्य सहसा तिरोधानादिति भावः ॥७७॥

अपवार्य्येति अन्यस्य रहस्यकथनं तदनाकर्णितमपवारणम् । यदुक्तं "रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारितमि"ति ॥७८॥

कुवलयं भूमण्डलं तत्रत्यानां युवतीनामक्षिण्येव भृङ्गास्तैः स्वाङ्गभासो निजाङ्गशोभा लेहयन् स्वादयन् कीदृशीः कुवलयस्य नीलोत्पलस्य दलानां लक्ष्मीतोऽपि लङ्घिमा मनोहरत्वं यासां ताः । "अना वहुव्रीहाविति डाप्" । तत्र गतिबुद्धीत्यादिना न कर्म्मत्वं लिहेरास्वादनार्थत्वेऽपि प्रत्यवसानार्थताभावात् प्रत्यवसानस्य गलाधःकरणार्थत्वात् । लेहनस्य तु तदविना भावस्याभावात् यथा गोभिर्वत्सा लेलिह्यमाना अभूवन् । अत्र त्वर्थान्तरसंक्रमितवाच्यध्वनिनैव तथात्वं वस्तुतस्तु अक्षिपक्षे गलाधःकरणस्य प्रसङ्ग एव नास्ति भृङ्गपक्षेऽपि नीलोत्पलदलशोभानां न तथा करणं किन्तु सौरभ्यवहनमात्रमपि मे धृतिं कवलयति न पुनर्मय्येव दोष इति भावः ॥७९॥

स्थूले राधिकया पयोधरयुगे हारः प्रसादीकृतः
ख्याते वालतया कचे च कुटिले मौलिर्वितीर्णोऽनया ।
विन्यस्तं श्रुतिसेविनोरपि मसीमालिन्यमेवानयो-
रित्यक्ष्णोर्द्वयमीर्ष्यया मृगदृशः सङ्के मुमोचार्जवम् ॥८०॥

ललिता । (अपवार्य्य) । हला राहे ओअरदि एसो हठिल्ल दारहडो वणिज्जा महासत्थवाहणाहो । ता अपेक्खन्तीओ विअ सविसम्भं चलम्भ ॥८१॥

राधा । सहि लहु लहु जाहि जं एसा फुड़िदोवलमण्डलावन्धुरा वसुन्धराधरतड़ी । (इति सदृष्टिक्षेपं परिक्रामति) ८२॥

कृष्ण । सखे सुवल कथमस्मानवमत्य चलितुं प्रवृत्ता एव सलीलममूरमूकमञ्जीरा मञ्जुभाषिण्यः । ततस्तूर्णमर्ज्जुनेन सार्द्धममूषां घटस्व व्याघोटनाय ॥८३॥

स्थूले स्थौल्यवति श्लेषेण जड़े । त्रिपु स्थूले जड़ेपि चेत्यमरः । मौलिश्चूड़ामणिः । श्रुतिसेविनोः कर्णपर्य्यन्तगामिनोः श्लेषेण वेदाभ्यासरतोः ॥८०॥

अवतरत्येष हठिलतारभटो वाणिज्यमहासार्थवाहनाथः तस्मात् अप्रेक्ष्यमाणा इव वयं सविश्रम्भं चलामः । अन्यथाऽस्यावज्ञायां व्यञ्जितायां तां स्वविषयां ज्ञात्वाऽस्मानयनमधिकमुद्वेजयिष्यति इति भावः । इवेति प्रेक्षणस्य तदविज्ञातमात्रत्वस्य विवक्षया ॥८१॥

सखि लघु लघु याहि यदेषा स्फुटितोपलमण्डलीवन्धुरा वसुन्धराधरतटी ॥८२॥

अमूकमञ्जीरा इति महादानि महाराजस्य ममाग्रे वादित्रवादनपूर्व्वकमासां गमनं स्वमहागर्व्वं मदनादरं च सूचयतीति भावः । व्याघोटनाय परावर्त्तनाय ॥८३॥

सुबलः । (सत्वरं साज्जुर्नः परिक्रम्य) । हन्त सगव्वा ग्रो गव्वविक्कग्रणी ग्रो कहं घट्टचत्वरनाहं ग्रनादरन्ती ग्रो स्वच्छन्दं गच्छन्ति होदी ग्रो । ता वाहुड़िग्र सुट्ठु णं पवोहेन्तु ॥

सव्वीः । (प्रकाममश्रुतिमभिनीय सावहेलं चलन्ति) ।

सुवलः । (धावन्नुच्चैः) । हंहो ग्रप्पणो माहाप्पं मा हरेध तूरणं परावट्ठेध ॥८४॥

सव्वीः । (सनिर्वेदमिव परावृत्य) भोः पुट्ठमांसाद कधं तुए परावट्टिदह्म ॥८५॥

सुवलः । पढ़मं दाव क्खोणी विलग्गमत्थग्रा वन्दन्तु महाघट्टदानिन्दं होदी ग्रो । ८६॥

विशाखा । (सस्मितं) किं वन्दणारिहो ण होदि वल्लईन्दनन्दनो । किन्तु लोग्रोत्तरस्स जण्णस्स हेग्रङ्गवीणोवहरणे ग्रारब्धव्वदाणं ग्रह्माणं वम्भणेदरवन्दणं भग्रवदीए णिसिद्धम् ॥८७॥

हन्त सगर्व्वा गव्यविक्कयिण्यः कथं घट्टचत्वरनाथं ग्रनाद्रियमानाः । स्वच्छन्दं गच्छन्ति भवत्यः । तस्माद्व्यावृत्त्य सुष्ठु नोऽस्मान् प्रवोधयन्तु ग्रहो ग्रात्मनो माहात्म्यं माहरत तूर्णं परावर्त्तयत ॥८४॥

भोः पृष्ठमांसाद कथं त्वया परावर्त्तिताः स्मः । क्रूराभिधायो पुरुषः पृष्ठमांसाद उच्यते ॥८५॥

प्रथमं तावत् क्षौणीविलग्नमस्तकाः सत्यः वन्दन्तां महाघट्टदानीन्द्रं भवत्यः । ८६॥

किं वन्दनार्हो न भवति वल्लवेन्द्रनन्दनः किन्तु लोकोत्तरस्य यज्ञस्य हैयङ्गवीनोपहरणे ग्रारब्धव्रतानामस्माकं ब्राह्मणेतरवन्दनं भगवत्या पौर्णमास्या निषिद्धम् । साध्वसं नाम चतुर्थमङ्गमिदम् । यदुक्तं "मिथ्याख्यानन्तु साध्वसमि"ति ।८७॥

ग्रज्जुर्नः । विसाहे एसो वुन्दाग्रणभूविन्दार ग्रो ग्रह्म महादाणन्दो विदाणिं ग्रारब्धव्वदा वट्टदि । ता व्वदिणीहिं व्वदिणोऽस्स वन्दणे दूसणं नत्थि ॥

ललिता । कोदिसं तं व्वदम् ॥८८॥

कृष्णः । (सस्मितम्) नित्यमवलार्ब्बुदद्विजवसनदानं महाव्रतम् ॥८९॥

ललिता । तदो जुत्ता एसा घट्टहिग्रारिदा । ज इदिसोए महापग्रवीए समारोहणं विणा णिग्र महाव्वदस्स रक्खणं दुक्करम् ॥

कृष्णः । (विहस्य पुरः पश्यन्) सखे मधुमङ्गल श्रूयताम् ॥९०॥

ग्रभ्युक्ष्य निष्कं पतयालुना मुहुः
स्वेदेन निष्कम्पतया व्यवस्थिता ।

एष वृन्दावनभूवृन्दारकोऽस्मन्महादानीन्द्रोऽपि इदानीमारब्धव्रतो वर्त्तते तद्व्रतिनोभिर्व्रतिनो वन्दने दूषणं नास्ति ॥८८॥

नित्यमवलेति ग्रवलेभ्यो वस्त्राद्युपार्जनाऽसमर्थेभ्योऽर्ब्बुदसंख्यविप्रेभ्यो वसनप्रदानम् । पक्षे ग्रवलार्ब्बुदानां दशकोटिसंख्ययुवतीनां द्विजवसनानां ग्रोष्ठाधराणां दानं खण्डनं ग्रोष्ठधरौ तु रदनच्छदौ दशनवाससी इति दन्तविप्राण्डजा द्विजा इत्यमरः दो ग्रवखण्डने ॥८९॥

ततो युक्ता एषा घट्टाधिकारिता यत् ईदृश्या महापदव्याः समारोहणं विना निज महाव्रतस्य रक्षणं दुष्करम् । पुरग्रामादौ भव्यजनसमाजे पराङ्गनार्ब्बुदधर्षणस्य दुःशक्यत्वात् इति भावः ॥९०॥

ग्रधरखण्डनश्रवणेनोद्बुद्धस्मरविकारां राधां जानन् तत्सखोस्तथाभूतस्वज्ञानं ज्ञापयन्नपि तदात्वोचितामवहित्थामालम्बमानः पृच्छति । ग्रभ्युक्ष्येति निष्कं पदकं ग्रभ्युक्ष्य पतयालुना पतनशीलेन स्वेदेन तथा निष्कम्पतया स्तम्भेन च विशेषेण ग्रवस्थिता विशिष्ट-

पञ्चालिका कुञ्चितलोचना कथं
पञ्चालिकाधर्म्ममवाप राधिका ॥६१॥

मधुमङ्गलः । (कृष्णस्य कर्णे निभृतोक्तिमुद्रामभिनयन्नुच्चैः)
भोः पिअवअस्स दिट्ठिआ वड्ढसे पेक्ख गव्विदसहीसहिदा
सज्झसेन खम्भिदा राही ॥६२॥

वृन्दा । (सस्मितम्) ।
मृगाधिपतिमध्यमः कठिनपीवरक्रोड़भाक्
भुजङ्गमभुजद्वयस्त्वमसि पुण्डरीकेक्षणः ।
अतः कथय साध्वसं न भवतः कथं विन्दता-
मसौ पुरुषकुञ्जर प्रकृतिभीरुरेणेक्षणा ॥६३॥

त्यर्थः । तस्याः औत्सुक्योत्थं जाड्यं जानन्नप्यपह्नुत्य साध्वसत्वं बोधयन्नाह पञ्च आल्यः सख्यः यस्याः सा इति वृन्दाप्येका सखी तया सहैकीकृत्योक्तिः ससहायापि प्रथमं कुञ्चितलोचना भीता ततः पञ्चालिका-धर्म्मं पुत्तलिका-स्वभावं कथं अवाप व्रीड़ोत्थमपि लोचन-कुञ्चनं भयोत्थत्वेन प्रकाशितम् । "पञ्चालिका पुत्रिका स्यादि"त्यमरः ॥६१॥

निभृताया उक्तेर्मुद्रामेव नतूक्तिमित्यर्थः । तया तु एषा त्वां महादानीन्द्रं वञ्चयित्वा वहुद्रव्याणि नीत्वा गच्छतीति साध्वसादनुमीयते इति चौरस्य लक्षणमेवैतदिति तत् सखीं ज्ञापयति प्रियवयस्य दिष्ट्या वर्द्धसे इति तया अन्वेषणीयं लक्षणं इयं साध्वसेनैव प्रकटीकरोतीति भावः । यतः सखी सहितापि साध्वसेन स्तम्भिता ॥६२॥

वृन्दा सस्मितमिति तदवहित्था ज्ञानसूचकं स्मितं, मृगाधिपतिः सिंहः, क्रोड़पक्षे वराहः, पुण्डरीकेक्षणः पक्षे व्याघ्रेक्षणः, व्याघ्रेऽपि पुण्डरीको ना इत्यमरः। एणेक्षणेति अस्या दृग् हरिणी सिंहादीन् दृष्ट्वा विभेति तेन च तव मध्याङ्गादि माधुर्य्यमेव एतद्दृशास्वादितमेव तत्

ललिता । ललिदापालिदाणं गोआलिआणं कहिंवि भअसद्दो वि कण्णकुहरं ण गदो । तहवि इमस्स गोउल रक्खणव्वदस्स अह्मराअकुमरस्स पुरदो कीदिसं भअं णाम ।६४॥

कृष्णः । ललामाङ्गि ललिते ललितं ब्रवीषि । तदिमां सखीमण्डलेन सार्द्धं पाण्डुरशिलामध्यास्य समुदाचारमवधारय ॥६५॥

ललिता । गोउलजुअराअ पेक्ख आरोहदि भअवन्तो चण्डमऊहो गअणमण्डलं ता आपुच्छन्तु तुमं तुरिअं जण्णमण्डवोवलम्भणस्स ॥

कृष्णः । (भ्रुवोराघूर्णेन मधुमङ्गलं व्यापारयति) ॥६६॥

मधुमङ्गलः । ललिदे अज्ज तुह्माहिन्तो सुलुक्कं गेह्निदुं ण क्खु जुत्तम् । जं सङ्गवे हेअङ्गवभारभंगुरमज्झमा ओ अप्पसि-

---

स्वादनोत्थ एवासौ विकार इति द्योतितम् ॥६३॥

ललितापालितानां गोपालिकानां कस्मिन्नपि भयशब्दोऽपि कर्णकुहरं न गतः तत्राप्यस्य गोकुलरक्षणव्रतस्यास्मद्राजकुमारस्य पुरतः कीदृशं भयं नाम ॥६४॥

हे ललामाङ्गि भूषिताङ्गि इति वहुविधभूषणपरिधानस्यैवायं गर्व्वः तद्गर्व्वखण्डनाय मया स्वहस्तेनैव भूषणाण्युत्तारितान्यद्य भविष्यन्तीति भावः । यद्वा हे ललामाङ्गि आसां राधादीनां तवाङ्गमेव ध्वजभूतं तदद्य तवोत्कर्षाऽसहिष्णुना महादानिना मया शुल्कार्थमेव धर्षितं भविष्यतीति भावः । "ललामं पुच्छ पुण्ड्राश्व भूषा प्राधान्यकेतुष्व"त्यमरः ॥६५॥

गोकुलयुवराज पश्य आरोहति भगवान् चण्डमयूखो गगनमण्डलं तस्मादापृच्छेमहि त्वां त्वरितं यज्ञमण्डपोपलम्भनस्य ॥६६॥

ललिते अद्य युष्मत्तः शुल्कं गृहीतुं न खलु युक्तं यत् सङ्गवकाल एव हैयङ्गवीन-भारभर-भंगुर-मध्यमा आत्मस्निग्धा भवत्यो घट्टे

णिद्धा ओ होदी ओ घट्टे आअदुअ वट्टन्ति। ता रित्ततुण दूसण णिवारणात्थं किम्पि थोअं अणुमणिणअ जहसोक्खं जान्तु ॥९७

विशाखा। अम्महे आदिट्ठपुव्वं हि क्खु गोअड्ढणे घट्टदाणम् ॥

कृष्ण:। विशाखे सत्यं व्याहरसि, भवद्विधा खलु कथ द्रक्ष्यन्ति, यदद्यापि पश्यन्त्योऽपि न पश्यन्ति ॥

ललिता। (जनान्तिकम्)। हन्त सही ओ पढ़मं सामघट्टना ज्जेव्व जुत्ता ॥९८॥

सर्व्वा:। (सुट्ठु भणासि)।

ललिता। (सप्रश्रयमभ्युपेत्य)। गोउलाणन्दण एक्कग्गामवासिसु विसुद्धपइदीसु मादिसजनेसु ण जुत्तं किर सुसिलो अस्स सल्लो-अमउलिणो तुह्मादिसस्स पातिउल्लाअरणं ता अणुजाणीहि तुरिअम् ॥९९॥

कृष्ण: (सकारुण्यमिव)हन्त सुकुमारि सुष्ठु निर्व्वंधनता दुरन्तशासनेन तेनाटवीचक्रवर्त्तिनाऽत्र घोरे घट्टकर्म्मणि नियुक्तोऽस्मि किमस्वैरी करिष्ये ॥

आगत्य वर्त्तन्ते तस्माद्रिक्तत्वदूषणनिवारणार्थं किमपि अल्पं अनुमन्य यथा सुखं यान्तु अल्पार्थे थोअं शब्द:। अनुमन्य अनुमतिपूर्व्वकं दत्त्वेत्यर्थ: ॥९७॥

अहो अदृष्टपूर्व्वं खलु गोवर्द्धने घट्टदानं हन्त सख्य: प्रथमं सामघटना एव युक्ता ॥९८॥

गोकुलानन्द एकग्रामवासिषु विशुद्धप्रकृतिषु मादृशजनेषु न युक्तं किल सुश्लोकस्य सल्लोकमौलेर्युष्मादृशस्य प्रातिकूल्याचरणं तत् अनुजानीहि त्वरितम् ॥९९॥

हन्तेति अनुकम्पायां हे सुकुमारीति यथा तव अङ्गस्य सौकुमार्य्यं तथा वचनस्यापि किन्तु साम्प्रतं ममाङ्गीकृतस्यास्य घट्टकर्म-

विशाखा। किं क्खु कंसेन।

कृष्ण:। नहि नहि।

विशाखा। (तदो केण)।

कृष्ण:। क्रीड़ाकटाक्षच्छटानिर्धूतकंसादिना महामन्मथाभिधेन ॥१००॥

ललिता। अम्मो कहिम्पि ण सुणिदो एस महामम्मह णामा चक्कवट्टी ॥१०१॥

मधुमङ्गल:। (साट्टहासम्)। हो ही अच्चरिअं अच्चरिअं महामम्महो वि इमाहिं ण सुणिदो महाकड़ए पदमञ्जरी णाम जस्स राअधाणी महुमुह महाबल विजअ प्पमुहा जसस अमच्चवरा उत्तमारामावलो जस्स विहारपअम्।

कृष्ण:। किं वहुना सन्ततममी कुरङ्ग-भृङ्ग-कोकिलादयोऽपि यस्य निदेशचारिणश्चारतामङ्गी कुरुते ॥१०२॥

णस्तद्वैपरीत्यमेवेत्याह सुष्ठिवति सुष्ठु निर्व्बंधनता इति यस्तस्य निर्ब्बन्ध: स केनाप्यन्यथा कर्त्तुमशक्य इति भाव:। अस्वैरी अस्वतन्त्र:। किं खलु कंसेन। तदा केन ॥१००॥

अम्मो इति सचकिताश्चर्य्ये अहो कापि न श्रुत एष महामन्मथनामा चक्रवर्त्ती ॥१०१॥

आश्चर्य्यं आश्चर्य्यं महामन्मथोप्याभिर्न श्रुत: महाकटके प्रमदमञ्जरी नाम यस्य राजधानी। मधुमुख–महाबल–विजयप्रमुखा यस्यामात्यवरा उत्तमा रामावली यस्य विहारपदम्। राजपक्षे कटक: सेनासन्निवेश: कन्दर्पपक्षे गोवर्द्धननितम्ब: वक्ष्यमाणप्रकारेण स च महामन्मथ कृष्ण एव। अतएव राजपक्षे मधुमुखादय: स्पष्टार्था: पक्षे मधुशब्दो मुखे आदौ यस्य स मधुमङ्गल इत्यर्थ:। महाबल इति महत् सुशब्दयोरैक्यात् सुबल इत्यर्थ:। विजय स्पष्टार्थ एव उत्तमा रामावली उपवनश्रेणी पक्षे रामाश्रेणी ॥१०२॥

चम्पकलता ।(साच्छुरितम्) । ललिदे अदो दाणं अपरिहरन्तो वि वइन्दणन्दणो तुए णासुइदव्वो जं परिदो चोरचक्कवट्टिणो चरा चरन्ति ।

कृष्ण: । ललिते नीतिज्ञासि तदत्र कुम्भानवरोप्य निरूपयन्तु भवत्य: शुल्ककृत्यम् ।

विशाखा । मोहन घट्टपाङ्गणे कुलङ्गणाणं तिलं वि विलम्बणं विड़म्बणं च्चेअ ॥१०३॥

चित्रा । (सदाक्षिण्यं) गोउलानन्द तत्तं सुणाहि दिज्जन्तम्मिक अड्डिआमेत्तंवि घट्टदाणे जणिणअं घिअं असुद्धं होदि त्ति सुणिज्जइ ण उण अह्माणं पञ्च ताम्मिआदाणे का दरदा ॥१०४॥

ललिता । हला राहे इमिणा महाभारेण किलिट्ठासि ता एत्थं घट्टिअं ओदारेहि घड़िअम् । (इति सर्व्वा घट्टिकावतारणं नाटयन्ति) ॥

कृष्ण: । सखे सुवल घट्टस्याद्य प्रथमातिथिरसौ ससुहृज्जना ललिता

स्याच्छुरितं सोत्प्रासस्मितम् । ललिते अतो दानं अपरिहरन्नपि व्रजेन्द्रनन्दनस्त्वया नासूयितव्य: । यत्परितश्चोरचक्रवर्त्तिनश्चराश्चरन्ति । नीतिज्ञासीति । चम्पकलताद्या अपर्य्यालोचितभापिण्य: नीत्यनभिज्ञा न मत्प्रतिवचनार्हा इति भाव: । शुल्कं घट्टादिदेयं वस्तु । मोहन घट्टप्राङ्गणे कुलाङ्गनानां तिलमपि विलम्बनं किल विड़म्बनमेव ॥१०३॥

गोकुलानन्द तत्त्वं शृणु । दीयमाने कपर्द्दिकामात्रेऽपि घट्टाङ्गने याज्ञिकघृतमशुद्धं भवतीति श्रूयते न पुनरस्माकं पञ्चताम्रिकादाने कातरता ताम्रिका ताम्रचतुर्थांश: विंशतिकपर्द्दिका: । तस्मि अदान इति पाठे कार्पिके ताम्रिके पण इत्यभिधानादशीति: कपर्द्दिका ॥१०४

सखि राधे महाभारेण क्लिष्टासि तस्मादत्र घटिकां व्याप्य विश्रामार्थं अवतारय घटिकाम् । घट्टशुल्कार्थं एतैर्वलादेव तारणात्

तदस्या: काममपूर्व्वमाधुर्य्येण फणिवल्ली-पर्णवीटिका-पञ्चकेन माननमौपयिकम् ।

सुवल: ।(रत्नसंपुटकमुद्घाट्य)ललिदे गेण्ह पञ्च विड़िआ ओ(इत्यग्रे विन्यस्यति)

विशाखा । सुअल अलं तम्बोलेन जं कधिदं च्चेअ व्वदिणीओ अह्मे त्ति ॥१०५॥

ललिता । सुअल किं मे मुहं पेक्खसि । अविसासिणी विसाहा मह कुप्पन्ती एदं भणादि । "घट्टआलेहिं टग्गवड़िआ पउज्जीअदि" त्ति पसिद्धी सुणीअदि ; ता अल इमाणं भुअङ्गलदा पल्लवेण ॥१०६॥

मधुमङ्गल: । ललिदे विम्बोट्ठीणं अलं वो तम्बोलेण ता कल्लाणी होहि जं उव्वरिदं वीड़िआपञ्चअम् ॥१०७॥

कृष्ण: । (ताम्बूलमुपभुज्य चर्व्वितं दित्सन् सभ्रूभ्रमम्) राधे द्विज-

---

श्रमापनोदनमिषेण अस्माभिरेव स्वयमवतारणं समञ्जसमिति भाव: । सुवल अलं ताम्बूलेन यत् कथितमेव व्रतिन्यो वयमिति ॥१०५

किं मे मुखं पश्यसि सम्मतिनिर्द्धारणार्थमिति भाव: । अविश्वासिनी विशाखा मह्यं कुप्यन्ती इदं भणति व्यञ्जनावृत्त्या कथयति । मह्यं कुप्यन्तीति मदाश्वासेनैव सर्व्वासामत्रागमनादिति भाव: । घट्टपालै: ठकवटिका: प्रयुज्यन्ते इति प्रसिद्धि: श्रूयते । ठकवटिका: सर्व्वस्वापहारार्था: मनोदेहेन्द्रियमोहिन्यो गोलिका: औषधविशेपकल्पा:, तदलमेपां भुजङ्गलतापल्लवेन ॥१०६॥

विम्वोष्ठीनां अलं वस्ताम्बूलेन स्वभावादेवोष्ठराग: ताम्बूलं कदा वा भवतीभिरास्वादितं नास्ति तत्राभ्यास इति भाव: । तस्मात् कल्याणी भव यत् उर्व्वरितं वीटिकापञ्चकम् ॥१०७॥

संस्कृतमिदं ताम्बूलामृतमास्वाद्य निरातङ्का निकाममनास्वादितचरीर्गृहाण सम्पुटतस्ताम्बूलवीटिका: ॥१०८॥

ललिता । इमस्स कामुईलक्खोवभोएण सुट्ठु पावणस्स मुहविम्वस्स जई उग्गारं ण गेण्हिस्सदि मे सही तदो कधं अप्पाणं पुणिस्सदि ॥१०९॥

सुवल: । ललिदे ! विवरीदआरिणो अम्हे दिट्ठिआ तुम्हेहिं च्चेअ उवदिट्ठाओ ता दाणिं दाणं च्चेअ अणुमण्णिज्जउ ॥११०॥

चम्पकलता । किं तुम्हे वम्हणाओ जं वो अम्हेहिं दाणं किर अणुमन्तव्वम् ॥१११॥

मधुमङ्गल: । भोदि चम्पअलदे । एसो कुलीणो अणूआणो वम्हणो म्हि; ता उअरपुरं दिज्जउ समच्छण्डिअं हेअङ्गवीणम् ॥११२॥

विशाखा । सहि चम्पअलदे ! घट्टीच्छलेण एदे उअरम्भरिणो भिक्-

उपभुज्येति तासां विश्वासार्थं द्विजैर्दन्तैर्विप्रैश्च संस्कृतम् ॥१०८॥

अस्य कामुकीलक्षोपभोगेन सुष्ठु पावनस्य मुखविम्वस्य यदि उद्गारं न ग्रहिष्यति मे सखी तदा कथमात्मानं पवित्रयिष्यति ॥१०९॥

ललिते विपरीतकारिणो वयं दिष्ट्या युष्माभिरेवोपदिष्टा: तदिदानीं दानमेवानुमन्यताम् । विपरीतकारिण इति अनादरयोग्यासु आदरदानात् ॥११०॥

किं युयं ब्राह्मणा यद्वो युष्मभ्यं अष्माभिर्दानं किलानुमन्तव्यम् ॥१११॥

भवति चम्पकलते एप कुलिनोऽनुचान: ब्राह्मणोऽस्मि "अनूचान: प्रवचने साङ्गेऽधीती गुरोस्तु य:" इत्यमर: । तत् उदरपुरं दीयतां समत्स्यण्डिकं हैयङ्गवीणं "मत्यण्डी फाणितं खण्डविकार" इत्यमर: ॥११२॥

सखि चम्पकलते घट्टीच्छलेन एते उदरम्भरा: भिक्षन्ति तद्दीयतां

खन्ति ता दिज्जउ एक्का कागिणी ॥११३॥

कृष्ण: । सखे परमाद्यून ! महादानिनामस्माकं महापात्रमसि । तदद्य हैयङ्गवीनेन कुक्षिपूर्त्तावपि तव दरिद्रता ॥११४॥

राधा । हला ललिदे ! एदे महादाणिणोत्ति अत्ताणं सलाहन्ति, ता फुडं परमुत्तमवण्णाणं वो सव्वुत्तमं पअत्थं दाईस्सन्ति ॥११५॥

कृष्ण: । (स्मित्वा) । वरवर्णिनि सत्यं ब्रवीपि तदेतन्निजमहावैभव दास्यामि (इत्यालिङ्गनमुद्रामभिनीय सुवलमालिङ्गते) ॥११६॥

राधा । (सरोमाञ्चमात्मगतं संस्कृतेन)

अपि गुरुपुरस्त्वामुत्सङ्गे निधाय विसङ्कटे
विपुलपुलकोल्लासं स्वैरी परिष्वजते हरि: ।
प्रणयति तव स्कन्धे चासौ भुजं भुजगोपमं
क सुवल पुरा सिद्धक्षेत्रे चकथ कियत्तप: ॥११७॥

एकाकाकिणी यथा तथा चनकान् क्रीत्वा गाश्चारयन्त: चर्वन्त्विति भाव: । काकिणी विंशतिकपर्द्दिका: ॥११३॥

हे परमाद्युन उदरभरणमात्रैकपरायण । "आद्यून: स्यादौदरिक" इत्यमर: । महादानीनां महादातॄणां पक्षे घट्टदानग्राहिणां महापात्र संप्रदानरूपोऽमात्यश्च ॥११४॥

ललिते एते महादानिन इति आत्मानं श्लाघन्ते तत् स्फुटं परमोत्तमवर्णानां वो युष्माकं सर्व्वोत्तमं पदार्थं दास्यन्ति । परम उत्तमो वर्णो रूपं ब्राह्मणजातिश्च यासां ताभ्य इति चतुर्थ्यर्थे षष्ठी प्रकृते: । "वर्णा: स्युर्ब्राह्मणादय" इत्यमर: ॥११५॥

स्मित्वेति वाचिकं स्वयं दूत्यं तस्या अत्यौत्सुक्यविजृम्भितं ज्ञातवानितिभाव: । हे वरवर्णिनि पक्षे परमब्रह्मचारिणि । "वर्णिनो ब्रह्मचारिण" इत्यमर: ॥११६॥

विसङ्कटे पृथुनि क कियत्तप इति । तत् सिद्धक्षेत्रं तप: परि-

(इत्यगर्वमिवाभिनयन्ती भ्रुवौ विभुज्य प्रकाशम्)
ललिदे ! दिट्ठा पइव्वदासु मादिसीसु विदूसअदा तुह-
णिउञ्जराअस्स ॥११८॥

ललिता। (सापदेश संस्कृतेन)।
नवमुकुलितां दृष्ट्वाभ्यर्णे रसाललतामितः
कथमिव मुधा धृष्टः कूट भजन्नभिधावसि।
परिमलवती स्निग्धा चासौ द्विरेफपतिं श्रिता
परिहर कुहूकण्ठात्कण्ठामिय सुलभा न ते ॥११९॥

विशाखा। (संस्कृतेन)।
ऋजुवृत्तिः किल कुटिले वैगुण्यायैव कल्पते त्वरितम्।
इति दर्शयन् धनुःस्थो गुणच्युतिं स्फुटमिपुर्याति ॥१२०॥

माणं च सर्व्वदुर्ज्ञेयमेव यतस्तद्विधो भाग्यवानन्यः कोऽपि माभूत्। मद्विधास्तु वह्वय एव कृताल्पसुकृता अत्र वर्त्तन्ते इति भावः। ११७॥

ललिते दृष्ट्वा पतिव्रतासु मादृशीषु विदूषकता तव निकुञ्जराजस्येति त्वमेवानर्थकारिणी अत्रास्मान् वलादनैषीरिति तां प्रत्युपालम्भः ॥११८॥

रसाललतां आम्रलतां कूटं कपटं द्विरेफपतिं श्रिता तेन तवैवेयं भोग्या द्विरेफः को वराक इति वस्त्वर्थः। पक्षे द्विरेफो वर्व्वरेपि चेत्यमरः। अस्याः सर्व्वगुणमण्डितायाः पतिर्व्वर्व्वर एव इयं च विरुद्धलक्षणयैव पतिव्रतेति तां प्रत्युपालम्भः। न ते सुलभेति शिरश्चालनार्थेन नञा वस्त्वर्थः। कुहूकण्ठेति दूरतोऽपि कण्ठस्वरश्रवणमात्रेणैव इयं वशीभवति किं पुनरिदानीं दर्शनादिति भावः ॥११९॥

ऋजुवृत्तिरिति शुद्धचरितजनस्य कुटिलजनसङ्गेन वैगुण्यमेव भवति। तदितो वयं शीघ्रं निर्गच्छाम इति भावः। गुणच्युतिपक्षे गुणाच्च्युतिम् ॥१२०॥

चित्रा। हन्त घट्टज्झक्ख! घट्टाहिआरो जइ तुम्हाणं अहिट्ठो तदो वहुजणसंघट्टे जउँणाघट्टे च्चेअ चत्तरं जुत्तम् ॥१२१॥

चम्पकलता। अइ विसुद्धचित्ते सहि चित्ते! एदे सुलुक्कलक्खेण लुण्ठिदुं ज्जेव्व एत्थ दुग्गवणे चिट्ठन्ति ता विरमेहि ॥१२२॥

कृष्णः। सखे सुवल! मित्रायितं चित्रया। तदद्य गोष्ठस्य गोपुरे घट्टचत्वरमुपष्क्रियताम्, यदत्र वनमध्ये पलायन्ते परितश्चपलायतलोचनाः ॥१२३॥

सुवलः। पिअवअस्स! सच्चं भणासि। पेक्ख सहीणं सहस्सं राहिअं अणुसप्पदि एण्हिं क्खु चउट्ठअं ज्जेव्व ॥१२४॥

राधा। (स्वगतं) पहादे च्चेअ कुन्दलदाए सद्धं जण्णे पेसिदं मए सहीउलम् ॥१२५॥

मधुमङ्गलः। सुअल! णिच्चिदं आअदाओ विद्धि सहिओ। णहि वसन्तलच्छीए ओदारे सम्वुत्ते कलकण्ठिणं अणुवलम्भो सम्भाविज्जइ ॥१२६॥

हन्त घट्टाध्यक्ष घट्टाधिकारो यदि युष्माकं अभीष्टः तदा वहुजनसंघट्टे यमुनाघट्ट एव चत्वरं युक्तम् ॥१२१॥

अयि विशुद्धचित्ते सखि चित्रे एते शुल्कलक्षेण लुण्ठितमेव तत्र दुर्गवने तिष्ठन्ति तद्विरम ॥१२२॥

मित्रायितं मित्रवदाचरितं हितोपदेशात् ॥१२३॥

प्रियवयस्य सत्य भणसि पश्य सखीनां सहस्रं राधिकामनुसर्पति, इदानीं खलु चतुष्टयमेव ॥१२४॥

प्रभात एव कुन्दलतया सार्द्धं यज्ञे प्रेषितं मया सखीकुलं तेन यज्ञसमाधानं प्रवृत्तमेव अतो निश्चिन्ततयैवात्र विलम्बनीयमिति चेतस्याश्वासो व्यञ्जितः ॥१२५॥

सुवल निश्चितं आगता विद्धि सखीः नहि वसन्तलक्ष्म्या अवतारे

विशाखा। (सस्मितम्) तदो ताणं सहीणं चलणलच्छीहिं तुम्हाणं घट्टो असोअत्तणं लद्धूण उप्फुल्लिस्सदि ॥१२७॥

कृष्णः। (सव्यतो विलोक्य सानन्दम्) कथं काञ्चनमरीचिरोचिषां सहचरीणां सञ्चयेन ब्रह्मकुण्डस्य पुरो भूमिरलंक्रियते ॥१२८॥

ललिता। (स्मित्वा) "जगद्धनमयं लुब्धाः कामुका कामिनीमयम्" त्ति पोराणवअणस्स अत्थो पच्चक्खीकीदो।

मधुमङ्गलः। भो पिअवअस्स! असच्चं ण हसिज्जइ ललिदाए, जं कमलकिञ्जक्करेणुपुञ्जपिञ्जरिदा ओ हंसी ओ तुए सही ओ किज्जन्ति ॥१२९॥

कृष्णः। (सस्मितम्) किमस्माकमनागतचिन्तया ? सम्प्रति घट्ट-शुल्कस्य पुण्याहं प्रवर्त्तताम् ॥१३०॥

सम्वृत्ते कलकण्ठीनां अनुपलम्भः सम्भाव्यते ॥१२६॥

ततः तासां सखीनां चरणलक्ष्मीभिर्युष्माकं घट्टोऽशोकत्वं लब्धा उत्फुल्लीष्यति सुलक्षणयुवतीनां चरणाघातेनाशोकः प्रफुल्ली भवतीति प्रसिद्धिः। तेन च ता अत्रागत्य घट्टे पादाघातमेव कृत्यागमिष्यन्ति। ततश्च भवन्तोऽपि परमाश्रयणीयं निजोपजीव्यभूतं घट्टमिमं प्राप्त-तत्पादाघातत्वेन जातभाग्यातिरेकं सफलं मंस्यन्ते इति स्वपक्षाणां गर्व्वसूचितः ॥१२७॥

ततश्च तत्श्रवणमात्रेणैव ताः सखीरपि निरुद्धय विजिहीर्षोः श्रीकृष्णस्य सद्य एव तदाकारचित्तवृत्तिरभूदित्याह सव्यतो विलो-क्येति ॥१२८॥

जगदित्यस्य "नारायणमयं धीराः पश्यन्ति परमार्थिनः" इति परार्द्धं इति पौराणवचनस्यार्थः प्रत्यक्षीकृतः। भोः वयस्य असत्यं न हस्यते ललितया यत् कमलकिञ्जल्करेणुपुञ्जपिञ्जरिताः हंस्यस्त्वया सख्यः क्रियन्ते ॥१२९॥

सस्मितमिति औत्सुक्यातिरेकोत्था स्वचित्तवृत्तिस्तदाकारता सत्यैव

राधा। (भ्रुवं विक्षिप्य) तिल्लोक्के को क्खु सो महासाहसिआणं सिहामणी चिट्ठदि जो क्खु गोउलबालिआणं दाणं गेण्हिदुं वाआमेत्तेण वि मणाउं वाहरिस्सदि तत्थवि सूरोवासिआणं इमाणम् ॥१३१॥

कृष्णः। (स्मितं कृत्वा) लक्ष्मीमुखि ! दाक्षिण्यतः शिक्षयामि ॥१३२॥

निरवद्यमुद्योतमाने तस्मिन्नुद्यानचक्रवर्त्तिनि साम्प्रतममाम्प्रत-मीदृशं मृगदृशां गिरामौर्जित्यम् ॥१३३॥

राधा। सहि ललिदे ! धिट्ठघट्टआलघट्टणे पड़िदासि ता ण जुत्तं एत्थ कुण्ठत्तणम् ॥१३४॥

कृष्णः। सखे सुबल! श्रुतमस्याः कठोरारम्भटीगरिष्ठं गिरां विस्फूर्ज्जि-तम्। (इत्यर्द्धनिःसृतां रसनां संदश्य) कष्टं भो कष्टम्। दीव्य-

---

सद्यो भूदिति भावः। किमस्माकमित्यनेन शुल्कार्थिनो मम शुल्क-हेतुकैव तद्दिदृक्षा नत्वन्यार्थेत्यवहित्था सूचिता ॥१३०॥

त्रैलोक्ये कः साहसिकानां शिखामणिस्तिष्ठति यः खलु गोकुल-बालिकानां दानं ग्रहीतुं वाङ्मात्रेणापि मनाग्व्याहरिष्यति तत्रापि सूर्य्योपासिकानामासम् ॥१३१॥

स्मितं कृत्वेति तद्वचनप्राखर्य्यमाधुरास्वादनहर्षोत्थमत्र स्मितम्, लक्ष्मीर्मुखे यस्या इत्यहो मुखे कोमलाक्षरमयी लक्ष्मीर्निःसरति विरुद्धलक्षणया हे कटुभाषिणीत्यर्थः। दाक्षिण्यत इति एतत्कटू-क्त्यनुरूपफलदानसमर्थेनापि मया दाक्षिण्यादेव सोढ़मिति भावः ॥१३२

उद्योतमाने चक्रवर्त्तिनीति सद्यः शास्तिसामर्थ्ययुक्तं तत्रापि मृगीदृशां स्त्रीणाम्। तत्रापि ईदृशं और्ज्जित्यं प्राबल्यं असाम्प्रतं अयोग्यम् ॥१३३॥

ललिते धृष्टघट्टपालघट्टने पतितासि तन्न युक्तमत्र कुण्ठत्वं घट्टनं चालनम् ॥१३४॥

यौवनगर्व्वेति तर्हि स एव गर्व्वः प्रथमं मया खण्डयितुं योग्य

इर्व्वाचीन-यौवनगर्व्व-सर्व्वस्वया वाढ़मेतया महाघट्टसाम्राज्य-पट्टलब्धाभिषेकोऽहं चत्वरिकाणां चक्रवर्त्ती घट्टीपाल: कृतोऽस्मि ॥१३५॥

ललिता । (संस्कृतेन) ।

सच्छिद्रा लघुवंशजा च मुरली यष्टि: कठोरा भृशं
स्तब्धात्मा च विषाणिकातिमलिना वक्रस्वरूपापि च ।
आभि: सन्ततमुत्तमाभिरभितो यस्याङ्गमालिङ्गचते
घट्टीपालतया भयानकवने वृत्तिर्न तस्याद्भुता ॥१३६॥

सुवल: । हन्त दुम्मद-मुहराओ ! ण क्खु तुम्हेहिं हेलिदुं जुत्तो एसो महादाणस्स अहीसो ।

राधा । होदु अहीसो तदो वि किम् (इति संस्कृतेन) ॥१३७॥

इति भाव: ॥१३५॥

त्व चेच्चक्रवर्त्ती महाराजोसि तथैव तवानुरूपा महाराज्ञ्योऽपि दृश्यन्ते इति ता गणयन्त्याह सच्छिद्रेति विषाणिका शृङ्गिका आभिरालिङ्गचते इति युगपदेव सदैव सर्व्वलोकदृग्गोचर एव इति प्रथम तासामेव यौवनगर्व्वमवतारयेति भाव: । ता: सदैव सावधाना वञ्चयित्वा पराङ्गनास्वाभिलापस्तव निष्फल इति भाव: । अयं धर्षणेनेति वक्ष्यमाण-राधास्वाभियोगपूर्व्वरङ्गो ललितया तन्निष्ट एव निर्म्मित: । तस्य चक्रवर्त्तिनो घट्टीपालतया इति भयानकवन इति सुन्दरीजनस्वच्छन्दाकर्षणलोभात् राजन्वति देशे तु तदशक्यत्वादिति भाव: ॥१३६॥

हन्त दुर्म्मदमुखरा: न खलु युष्माभिर्हेलितुं युक्त एप महादानस्याधीश: । भवतु अधीशस्ततोऽपि किं श्लेषेण भवतु अहीश: भुजङ्गश्रेष्ठ इति ॥१३७॥

धर्षणे नकुलस्त्रीणां भुजङ्गेश: क्षम: कथम् ।
यदेता दशनैरेप दशन्नाप्नोति मङ्गलम् ॥१३८॥

कृष्ण: । भंगुरापाङ्गि ! हृदयङ्गममात्थ तत: समाकर्णय (इति सहर्पम्)

अप्रौढ़-द्विजराजराजदलिका लब्धा विभूतिं रुचां
नव्यामात्मनि कृष्णवर्त्मविलसद्दृष्टिर्विशाखाञ्चिता ।
कन्दर्पस्य विदग्धतां विदधती नेत्राञ्चलस्य त्विषा
त्वं राधे शिवमूर्त्तिरित्युरसि मां भोगीन्द्रमङ्गीकुरु ॥१३९॥

नकुलस्त्रियो नकुल्य एव तासां धर्षणे भुजङ्गेश: महासर्प: पक्षे महाकामुक: कुलस्त्रीणां धर्पणेन प्रयोजनेन क्षम: आसां धर्पणार्थं कथं समर्थ इत्यर्थ: । पक्षे धर्पणे कथं न क्षमोऽपि तु क्षम एव यत यस्मात् एता नकुली: कुलस्त्रीश्च दशनैर्दशन् सन् मङ्गलं भद्रं नाप्नोति ताभिरपि प्रतिदंशनसम्भवात् लोकनिन्दा राजदण्डादिभ्यश्चेति पक्षद्वयम् । तृतीयपक्षे एना कुलस्त्रीरेव दशन् संभुञ्जान एव मङ्गलं सुखमयं आप्नोति नत्वन्या: तासु रागाल्पत्वादिति भाव: ॥१३८॥

हृदयङ्गममिति अर्थत्रयानुमोदनज्ञापनम् । अप्रौढ़द्विजराजेन अर्द्धचन्द्रेण राजत् अलिकं ललाटं यस्या: सा, पक्षे अप्रौढ़-द्विजराजो द्विकलचन्द्र इव राजदलिकं यस्या: सा । आत्मनि देहे विभूतिं लब्धा प्राप्ता, विभूतीं कीदृशीं रुचां कान्तीनां नव्यां भूतिरपि देहगता अतिसुन्दरीत्यर्थ: । पक्षे रुचां कान्तीनां नव्यां नवीनां विभूतिं सम्पत्तिं प्राप्ता । "भूतिर्भस्मनि सम्पदी"त्यमर: । कृष्णवर्त्मा वह्निस्तद्रूपकृष्णस्य वर्त्मनि च विलसन्ती दृष्टिर्यस्या: सा । कृष्णेन वर्त्मना पक्ष्मला इति वा "वर्त्मनेत्रच्छदेऽध्वनि" इत्यमर: । विशाखेन कार्त्तिकेयेन । विशाखया स्वसख्या च अञ्चिता पूजिता युक्ता च । विदग्धतां विशेपेण दग्धतां, पक्षे वैदग्ध्याम् । शिवस्य शम्भोर्मूर्त्ति:,

ललिता । कण्ह! इमाए कूड़वाउराए दुग्गहा ललिदा धुत्तहरिणी त्ति तुम्ह-सहअरा वि सुट्ठु जाणेन्ति ता मुञ्च विहल धिट्ठ गण्ठिलत्तणम् ॥१४०॥

कृष्णः । (सुवलमवलोकते) ।

सुवलः । ललिदे! एदे कहं किर ण जाणिस्सन्ति, जेहिं तहिं गन्धहली-हरणे णिक्कुड़सामिणा लुण्ठिदमणिमण्डलाणं सूरोवासिआण काणं वि महापहाराण दन्तसिहरपन्तिसु तिण-गुच्छमरगएहिं आरब्धा का वि अच्चरिआ लच्छी पच्चक्खी-किदा ॥१४१॥

कृष्णः । सखे ! विस्मृतं तत् कुतूहलं, पुनरत्र काण्डे सुष्ठु भवता स्मारितम् ।

पक्षे मङ्गलमूर्त्तिः भोगीन्द्रं भुजङ्गेशं, पक्षे भोक्तृणामिन्द्रम् ॥१३९॥

"कृष्ण अनया कूटवागुरया दुर्ग्रहा ललिता धूर्त्तहरिणीति युष्मत् सहचरा अपि सुष्ठु जानन्ति तन्मुञ्च विफलं धृष्टग्रन्थिलत्वम्" । तेनाद्याहं ललितैव राधाप्राप्तिप्रतिवन्धिनी तस्याः मया पाल्यमानत्वादिति भावः । तव सहचरा अपीत्यनेन पूर्व्वपूर्व्ववृत्तस्वप्राखर्य्यस्मारणेन तानपि भीपयति ॥१४०॥

सुवलमवलोकत इति अलोकवाग्विलासेनापि सम्प्रतीयं पराजीयतामिताङ्गितविज्ञापनम् । "ललिते एते कथं न ज्ञास्यन्ति यैस्तदा गन्धफलीहरणे निष्कुटस्वामिना लुण्ठितमणिमण्डलानां सूर्य्योपासिकानां कासामपि महाप्रभावानां दन्तशिखरेपु तृणगुच्छमरकतैः आरब्धा कापि आश्चर्य्यलक्ष्मीः प्रत्यक्षीकृता" । गन्धफली चम्पकः । महाप्रभावानामिति विरुद्धलक्षणया दन्ता एव शिखराणि पक्वदाड़िमवीजाभमाणिक्यानि ॥१४१॥

काण्डे अवसरे जैनदीक्षामिति नग्नीकरणं लक्ष्यते अनुजगृहिरे

अस्मिन्नद्रौ कति न हि मया हन्त हारादिवित्तं
हारं हारं हरिणनयना ग्राहिता जैनदीक्षाम् ।
याः काकूक्तिस्थगितवदनाः पत्रदानेन दीना-
स्तूर्णं दूरादनुजगृहिरे प्रौढ़वल्लीसखिभिः ॥१४२॥

विशाखा । अलं इमिणा अलीअ-दप्प-डिण्डिमाड़म्वरेण ।

ललिता । सहि विसाहे ! हन्त हन्त, कल्ले पच्चुताणग्घमणिकञ्चन-सञ्चअकिरणोदञ्चिदाए राहिए कञ्चुलिआए उल्लुञ्चणवुत्तन्तं सहीजणे अज्जाए विण्णावेदुं पउत्ते मुहमज्झणिक्खित्त-तज्जणी-सिहरस्स सुरिन्दगन्धव्वणामं अधीरं पुणो पुणो वाहरन्तस्स कस्स वि दप्पसोण्डस्स महापअण्डस्स सा का वि चाडु-गण्ठिदा कण्ठकाअली कं वा जणं ण क्खु कारुण्णेण ओण्णिदवदी ? ॥१४३॥

अनुगृहीता ॥१४२॥

" अलं अनेन अलोकदर्पडिण्डिमाड़म्वरेण" । "सखि विशाखे हन्त हन्त कल्ये प्रच्युतानर्घमणिकाञ्चनसञ्चयकिरणोदञ्चिताया राधायाः कञ्चुलिकायाः उल्लूञ्चनवृत्तान्तं सखीजने आर्यायै विज्ञापयितुं प्रवृत्ते सति मुखमध्यनिक्षिप्ततर्ज्जनीशिखरस्य सुरेन्द्रगन्धर्व्वनाम अधीरं पुनः पुनर्व्याहरतः कस्यापि दर्पशौण्डस्य महाप्रचण्डस्य सा कापि चाटुग्रथिता कण्ठकाकली कं वा जन न खलु कारुण्येनाद्रितवती" । सुरेन्द्रगन्धर्व्वनामा हाहा इति । दर्पशौण्डस्येत्यादि विरुद्धलक्षणया शौण्डा मत्तः । कञ्चुलिकाया उल्लूञ्चनेति तन्मात्र साहसं कृष्णेन कृतं, जैनदीक्षा किन्तु अलीकगर्व्वगाम्भीर्य्यमेवेति ध्वनितम् । अत्र मणिकाञ्चनसञ्चयकिरणेत्यादिकं शुल्कमात्रग्रहणार्थकत्वज्ञापनया आर्य्या समाधानमिति कं वा जनं न कारुण्येनाद्रितवतीति तेन कृपयार्द्रिभिरस्माभिरेव तस्या अग्रे तत्समाधानमपि कृतम् । अन्यथा

सुबल: । दुल्लहा एत्थ सा अज्जा कण्टआडई, ता लुक्कणे वि किंपि ओट्टम्भणं पेक्खामि ॥१४४॥

चम्पकलता । विजअदु सो ललिदाणुहावभक्करो, जो क्खु तक्करविक्कमं कुण्ठेदि ॥१४५॥

वृन्दा । (कृष्णमवलोक्य) कपर्द्दमपि काणं, तवात्र दुरवापम् ।
यदुग्रतरकर्म्मा, कुमार ललितासौ ॥१४६॥

कृष्ण: । वृन्दे ! विपक्षतामासादयन्ती स्थाने गोपिकापक्षाञ्चलसञ्चारिणी संवृत्तासि । भवतु, पश्याद्य मे चञ्चलवल्लवीरसालवल्लीभ्य: शुल्ककुट्मल-ग्रहणे पुंस्कोकिलताकेलिवैदग्धीम् ॥१४७॥

राधा । सहि वुन्दे ! णिवारीअदु परस्स-ग्गहाहिणिवेसो अप्पणो वणप्पि ओ । दाणिं दुम्मुह-सिलीमुहपालिदाहिं रसालवल्लीहिं

न जाने किं फलं तदा अदास्यतेति भाव: । समर्पणं नाम पञ्चममङ्गमिदम् । यदुक्तं–"उपालम्भवच: कोपपीड़येह समर्पण"मिति ॥१४३॥

"दुर्ल्लभा अत्र सा आर्य्या कण्टकाटवी" जटिलेत्यर्थ: । 'तत्तस्मात् लुक्कनेऽपि किमप्यवष्टम्भनं न पश्यामि" ॥१४४॥

"विजयतां सललितानुभावभास्कर: य: खलु तस्करविक्रमं कुण्ठयति" । ललिताया अनुभाव: प्राखर्य्यजनित-प्रभाव एव भास्कर: श्लेषेण च ललितोऽनुभावो यस्य तथाविध: ॥१४५॥

काणं सच्छिद्रं तवेति कपर्द्दापेक्षया सम्बन्धषष्ठी । हे कुमार युवराज ! "युवराजस्तु कुमार" इत्यमर: । कुमारललिताख्यं छन्दश्च ॥१४६॥

स्थानं युक्तम् । "युक्ते द्वे साम्प्रतं स्थाने" इत्यमर: । पश्याद्य मे इति तत् माहात्म्यं विनाभूतस्यापि इति भाव: ॥१४७॥

"सखि वृन्दे निवार्य्यतां परस्व ग्रहाभिनिवेशो आत्मनो वनप्रिय:" । वनप्रिय: कोकिल: कृष्णश्च । 'इदानीं दुर्म्मुख-शिलीमुख-

पल्लअहत्थेण पल्लत्थो भविअ णअमालिआ मल्ली ओ तुम्ह-सहीओ मा हासेदु एसो १४८॥

कृष्ण: । (सखेल स्मितम्) घट्टशुल्कप्रदानाय गुहातिथ्यग्रहाय वा ।
स्पृहा ते हेमगौराङ्गि गिरस्तां गोचरीकुरु ॥
(राधा सेर्ष्यमवज्ञां नाटयन्ती तूष्णीं तिष्ठति ।) ॥१४९॥

कृष्ण: । अरविन्ददृशामपश्चिमा, त्वमपूर्व्वा बहुरूपलालया ।
कपटोद्घाटनाददक्षिणा, न कथं भवितास्यनुत्तरा ? ॥१५०॥

पालिताभि: रसालवल्लीभि: पल्लवहस्तेन पर्य्यस्तो भूत्वा नवमालिका मल्लीर्युष्मत् सखीर्महोत्सवयतु एष:" । दुर्म्मुख-शिलीमुखा: द्विरेफपर्ति श्रितेति पूर्व्वोक्तवत् कटुभाषिण: स्व स्व पक्षय एव श्लेषेण शिलीमुखा: शरा इति रसालवल्ली वैरिण: शरा इव अस्मद्रोहिण एव ते ततश्च विरुद्धलक्षणयैव तैर्वयं पालिता भवाम इति स्वाभियोगो व्यञ्जित: । "अलिवाणौ शिलीमुखावि"त्यमर: । पल्लवहस्तेनेति । नहि पल्लवचलनमात्रेण कोकिल: शङ्कते, कृष्णपक्षे युवतीनां वाम्यकृतहस्तवारणं न किञ्चित्करमेव प्रत्युतं प्रेयस: सुखायैव तदिति नवमालिकामाल्य स्रग्विन्य: प्रगल्भा: सख्य: उल्लसिता एव भविष्यन्ति नतु वारयिष्यन्ति इति स्वाभियोग: ॥१४८॥

विदिताकूत . आह घट्टेति-प्रकटार्थे प्रथमे गुहेति द्वितीयार्थे प्रत्युक्तिस्तां स्पृहां गिरो गोचरीकुर्व्विति अभिधयैव स्पष्टं कथय अलं व्यञ्जनयेति तस्या अत्यौत्सुक्य-निर्धौतशालीनत्व प्रकटीकृत्य तां ह्रेपयामास । सेर्षमवज्ञामिति-स्वधाष्टर्य-प्रकटीकरणात् तूष्णीमिति लज्जाजनितमेव ॥१४९॥

ततश्च स्वेनैव निर्व्वचनीकृतत्वं तस्या मत्वा लब्धविजयो हृष्यन्नाह अरविन्देति अपश्चिमा अन्यूना श्रेष्ठेत्यर्थ: । अपूर्व्वा अद्भुतचमत्काराभिधायिनी इति पूर्व्वार्द्धेन परमोत्कर्षमुक्त्वा पराजयप्राप्ति-

नान्दीमुखी । (मन्दंमन्दपश्रित्य) णाअरिन्द ! भअवदी सन्दिसदि ।

कृष्ण: । नान्दीमुखि ! सत्वरमादेदय, किमाज्ञापयति तत्रभवती ॥१५१

नान्दीमुखी । एसा भणादि, "राहीपमुहा ओ अम्ह-वालिआ ओ अज्ज हेअङ्गवीण घेत्तूण जण्णे गमिस्सन्ति ; ता इमाए घट्ट-दाणे अणुउलेण होदव्वं सुहंजुणा ।"

कृष्ण: । (प्रमोदमिवाभिनय) मूर्द्धनि गृहीतोऽयं महाप्रसाद: । सखे मधुमङ्गल ! सुष्ठु मधुरं खलु मिहिरोपासिकानां किशोरीणां हैयङ्गवीनमिति गोकुले गरीयसी प्रसिद्धि: । तत: समुचितोऽपि प्रतिटङ्कं हेमटङ्कत्रये स्फुटमेकटङ्कनिष्ठटङ्केनेन गणय शुल्कवित्तानि, यदमुषु भगवत्या: पक्षपातिता ॥१५२॥

मधुमङ्गल: । पिअवअस्स !

टङ्कैश्चतुर्भि: कर्ष: स्यात्तैश्चतुर्भिर्भवेत् पलम् ।
भवेत्तुला पलशतं भार: स्याद्विंशतिस्तुला: ॥

कारणमपकर्षमुत्तरार्द्धेन आह-कपटानां उत्कर्षेण घाटनाद्धेतोरदक्षिणा असरला च । अत: कथं वा अनुत्तरा अनुत्तमा न भवितासि असारल्येनोत्तमत्वापगमादिति भाव: । श्लेषेण अपश्चिमा अपूर्व्वा अदक्षिणेति दिक् त्रितयत्वाभावादेव अनुत्तरा चतुर्थी दिगपि भवितु न युक्तासि अनुत्तरा प्रत्युत्तरदानासमर्थेति युक्तमेवेति श्लेषोत्थध्वनि: ॥१५०॥

नान्दीति घट्टशुल्कप्रदानायेति श्रुत्वा तद्व्यवस्थामुपपादयितुं अत्रागमने प्राप्तावसरेति भाव: ॥१५१॥

"राधाप्रमुखा अस्मद्बालिका अद्य हैयङ्गवीनं गृहीत्वा यज्ञे गमिष्यन्ति तदेतासां घट्टदाने अनुकूलेन भवितव्य शुभंयुना" । शुभंयुस्तु शुभान्वित इत्यमर: ॥१५२॥

टङ्कैरिति एक कृष्णला परिमिता रक्तिका भवति, पञ्चभिस्ता-

त्ति गणणावेइणो भणन्ति । एसो उणो राहिआदिणो पत्तेअं महाभारो, जं ललिदाए अप्पणा मुहेण भणिदं "हला, इमिणा महाभारेण किलिट्ठासि" त्ति ॥१५३॥

कृष्ण: । (स्मितं कृत्वा) ततस्तत: ?

मधुमङ्गल: । भाराणं पञ्चासेण महाभारो भणिज्जई; अदो जेव्व पञ्चाणं गोइआण हेअङ्गवणेहिं टङ्काणं असीदिलक्खाइं होन्ति ; परं वि घट्टआल-वट्टण-णिव्वाहणस्स टङ्कलक्खचउक्कं मया वड्ढिदम् ॥१५४॥

कृष्ण: । सखे ! रसलुब्ध ! वर्द्धितमिति मृषोक्तम् । नूनमुत्कोचरोचनया गणने संक्षिप्तिरेवाचरिता. यदत्र भवद्गणनया हेमटङ्काणां चतुरशीतिलक्षमात्रं सिद्धम् ॥१५५॥

भिर्माष: । शास्त्रीयव्यावहारिको मापस्तु दशरक्तिक: न गृहीत: । तदानीं शास्त्रीयस्यैव व्यावहारिकत्वात् । ततश्चतुर्भिर्माषैष्टङ्क: स च अशीतिरक्तिकापरिमितसुवर्णमुद्रा चतुर्थांश: कर्ष: सुवर्णमुद्राऽपरपर्य्याय: । तैश्चतुर्भि: पलं तच्च षोड़शटङ्का: पलानां शतं तुला सा च षोड़शशतानि टङ्का: । विंशतिस्तुला भार: स च द्वात्रिंशत्सहस्राणि टङ्का "इति गणनावेदिनो भणन्ति । एष पुन: राधिकादे: प्रत्येकं महाभार: यत् ललितया आत्मनो मुखेन भणितम्" । पूर्व्वं भारावतरणसमय इत्यर्थ: । "अनेन महाभारेण क्लिष्टासीति" ॥१५३॥

स्मितमत्र तच्चातुर्य्यश्लाघासूचकम् । "भाराणां पञ्चाशता महाभारो भण्यते स च षोड़शलक्षाणि टङ्का: । अतएव पञ्चानां गोपिकानां हैयङ्गवीनै: टङ्कानां अशीतिलक्षाणि भवन्ति परमपि घट्टपालवर्त्तननिर्व्वाहणाय टङ्कलक्षचतुष्कं मया वर्द्धितं" एवं च मिलित्वा चतुरशीतिलक्षाणि टङ्का गणिता: ॥१५४॥

उत्कोचरोचनयेति घट्टपालवर्त्तनस्य राजचतुर्थांशत्वेन नाय्यत्वात् । विंशतौ लक्षेषु वर्द्धयितव्येषु लक्ष चतुष्टयमात्रं त्वया वर्द्धितं

(मधुमङ्गलः कृष्णस्य कर्णे मुखं विन्यस्य कथनमुद्रां चाभिनीय किमप्यकथयन्निव विश्लिष्यति ।) ॥१५६॥

कृष्णः (सस्मितम्) आं विज्ञात विज्ञातम् । सम्यगाचरितम्, तदत्र गणितवित्तानि यथा झटित्यमूर्घट्टचत्वरे कूटयन्ति तथोद्यमः क्रियताम् ॥१५७॥

चित्रा । दाणिन्द ! जइ पञ्च-गग्गरिआणं सुलुक्कं च्चेअ चउरसीदि-लक्खप्पमाणं संवुत्तं, तदो ण जाणे मोल्लं वा केत्तिअम् ॥१५८॥

कृष्णः । चित्रे ! मैवं ब्रवीः । कथमन्यथा दीर्घदर्शिनो याजकास्ते निर्भरमनर्घाणि विश्राणयन्ति मणिमण्डनानि ? ॥१५९॥

नान्दीमुखी । पुक्खरिक्खण ! ण दुक्कर क्खु इमाणं एत्थ चउर-सीदि-लक्खाणं दाणं ; ता अणुकम्पिअ किंपि समाहाण चिन्तेहि ॥१६०॥

अपराणि पोडशलक्षाणि एताभ्यः किञ्चिन्मात्र नवनीतप्राप्त्याशया अपलपितान्येवेति भावः ॥१५५॥

कृष्णस्य कर्णे मुखं विन्यस्येत्यनेन ललितायाः सखीरेव समभ्यूहयति राजस्वरूपाट्टङ्का राज्ञः कृते त्वया ग्राह्या एव आत्मवर्त्तनार्थं त्वया निर्जनवने नागरेण टङ्काः कथं ग्राह्याः किं त्वायत्यां तदर्थमासामेकतरैव स्वाच्छन्द्येनोपादेया अतएव मया लक्षचतुष्टयं यद्वर्द्धितं तत् सुबलाद्यर्थमेव न त्वदर्थं भवतीति ॥१५६॥

अतएव सस्मितमिति तं प्रति प्रसन्नतालक्षणस्मितं ललितादिभिरभ्यूहितम् ॥१५७॥

"दानान्द्र यदि पञ्चगर्गरिकाणां शुल्कमेव चतुरशीतिलक्ष प्रमाणं संवृत्तं ततो न जाने मूल्यं वा कियत्" ॥१५८॥

विश्राणयन्ति ददति विश्राणनं वितरणमित्यमरः ॥१५९॥

"पुष्करेक्षण न दुष्करं खलु एतासां अत्र चतुरशीतिलक्षाणां

मधुमङ्गलः । पिअवअस्स ! णान्दीमुहीए सुत्तिदं एक्केक्कसो चउरसीदिलक्खजाअजादरूवेहिन्तो भुइट्ठं वरिट्ठरूवा ओ होन्ति इमाओ ॥१६१॥

(इत्यर्द्धोक्ते स्मित्वा मुखं व्यावर्त्तयति ।)

कृष्णः । सखे ! सम्यगाकलितम्, तेनात्र काप्येकतरा गृह्यतामिति नान्दीमुख्याः शिक्षाचातुरी ॥१६२॥

ललिता (सोत्प्रासस्मितम्) एद क्खु मणोरहमेत्तेण दक्खा भक्खणं अदक्खस्स लोलुवकीरजुआणस्स ॥१६३॥

दानं तत् अनुकलय्य किमपि समाधानं चिन्तय" । दुष्करमित्यनेन तासां परमाढ्यत्वयशः प्रख्यापनया तासु स्वपक्षपातो ज्ञापितः । स च तासां दानव्यवहारो वाह्यः अभिलपितवस्तुऽन्यन्तरेतु वास्तव एव ॥१६०॥

"प्रियवयस्य नान्दीमुख्या सूत्रितमिति" सूत्रं कृतमित्यर्थः । मया तु तद्वृत्तिक्रियते इति अवधीयतामित्याह "एकेति एकैकश्चतुरशीतिलक्षजीवजातरूपेभ्यो भूयिष्ठं वरिष्ठरूपा भवन्ति इमाः" । चतुरशीतिलक्षाणि यानि जीवानि परमद्युतिमयानि जातरूपाणि स्वर्णानि तेभ्यो वरिष्ठरूपाः इत्यर्थः । यद्वा जीविकारूपाणि जातस्वर्णानि तेभ्यो वरिष्ठरूपाः । पक्षे चतुरशीतिलक्षाणि जीवानां जातानि जातयस्तेषां रूपेभ्यः सौन्दर्य्येभ्यः वरिष्ठसौन्दर्य्याः ॥१६१॥

मुखं व्यावर्त्तयति इति । मया वृत्तिमात्रं कृतं वाक्यार्थतात्पर्य्यरूपमुदाहरणन्तु त्वयैव कथ्यतां मया तु आभ्यो लज्जा-संकोचाभ्यां कथयितुमशक्यत्वादिति भावः ॥१६२॥

"एतत् खलु मनोरथमात्रेण द्राक्षाभक्षणं अदक्षस्य लोलुपकीरयूनः" ॥१६३॥

कृष्णः। श्रिया नातीव तारतम्यवतीष्वप्येतासु ललिता-जीवातुरेव राजीवलोचनेयं मह्यमभिरोचते।

वृन्दा। निकुञ्जयुवराज ! निन्हुतमणिमण्डलेयं राधा ; तदेषा भूरिभूषणभूषिता ललितैव शुल्ककार्य्याय पर्य्याप्नोति ॥१६४॥

कृष्णः। सेयं मुग्धे शिखरदशना पद्मरागाधरौष्ठी
राजन्मुक्तास्मितमधुरिमा चन्द्रकान्तास्यविम्बा ।
उद्दीप्तेन्द्रोपल-कचरुचिः पश्य हाराधिकेति
त्यक्तुं युक्ता न किल तरुणी रत्नमालामहिष्ठा ॥

(इति राधामनुसर्पति)

राधा। (लीलया साध्वसातिरेकमभिनयन्ती) सहि विसाहे ! परित्ताहि, परित्ताहि। (इति सभ्रूभङ्गमपसर्पति।) ॥१६५॥

विशाखा। भो दुव्वारवारण ! इमाए दुल्ललिदाए ललिदाए महावारीए अदिक्कमे संवुत्ते च्चेअ चम्पअलदादि-वेड्ढिदाए अमिअसरसीए विगाहणं दे सुलहम् ॥१६६॥

निह्नुतमणिमण्डला इत्यनेन राजस्वार्थं द्रव्यमात्रमेव त्वया गृहीतुं व्यवसीयते नत्वन्यथेति तस्मिन् पक्षपातो व्यञ्जितः ॥१६४॥

तरुणीरत्नानां युवतीश्रेष्ठानां मालासु पङ्क्तिषु महिष्ठा महत्तमा "रत्नः स्वजातिश्रेष्ठे चे" त्यमरः। पक्षे इयं रत्नमाला मणिश्रेणी कीदृशी तरुणी अतिनिर्दोषकान्तिमतीत्यर्थः। यद्वा इयं तरुणी रत्नामालाभिर्महिष्ठा। रत्नान्येव विवृणोति शिखरेत्यादिना। "पक्वदाड़िमवीजाभं माणिक्यं शिखरं विदुरि"त्यभिधानात्तादृशमाणिक्यान्येव दन्ततया तस्यां तिष्ठन्तीत्यर्थः। एवं सर्व्वत्र व्याख्येयम्। हीति विस्मये राधिका इति तरुणीपक्षे हीरैः हीरकैरधिका ॥१६५॥

"भो दुर्व्वारवारण अस्या दुर्ल्ललिताया ललिताया महावार्य्या अतिक्रमे संवृत्ते एव चम्पकलतादि वेष्टिताया अमृतसरस्या विगाहनं

ललिता। हंहो कुम्भसम्भअ-प्पिअगिरिन्दसिन्धुर ! एसा ण क्खु जुत्ता अदिभूमी ॥१६७॥

वृन्दा। (अपवार्य्य) सखि ललिते ! चाटुभिरभ्यर्थमानासि, मनागद्य तूष्णीं भव। पश्यामि भावोद्भासितामनयोर्व्यावहासीम् ॥१६८॥

कृष्णः। सद्मनर्द्दिनि ! किं पलायसे शुल्कमप्रदाय ? दुर्ल्लभा ते पदादपि पदान्तरगतिः ॥१६९॥

राधा। किं अम्हे वणिज्जजीविआओ, जं घट्टआलादो तुअत्तो भएण पलाइस्सम्ह ? ॥१७०॥

कृष्णः। साधु साधु, क्षण स्थिरीभव, यावदेष ते पयोधरोपरि विलक्षितां नक्षत्रमालामपहर्त्तुं कल्यतामासादयामि ॥१७१॥

ते सुलभम्"। हे वारण हस्तिन् दुर्ल्ललिताया दुरतिक्रमणीयायाः। "वारी तु गजवन्धनी"त्यमरः ॥१६६॥

"हंहो कुम्भसम्भवप्रियगिरीन्द्रसिन्धुर एषा न खलु युक्ता अतिभूमिः"। कुम्भसम्भवोऽगस्त्यः तस्य प्रियो गिरिन्द्रो विन्ध्यः तस्य सिन्धुर हे तत्रत्य मत्तहस्तिन्नित्यर्थः। विन्ध्यो यथा मर्य्यदातिक्रम्य सूर्य्यमपि निरुरोध तथैव त्वमपि राधां निरुणत्सीत्यर्थः। अतिभूमिरतिक्रमः पक्षे सकोचः ॥१६७॥

भावैरीर्षागर्व्वहर्षादिभिरुद्भासितां व्यावहासीं परस्परनर्म्मोक्तिचेष्टामित्यर्थः ॥१६८॥

हे सद्मनर्द्दिनि हे गेहनर्द्दिनि ललिताद्याश्रयबलमात्रमवलम्ब्यैव स्वतो दुर्व्वलापि मुधाटोपमात्रेणैव नर्द्दसीत्यर्थः ॥१६९॥

"किं वयं वाणिज्यजीविकाः यद्घट्टपालात् त्वत्तो भयेन पलायिष्यामहे"। वाणिज्यमेव आजीविका वार्त्ता यासां ताः ॥१७०॥

पयोधरोपरि मेघोपरि स्तनोपरि च। नक्षत्रमालां उड़ुश्रेणीं

राधा। एसा सुदीहतमा तामसी सामा ; ता कुदो कल्लस्स अब्भुग्गमा सङ्काबि ॥१७२॥

कृष्ण:। (स्मितं कृत्वा) प्रोल्लसच्चण्डकरे प्रफुल्लपुण्डरीकेक्षणे विस्फुरति हारिततारोरुहारा स्खलिततमिस्रवसना तामसी श्यामा स्वयमेव सदा पलायते ॥१७३॥

राधा। हन्त सूर ! राहुत्थाणे ण क्खु चण्डअरस्स चण्डिमा ॥१७४॥

कृष्ण:। पश्य, दुर्विषहतायुतोऽयं चक्रलक्ष्मा ; कथं तदुत्थानं सम्भाव्यते ? ॥१७५॥

मुक्तामालाश्च। "सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकैरि"त्यमर:। अपहर्त्तुं निर्व्वापयितुं आक्रष्टुञ्च कल्यतां समर्थतां प्रात:कालत्वञ्च। प्रत्यूषोऽहर्मुखं कल्य ऊष: प्रत्यूषसी अपीति। कल्यौ सज्जनिरामयौ इति चामर: ॥१७१॥

"एषा सुदीर्घतमा तामसी श्यामा तत् कुत: कल्यस्याभ्युद्गमाशङ्कापि"। सुदीर्घतमा तामसी कृष्णपक्षीया रात्री। 'श्यामा स्यात् शारिवा निशेति विश्व:'। पक्षे अतिदीर्घतया प्राप्तुं प्रमातुं चाशक्येत्यर्थ:। तामसी कोपवती श्यामा मल्लक्षणा नायिका अत: कल्यस्य समर्थस्यापि ॥१७२॥

प्रोल्लसच्चण्डकरे प्रोद्यत्सूर्य्ये। पक्षे प्रोल्लसन्तौ चण्डौ करौ पाणी यस्य तस्मिन्, प्रफुल्लानि पुण्डरीकानां कमलानां ईक्षणाति नेत्राणि यस्मात् तस्मिन्।'शीतकाले भवेदुष्णी ग्रीष्मकाले च शीतला। पद्मगन्धिमुखं यस्या: सा श्यामा परिकीर्त्तिता" ॥ पक्षे फुल्लकमललोचने मयि विस्फुरति सति तारा नक्षत्राणि मुक्तामालाश्च तमिस्ररूपं वसनं पक्षे नीलवस्त्रञ्च ॥१७३॥

"हे सूर राहूत्थाने न खलु चण्डकरस्य चण्डिमा तेज:" सद्य एव उपरागेण तस्य तेजो ह्रासात्। पक्षे हे सूर वीर राधोत्थाने न चण्डस्य करस्य ॥१७४॥

राधा। (विहस्य) हन्त, फुक्कारदुव्विसेण हदाउद चक्कलक्खणणाअरणाअ-मोहदाईणं विसाणं महासारं किति उल्लासेसि ? तुमं गब्भरं गदुअ मुरलिआ-णाइणीं चुम्बेहि ॥१७६॥

कृष्ण:। शुल्कनागरि ! तथ्यमेव नागरनाग: सुप्रतीकोऽयं यत् पद्मिनीनां व: करहाटकमाक्रोष्टुकामो महासारं विषाणमुल्लासयति ॥ ७७॥

राधा। पउमिणीए वराडअस्स वि अप्पदाणं जाणीहि ॥१७८॥

कृष्ण:। (स्मित्वा) कामिनि ! वराटकयापि किमात्मदानं कर्त्तुमुद्यतासि, यदयमर्थग्रहिलचक्रवर्त्ती नाङ्गनाभिस्तुष्यति? १७९

दुर्विषहता दु:सहत्वं तेन युक्तोऽयं चक्रलक्ष्मा रेखामयचिह्नधारी इति दक्षिणकरतलं दर्शयति। तदुत्थानं तस्य राहोरुत्थानं चक्रदर्शनात् स विभेतीत्यर्थ: ॥ १७५॥

विहस्येति तद्वाक्यस्यार्थान्तरकरणाय सरस्वती साहाय्यमेव सूचयति। "हन्त फुत्कारदुर्विषेण हतायुतचक्रलक्षणनागरनागमोहदायिनं विषाणं महासार किमिति उल्लासयसि त्वं गह्वरं गत्वा मुरलिकानागिनीं चुम्ब"। चक्रलक्षणफणचिह्नधारि नगरसम्बन्धि महासर्प:, महान्तं आसारं धारासम्पातम् ॥१७६॥

नागरनाग: नागरश्रेष्ठ: सुप्रतीक: शोभनाङ्ग:। 'अङ्गं प्रतिकोऽवयव' इत्यमर:। पक्षे सुप्रतीको दिग्गज:। 'गजेऽपि नाग-मातङ्गावि'त्यमर:। पद्मिनीनां कमलिनीनां पक्षे अङ्गनानां। 'करहाट: शिफाकन्द' इत्यमर:। पक्षे करयोर्हाटकं स्वर्णकङ्कणम्। विषाण दन्तं पक्षे शृङ्गम्। 'विषाण पशुशृङ्गेभदन्तयोरि'त्यमर: ॥१७७॥

"पद्मिन्या वराटकस्यापि अप्रदानं जानीहि"। वराटको वीजकोष: पक्षे कपर्द्दक: ॥१७८॥

तद्वाक्ये प्राकृतस्यार्थान्तरे प्रत्युवाच कामिनीति स्वमुखेनैव तव

राधा । (सोत्प्रासं विहस्य) हन्त कूडघट्टमण्डलाहण्डल ! पसीद पसीद । सुलुक्किदे सग्रं च्चेग्र कारुण्णेण गेण्ह इमं जणम् ॥१८०॥

कृष्ण: (स्फुटं विहस्य) चण्डि ! स्वार्थपण्डितासि, यदुपहासमुद्रयैव कृता काकुभङ्गिभरेण भवत्या वास्तवे पर्य्यवसाय्यते । ततस्तथ्यमाकर्णय ॥१८१॥

गव्यभारभरभुग्नकन्धरां, त्वद्विधां विधुरगात्रि मद्विधः ।
स्प्रष्टुमप्यहह लज्जते पदा, दैन्यमाचर न हासदम्भतः ॥१८२॥

राधा । (स्मित्वा) इम च्चेग्र महाविड़म्बणे वि किज्जन्तम्मि सुट्ठु-सक्कारवुद्धिए दप्पुद्धुरदा णाम भणीग्रदि ॥१८३॥

सिङ्गारोइददामा, विग्रक्खणो होसि सव्वदो भद्द ।
कलिदे जम्बुलउड़े, पसादमण्णेण जं फुल्लो ॥ (सर्वा: सशब्दं हसन्ति)

कृष्ण: । सम्प्रति वाणी विश्राम्यतु, पाणीहीरकहारं हरताम् ॥१८४॥

प्रार्थनादिति भाव: । वराटग्रस्सेत्यस्य वराटायेत्यर्थ: । पप्पदानमित्यस्यात्मदानम् ॥१७९॥

शुल्ककृते स्वयमेव कारुण्येन गृहाण इमं जनमिति विरुद्धलक्षणया काका उक्ति: ॥१८०॥

स्फुटं विहस्येति गव्यभारेति विवक्षितश्लोकार्थस्मरणात् । वास्तवे तु न पुनरत्यन्ततिरस्कृतवाच्यो ध्वनिरयमिति ॥१८१॥

पदा चरणेन किं पुन: पाणिना हासदम्भत: उपहासच्छलात् ॥ ८२

"इयमेव महाविड़म्वनेऽपि क्रियमाणे सति सुष्ठु सत्कारवुद्धचा दर्पोद्धुरता नाम भण्यते" ॥१८३॥

"शृङ्गारोपितदामा विलक्षणो भवसि सर्व्वतो भद्र । कलिते जम्वुलगुड़े प्रसादमननेन यत् फुल्ल:" । हे भद्र वलीवर्द्द । 'उक्षा भद्रवलीवर्द्द' इत्यमर: । जम्वुले क्लेदविरसे गुड़े कलिते दत्ते सति मम महानादरोऽयं कृत इति मत्वा फुल्ल: पक्षे मस्तकार्पितमाल्य: अथवा

राधा । पाणिपल्लग्रस्स कुदो वज्जाणं प्फंसणे साहसम् ? ता ग्रलं मुहाडोवेण । एसा तुम्हाणं पेक्खन्ताणं चलिदम्हि ॥१८५॥

कृष्ण: । सुदीर्घकुन्तलपक्षासि, तत. स्फुटमुड्डीय गमिष्यसि ॥१८६॥

राधा । सव्वदाहिसारिग्रासहस्स-सेग्रारद ! णाहं सारी ज उड्डीग्रस्सम् ॥१८७॥

कृष्ण: । लोलाक्षदायभजना,-दष्टापदमभिधृतासि पुर: ।
इति शारी भवसि त्वं, शृङ्खलयिष्याम्यतो भवतीम् ॥
(इति पाणिमाधातुमिच्छति ।) ॥१८८॥

राधा । हद्धी हद्धी ! णूणं एसो महामम्महस्स सेग्राए पहावो, जं पइव्वदाप्फसे पापादो दे भग्र णत्थि ॥१८९॥

सर्व्वतोमङ्गल-शृङ्गारोचितदामा भवसि तथापि जम्बुसम्वन्धिनि लगुड़े गवां पालनार्थं कलिते सत्येव त्वं फुल्ल: । तच्चरितं विड़म्बनमेव आदररूपतया मन्यसे इत्यर्थ: ॥१८४॥

"पाणिपल्लवस्य कुतो वज्राणां स्पर्शने साहसं तदल मुखाटोपेन, एषा युष्माकं प्रेक्षमाणानां चलितास्मि" ॥१८५॥

सुदीर्घा: कुन्तला एव पक्षा यस्या: सा पक्षे कुन्तलपक्ष: केशसमूह: ।"पाश: पक्षश्च हस्तश्च कलापार्था: कचात् पर"इत्यमर: ॥१८६

"सर्व्वदाभिसारिकासहस्रमेवारत नाहं शारी यत् उड्डयिष्ये" । भापाश्लेषेण अभिसारिकासहस्रसेवारत हे वनलम्पट इत्यर्थ: ॥१८७॥

लोलौ अक्षौ पाशकौ तयोर्दायभजनात् अष्टापदं शारिपट्टमभिलक्ष्यीकृत्य धृतासि । 'अष्टापदं शारिफलमि'त्यमर: । पक्षे लोलाक्षस्य चपलनेत्रस्य मम शुल्करूपदायभजनात् हेतोरष्टापद कनकम् । चतुरशीतिलक्षटङ्कानभिलक्ष्यीकृत्य शृङ्खलयिष्यामि । 'शारिबन्धेऽपि शृङ्खल' इत्यमर: । पक्षे वाहुपाशाभ्यामित्यर्थात् ॥१८८॥

"नूनमेष महामन्मथस्य सेवाया: प्रभाव: यत् पतिव्रतास्पर्शे पापात्ते भयं नास्ति" ॥१८९॥

कृष्ण: (स्मित्वा) भाविनि ! सत्य त्वमुत्कोपपतौ वद्धव्रतासि,
अतस्तवोरु-सेवायामभिलाषुकोऽस्मि ॥१९०॥

राधा । (सप्रणयरोषम्) वङ्कविदण्डा-पण्डिद ! विरमेहि । कुलङ्गणाप्फसण क्खु अच्चाहिदप्पदं होदि । ?

कृष्ण: । कुलीनम्मन्ये ! किमहमकुलीनो, यदद्य भवत्यास्तनुस्पर्शोऽपि मेऽनौचितौ ?

राधा । कुलीणजणाणं किर एव्वं चरिदं, जं णिज्जणवणे परवणिदाणं णिरुन्धणेण एदं विड़म्बणम् ?

कृष्ण: । "कामिनि ! परा त्वं वनितासि" इति वनेऽत्र मन्यसे, तेन नितरां वितराद्य घट्टदानम् ।

राधा । मोहण ! जधा तुम्हादिसेण तक्कीयदि, तधा एसो जणो ण होदि ; ता एत्थ भम्मन्तभ्भुअङ्गजुअल-णच्चणेण अहितुण्डिअदालीलाड़म्बरेहिं अलं, दुल्लहा दे एत्थ सुलुक्कभिक्खा ॥१९१॥

कृष्ण: । अयि सुकले वरमधुना, शुल्कं त्वां दातुमुद्यतां प्रेक्ष्य ।
परमोत्सवचटुलेयं, कुरुते भ्रूनर्त्तकी नृत्यम् ॥१९२॥

स्मृत्वेति स्वस्पर्शशङ्कोत्थेन साध्वसेन स्तोभात् तस्या: श्लिष्टकथनाशक्तिमवधार्य्येति भाव: । उत्कोपे उत्कटकोपवति पत्यौ । पक्षे उत्के उत्सुके उपपतौ मयि । यद्वा उत्का त्वं उपपतौ उर्व्वी श्रेष्ठसेवा उर्व्वो: सेवा चेति रहस्यप्रार्थना भङ्गी ॥१९०॥

"हे वक्रवितण्डापण्डित विरम । कुलाङ्गनास्पर्शनं खलु अत्याहितप्रद भवति" "कुलीनजनानां किल एवं चरितं यत निर्जनवने परवनितानां निरोधेन इदं विड़म्वनम्" । अतएव मोहनेति वाम्योक्ता हर्षगर्व्वावहित्था । "मोहन यथा त्वादृशेन तर्क्यते तथा एष जनो न भवति । तदत्र भ्रमद्भ्रूभुजङ्गयुगलनर्त्तनेनाहितुण्डकता लीलाड़म्बरैरलं दुर्ल्लभा तेऽत्र शुल्कभिक्षा" । 'व्यालग्राह्यहितुण्डक' इत्यमर: ॥१९१॥

राधा । (संस्कृतेन)
लोहमय्यलघुकृष्णवर्त्मन:, स्तम्भिनी प्रतिकृति: स्फुरत्यसौ ।
यत्र यान्ति कुहकस्य वन्ध्यतां, भूरिभोगभरितस्य चाशिष: ॥१९३

कृष्ण: । प्रतिमास्यद्भुता राधे वहुलोहमयी ध्रुवम् ।
तत: स्वयंग्रहाश्लेषं चुम्बके मय्युरीकुरु ॥

राधा । (मनाक् परावृत्य)अवेहि अवेहि । (आर्त्त स्वरम्)मा धरेहि ।

कृष्ण: । लक्षैश्चतुरशीत्या हि शुल्कैर्विनिमयं गताम् ।
न यौवतशिखारत्नं कुतस्त्वां धारयाम्यहम् ?
(इति दिधीर्षु: प्रसर्पति)

राधा । (ससम्भ्रममभिनीय साचि विचलन्ती) ॥१९४॥
ललिदे ! तुमं किं क्खु कुदूहलं पेक्खसि ?

नान्दीमुखी । सहि राहे! अलं इमिणा सुट्ठुकुट्टमिदेण । किंत्ति पलायिस्ससि ?

ललिता (पुर: परिक्रम्य) ॥१९५॥

अयि सुकले दानशीले 'सुकलो दातृभोक्तरी'त्यभिधानात् पक्षे शोभनफणावति वरं शुल्कं पक्षे शोभनकलेवरम् ॥१९२॥

असौ मल्लक्षणा कान्ता लोहमयी प्रतिकृति: कनकप्रतिमा 'सर्व्वञ्च तैजसं लौहमि'त्यमर: । श्लेषभङ्ग्या हर्षजातोत्थं स्वाङ्गस्तम्भभारं दर्शयति । कृष्णवर्त्मा वह्नि: कृष्णाश्रयणीयोपायश्च यत् प्रतिमायां कुहकस्य सर्पविशेषस्य आशीषो दंष्ट्रा: बन्ध्यतां यान्ति । पक्षे कुहकस्य कपटिन: आशीषो वाञ्छा भोग: फण: भोगश्च ॥१९३॥

प्रतिमासीति स्पष्टं पक्षे मासि मासि अत्यद्भुता नित्यनवीना वहुल ऊहो वितर्कस्तन्मयी चुम्बके मणौ पक्षे चुम्बनकर्त्तरि । अपेहि अपेहि आर्त्तस्वरं माधारय पक्षे मा मां धारय ॥१९४॥

"ललिते त्वं किं खलु कौतुहलं पश्यसि" । "अलं अनेन कुट्ट-

जईवि दुल्ललिदसीलाणं लुण्ठआणं तुम्हाण दाणगणणापलावं ण क्खु अम्हे कण्णपेरन्ते वि अप्पम्ह, तहवि किंपि भणिदुकामम्हि !

कृष्ण: । कठिने ! कामं भण्यताम् ॥१९६॥

ललिता । (संस्कृतेन)

अमूर्व्रजमृगेक्षणाश्चतुरशीतिलक्षाधिका:
प्रतिस्वमिति कीर्त्तितं सवयसा तवैवामुना ।
इहापि भुवि विश्रुता प्रियसखी महार्घेत्यसौ
कथं तदपि साहसी शठ जिघृक्षुरेनामसि ॥१९७॥

कृष्ण: । (स्वगतम्) वाढ़ं निर्व्वचनीकृताऽस्मि । सुबल ! केयं गभीरधर्म्मापि ध्वनिधोरणी विदूरत्वादस्फुटेव प्रसरन्ती मामुच्चालयति ? (इति सुवलस्य कर्णे लगति ।) ॥१९८॥

सुवल: । एसो कोलाहलस्स प्पहवं विण्णादुं चलिदोम्हि ।
(इति निष्क्रान्त:) ॥१९९॥

मितेन किमिति पलायिष्यसि" ॥१९५॥

तयोर्वाक्चातुर्य्यसुधाम्बुनिधौ चिरं निमज्ज्य पुन: सखी प्रार्थितसाहाय्या ललिता साटोपमाह "यद्यपि दुर्ल्ललितशीलानां लुण्ठकानां युष्माकं दानगणनाप्रलापं न खलु वयं कर्णप्रान्तेऽप्यर्पयामस्तथापि किमपि भणितुकामास्मि" ॥१९६॥

सवयसा मधुमङ्गलेन पूर्व्वं चतुरशीति जीवजात्यादीना प्रतीस्वं प्रत्येकं इहापि आसु मध्ये इत्यर्थ: ॥१९७॥

सव्याजत्मुकर्णो भर्वान्नति झटिति प्रतिवचनाशक्त्या ललिता वाक्यानवधानमभिनयति । कर्णे लगतीति । यद्यसौ महासैन्यसंमर्द्दो भवति तदा तत्र गत्वा सर्व्वमेव राजानमावेद्य मयि शासनपत्रिकामानीयतामिति ता: समभ्युहयति ॥१९८॥

कृष्ण: । कठोरभाषिणि ललिते ! भवतु भवत्या: सखी चतुरशीतिलक्षाधिका, तथापि कोटिं नातिक्रमिष्यत्येव । तत: परैरपि कलालक्षैस्त्वामवश्यं नागरचन्द्रोऽयं योजयिष्यति ॥२००॥

राधा । णन्दीमुहि ! भअवदीए णिदेसस्स पड़िवालणं साहु संवुत्तं, जं कोडिगुणीभुद च्चेअ घट्टदाणम् ॥२०१॥

नान्दीमुखी । सहि राहे ! कहं पड़िवालणं ण संवुत्तं, जं सुलुक्कस्स तिहाओ गेण्हीअदि ? ॥२०२॥

(प्रविश्य सवयस्य:)

सुवल: । पिअवअस्स ! णिअवाहिणी-णिग्घोस-वहिरोकिददिसामण्डला विजेन्ति उज्जाणचक्कवट्टिसीहा ओ ।

कृष्ण: । प्रियवयस्य उज्ज्वल ! नूनं लेखहारोऽसि चक्रवर्त्तिनाम् ॥२०३

उज्ज्वल: । अधइम् । महाभट्टारअस्स महाघट्टाहिआरे एसो लेहो ।
(इति कृष्णकरे केतकीकोरकपत्रमर्पयति ।)

"एप कोलाहलस्य प्रभावं विज्ञातुं चलितोऽस्मि" ॥१९९॥

ततो मनसि विभाव्य प्राप्ततदनुरूपोत्तरो ललितामाह कठोरेति कलालक्षै: षोड़शलक्षैरिति अशीतिलक्षपरिमितस्य चतुर्थांशो घट्टपालेन न्यायतो लक्ष्यत एवेति भाव: । योजयिष्यतीति त्वामपि शुल्कान्त:पातयिष्यति पक्षे चन्द्रस्य स्वाभि: षोड़शभि: कलामि: योजनं आत्मसात्कार एव ॥२००॥

"नान्दोमुखि भगवत्या निदेशस्य प्रतिपालनं साधु संवृत्तं, यत् कोटिगुणीभूतमेव घट्टदानम्" ॥२०१॥

"सखि राधे कथं प्रतिपालनं न सम्वृत्तम् । यत् शुल्कस्य त्रिभागो गृह्यते" समुचितेऽपि प्रतिटङ्कं हेमटङ्कत्रये स्फुटमेकटङ्कनिष्टङ्कनेन गणयेत्युक्तत्वात् ॥२०२॥

"प्रियवयस्य निजवाहिनी निर्घोपवधिरीकृतदिङ्मण्डला विजयन्ते उद्यानचक्रवर्त्तिसिंहा:" ॥२०३॥

वृन्दा। नागरेन्द्र ! वयमप्याकर्णयितुमिच्छामो वर्णद्रूतम्, तन्मुख-बन्धमुत्सृज्य कार्य्यमेव समुच्चार्य्यताम्।

कृष्णः। (स्पष्टं वाचयति) ॥२०४॥

पाण्डित्यं चण्डधाम्नः परिचरणविधौ प्राप्य गूढ़ोरुगर्व्वाः
कुर्व्वाणा घट्टघातं घटितनिकृतयः सुभ्रुवो विभ्रमन्ति ।
कर्त्तव्यस्तासु यत्नः पटिमपरिचयादप्रमत्तैर्भवद्भि-
र्द्राघिष्ठं छद्म दृष्ट्वा किमपि शतगुणस्तत्र शुल्को विधेयः ॥२०५॥

नान्दीमुखी । दाणिन्द ! पइदिविसुद्धाणं इमाणं कुदो कूडलेस-सिक्खाहिलासो वि ? ॥२०६॥

कृष्णः। तथाप्यवश्यमनुष्ठेयमिति कान्ताराधिराजस्य तस्य महा-शासनम्। हन्त चित्रमिदम् यदेतत् सम्यगनिवृत्त-शैशवानामप्य-मूषां निर्भरमुच्छूनमुरः समीक्षते । कथं वा वराम्वरसंवृतादपि वक्षसः काञ्चनमय्यो मयूखवीचयः सञ्चरन्ति ? ॥२०७॥

(राधा साभ्यसूयं तिरो दृगन्तं पातयति ।)

कृष्णः। (सकौतुकमात्मगतम्।)

पटोन्नमनलीलया पुलकवृन्दमारुन्धती
स्मितन्त्वधरचातुरीपरिचयेन गान्धर्व्विका ।

"अथ किं महाभट्टारकस्य महाघट्टाधिकारे एव लेखः" ॥२०४॥

घटितनिकृतयः कृतशाठ्याः'कुसृतिर्निकृतिः शाठ्यामि'त्यमरः २०५

"दानीन्द्र प्रकृतिविशुद्धानां आसां कुतः कूटलेशशिक्षाभिलापो-ऽपि" । कूटं कपटम् ॥२०६॥

वराम्वरसंवृतादिति सम्वरणान्यथानुपपत्त्या तत्रैव वहूनि सुव-र्णानि निह्नुतानि लक्ष्यन्ते इति भावः ॥१०७।

पुलकवृन्दमिति मन्निभालनजनित-स्थायिभावकामविकारोत्थम्। स्मितमिति हर्षोत्थं मृषा भ्रूकुटीत्यवहित्थया अमर्षनिर्म्माणं कुट्ट-

मृषा भ्रुकुटिवन्धुरीकृतमुखी मदुक्ति-श्रवा-
न्निरस्यति दृगञ्चलभ्रमिभिरत्र रुष्टेव माम् ॥२०८॥

(प्रकाशम्) साधु महोद्यानचक्रवर्त्तिन् ! साधु साधु। सत्येयम् 'उपर्य्युपरिवुद्धीनां चरन्तीश्वरवुद्धयः' इति प्रसिद्धिः । नान्दी-मुखि ! पश्य पश्य, पञ्चभिरमूभिर्विंशतेरर्द्धाञ्छातकुम्भकुम्भान् वक्षसि कौशलेन निह्नुवानाभिः कृतिनोऽपि घट्टाधिकारिणः प्रतार्य्यन्ते ॥२०९॥

सर्व्वाः। (संरम्भेण भ्रूकार्म्मुकाणि कुटिलीकृत्य साक्रोशम्) रद-हिंडअ ! हिण्डेहि णिअमण्डवम् ॥२१०॥

कृष्णः (अपवार्य्य) वृन्दे ! विलोकय कुञ्चितभ्रुवं पञ्चमुखीम् ।

(इति सगद्गदम्)

कामः काञ्चिदवाप्य पञ्चमुखतस्तीव्रां व्यथामुग्रतः
सौम्यां पञ्चमुखीं भजन् ध्रुवमिमा लब्धोरुविद्यः कृती ।
भ्रूचापेषु समं कटाक्षविशिखान् पञ्चार्पयन् पञ्चसु
क्रुद्धः पञ्चमुखोग्रविक्रममसौ मां हन्तुमुद्यच्छते ॥२११॥

(इत्युद्घूर्णां नाटयति ।)

मितमिदम्। यदुक्तम्। 'स्तनाधरादिग्रहणे हृत्प्रीतावपि संभ्रमात् । वहिःक्रोधो व्यथितवत् प्रोक्तं कुट्टमितं वुधै'रिति ॥२०८॥

विंशतेरर्द्धान् दश शातकुम्भकुम्भान् कनककलसान् प्रत्येकमेव द्वितयधारणादिति भावः ॥२०९॥

"रतहिण्डक हिण्ड निजमण्डपम्" । स्त्रीचौरो रतहिण्डकः हिण्ड गच्छ ॥२१०॥

पञ्चमुखीं पञ्चमुखानि समाहृतानि पश्य। सगद्गदमिति निजा-नन्दमवधाप्यतामानन्दयितुं तेन च त्वया एव मम सुखोपाये भूयोऽपि यतनीयमिति व्यज्यते। पञ्चमुखतः पञ्चभ्यो मुखेभ्यः उग्रत उग्रेभ्यो

मधुमङ्गलः । (अपवार्य्य) हन्त, कीस विम्हलन्तं वि अत्ताणअं ण रुन्धसि, जं कड्क्खिज्जम्ह जिम्हदिट्ठीहिं किसोरिआहिं ? ॥२१२

कृष्णः (सावहित्थम्) सखे मधुमङ्गल ! कुटिलभ्रुवां कौटिल्य-वैचित्रीभिर्विस्मिताऽस्मि । भवतु, किं नस्तेन ? कैतवनिह्नु-तानां हिरण्मयपङ्क्तिकुम्भानां शुल्कं द्विगुणीकृत्य पुनः पञ्च-दशानामेव शतगुणीक्रियताम् ।

मधुमङ्गलः । सुणाहि, राअउलस्स विन्दचउट्ठअं, अहिआरिणो सव्वविज्जागुरुणो दे कलाकोडी, संखाहिण्णस्स काअत्थस्स मे तत्तकोडी, सुअल-पहुदीणं दण्डिआणं पसुवालाणं पसुवई-कोडीत्ति ।

कृष्णः । सम्भूय वृन्दपञ्चकं सिद्धम् ॥२१३॥

वस्तुत उग्रात् महादेवात् कीदृशात् पञ्चमुखतः पञ्चसु भ्रूचापेषु सम सहैव पञ्चमुखात् सिंहादप्युग्रो विक्रमो यस्य तम् ॥२११॥

"कस्मादिव विह्वलमप्यात्मानं न रुणत्सि । यत् कटाक्षामहे जिह्मदृष्टिभिः किशोरिकाभिः" । कर्म्मणि प्रत्ययः अस्मान् कटाक्ष कुर्व्वन्ति एते पराजिता इति कटाक्षविषया क्रियामहे ॥२१२॥

किं नस्तेनेति मय्यपि तदपि कटाक्षेणानादरो यतस्तेनापराधेन द्विगुणीकरणं इत्यर्थः । पङ्क्तिकुम्भानां दशकलसानां शुल्कस्य द्विगुणीकरणे विंशतिलक्षाधिकं कोटित्रयं भवति । तस्य च प्रकट-पञ्चकलसस्य शुल्केन अशीति लक्षमितेन मिलनेन कोटिचतुष्टयम्, तस्य शतगुणीकरणे वृन्दचतुष्टयं भवतीति गणनेन निष्टङ्कयाह शृणु राजकुलस्य वृन्दचतुष्टयम् । तत्र राजस्व-चतुर्थांशो घट्टपालवर्त्तन-मिति । स च घट्टपालसर्व्वाधिकारि कायस्थदण्डधारिण इति त्रित-यात्मकः । तत्र यथान्यायं विभज्य ते अधिकारिणः सर्व्वविद्यागुरो-स्तव कलाकोट्यः चतुःषष्टिकोट्यः विद्यानां चतुःषष्टिसंख्यत्वात्

राधा । (स्मितं कृत्वा) तुम्हाणं भाअणाइं ण दीसन्ति, कहिं माइस्सन्ति एत्तिआइं वित्ताइम् ॥२१४॥

कृष्णः । नर्म्मणा कृतमेतेन कर्म्मणा स्वयमर्पय ।
हर्षादुदितवर्ष्मात्र वित्तं हरिणलोचने ॥२१५॥

नान्दीमुखी । (कृष्णान्तिकमासाद्य सासूयमिव) मोहण ? अम्ह-भअवदीए सिणेहभाअणाणं उज्जुआणं एदाणं वालाणं कास अलिअं च्चेअ पन्तिकुम्भाण दाण तुए वड्ढीअदि ?

कृष्णः । नान्दीमुखि ! न कदाप्यलीकमिदम्, सत्यमेव पञ्चेमाः पञ्चदशकलसीविलासभाजः ॥२१६॥

नान्दीमुखी । णाअरिन्द ! महाव्वदिणीए पव्वइआए परिअणो मादिसो जणो णिद्धारिदं अजाणिअ ण क्खु विण्णवेदि ।

उचिता एवेति भावः । संख्याभिज्ञस्य कायस्थस्य मम तत्त्वकोट्यः । संख्याशास्त्रविदां तत्त्वानि पञ्चविंशतिसंख्यान्येव भवन्तीति "सुवल-प्रभृतीनां दण्डिकानां पशुपालानां पशुपतिकोट्य एकादशकोट्यः" पशुपाला रुद्रा एकादश भवन्तीति । वर्त्तनभूतवृन्दमेव त्रिधा विभक्तम् ॥२१३॥

"युष्माकं भाजनानि न दृश्यन्ते क मास्यन्ति इयन्ति वित्तानि" तेन प्रथमं मधुमङ्गलद्वारा व्रजान्महाशकटादयस्तद्वाहका वृषमहिष-खरोष्ट्राश्चानीयन्तामिति द्योतितम् ॥२१४॥

उदितं उदययुक्तं वर्ष्म देहं उदितवर्ष्म उक्तप्रमाणं वित्तं धनं पक्षे वित्तं ख्यातम् । 'वर्ष्मदेहप्रमाणयोरि'त्यमरः ॥२१५॥

"मोहन अस्मद्भगवत्याः स्नेहभाजनानां ऋज्वीनां कस्मादली-कमेव पङ्क्तिकुम्भानां दानं त्वया वर्द्धते" ॥२१६॥

"नागरेन्द्र महाव्रतिन्याः प्रव्रजितायाः परिजनो मादृशो जनो निर्द्धारितमज्ञात्वा न खलु विज्ञापयति । तदपि यदि मम वचने

तहवि जइ मह वअणे सन्दिहाणोसि, तदो सअं च्चेअ आअदुअ पच्चक्ख पेक्ख। (इति कृष्णेन सह राधामुपेत्य) हला राहि ! एसो दुल्ललिदो गोउलिन्दणन्दणो सदिव्व वि मह वअणं ण पत्तिआएदि। ता पसीद, ईसि अम्बर उक्खिविअ णिअव-क्ख-पेरन्तं पेक्खावेन्ती मोआवेहि हट्ठिल्ल सेहरस्स हत्थादो सहपरिवारं अप्पाणम् ॥२१७॥

सर्व्वाः ! (साभ्यसूयम्) अवेहि दुब्बुद्धिए ! अवेहि ॥२१८॥

नान्दीमुखी। (स्मित्वा) कध हिदकधणे वि कुप्पध ?

कृष्णः। किं नश्छिन्नम्, यदत्र काञ्चनरक्तिकमपि न परिहरिष्यति हरिः।

विशाखा (स्वगतम्) पढमं कण्हस्स दूदिअं वुन्दं च्चेअ सुलुक्के उव-जुज्जन्ती दोवसिहाए अग्गिणो पूअण आरम्भिस्सम् ॥२१९-२२०

सन्दिहानोऽसि तदा स्वयमेवागत्य प्रत्यक्ष पश्य"। "हला एप दुर्ल्ललितो गोकुलेन्द्रनन्दनः सदिव्यमपि मम वचनं न प्रत्येति तत्प्रसीद ईषदम्बरं उत्क्षिप्य निजवक्षःप्रान्तं प्रेक्षयन्ती मोचय हठिल्लशेखरस्य हस्तात् सपरिवारमात्मानम्" ॥२१७॥

"अपैहि दुर्ब्बुद्धिके अपैहि" त्वमेवानर्थकारिणीति भद्रेणैव वयं विघ्न इताऽपसृत्य कचिदेकान्ते निजवक्षःप्रान्तं दर्शयेति भावः ॥२१८॥

"कथं हितकथनेऽपि कुप्यथ" दुर्व्वारोऽयं महाहठिल्यः स्वहस्तेनैव कञ्चुलिकामुद्घाट्य युष्मद्वक्षो द्रक्ष्यत्येव तदसमञ्जसमिति मत्वा मयैवोक्तं कोऽत्रापराध इति भावः।

"प्रथमं कृष्णस्य दूतीं वृन्दामेव शुल्के उपयुञ्जाना दीपशिखया अग्नेः पूजनमारप्से" उपयुञ्जाना कृष्णायार्पयन्ती दीपशिखयेति। तदीयामेव वृन्दां तस्मै ददामीति नास्माकं कोऽप्यपचय इति भावः ॥२१९-२२०॥

(प्रकाशम्)

णाअरिन्द ! कहिं पञ्चघिअघडिआओ, कहिं एत्तिअं घडिदं घट्ट-सुलुक्कम् ? होदु, तधवि उवआरिणं राअकुमरं तुमं अवेक्खिअ एत्थ णिक्कए अम्हेहिं णिअ-पिअसही वुन्दा तुह अप्पिदा ॥२२१॥

सुवलः (संस्कृतेन) वृन्दपञ्चतये युक्तमेकवृन्दार्पणं कथम् ?
संख्याविदां न नः शक्यं गोसंख्यानां प्रतारणम् ॥२२२॥

ललिता (रोषमिवाभिनीय) विसाहे ! सुट्ठु मुद्धासि, जं लहुए इमस्सिं अत्थे गुरुईए अप्पणो सहीए वुन्दाए अप्पणं कादुं इच्छसि ॥२२३॥

मधुमङ्गलः। ललिदे ! चिट्ठदु एदं अलिअ-माहप्पम्।

ललिता। वडुअ ! सुणाहि, 'तेत्तिसकोडिसुराणं सआसादो सुरिन्दो

"नागरेन्द्र क पञ्च घृत-घटिका क एतावद्घटितं घट्टशुल्कं भवतु तथापि उपकारिणं राजकुमारं त्वामपेक्ष्य अत्र निष्क्रये अस्माभिर्निजप्रियसखी वृन्दा तुभ्यमर्पिता" ॥२२१॥

वृन्द-पञ्चतये प्रस्तुते दातव्ये सति एकस्य वृन्दस्यार्पणं कथं युज्यते इत्यर्थः। गोसंख्यानां गोपानां श्लेषेण गोत्व पृथिव्यां सम्यक् ख्यातिमतां संख्याविदां कायस्थानाम् ॥२२२॥

रोषमिति वृन्दायाः स्वीयत्वानर्घत्वाभ्यां दातुमशक्यत्वव्यञ्जनया कृष्णेन सश्रद्धमत्याग्रहेण तां ग्राहयितुमिति भावः। इवेति तस्यां स्वीयत्वाभावात् वस्तुतो रोषाभावात् प्रत्युत दानसमाधाननिष्पत्तेरन्तः ससाधुवादमेवेति भावः। विशाखे सुष्ठु मुग्धासि यत् लघावस्मिन्नर्थे गुर्व्यात्मनः सख्या वृन्दाया अर्पणं कर्त्तुमिच्छसि ॥२२३

ललिते तिष्ठतु एतदलीकमाहात्म्यं वटो शृणु वटो इति प्रक्रान्तमर्थमनुसृत्य अनुरूपप्रत्युत्तरदानासमर्थेति भावः। यद्वा प्रक्रमिष्य-

वरिट्ठो, जं एसो सअकोडिहत्थो। तदो वि भअवन्तो हिरण्ण-गब्भो, जं एसो दिपरद्धवेहवो। तदो वि देई लच्छी, जं एसा सव्वसपत्तीणं ईसरी। तदो वि वुन्दा, जा किर लच्छीं वि तुच्छीकदुअ काए वि अउरुव्वसिरिए लुद्धेण विण्हुणा कामिद' त्ति भअवदीए मुहादो सुणीअदि ॥२२४॥

विशाखा। (पदे निपत्य काकुमातन्वती) सहि ललिदे ! महुरं मन्तेसि, तधावि तक्कालिअ दुस्सहदुक्खं परिहरिदुं एव्वं अजुत्त वि कादुकामम्हि। ता पसीद, अणुमण्णेहि वुन्दासमप्पणे, पुरोडास-उग्घाणेण तुण्ण पुणम्ह अत्ताणअम्।

(ललिता स्मेरेव शिरा विनमय्य तूष्णीं तिष्ठति।) ॥२२५॥

विशाखा। ललिदे ! विण्णादं दे आऊद, ज एक्कं दिअहं च्चेअ अणुमण्णेसि ॥२२६॥

कृष्णः। हन्त नान्दीमुखि ! दृष्टमत्यद्भुतं भवत्या। ततः पृच्छयता-

---

गाणमर्थमपेक्ष्य अल्पज्ञेत्यर्थः। त्रयस्त्रिंशत्कोटिसुरेभ्यः सुरेन्द्रो वरिष्ठः, यदेष शतकोटिहस्तः शतकोट्योऽपि हस्ते यस्य स महासम्पन्न इत्यर्थः। पक्षे वज्रपाणिः। "ततो हिरण्यगर्भो भगवान् यदेष द्विपरार्द्ध-वैभवः। ततोऽपि देवी लक्ष्मी यदेषा सर्व्वसम्पत्तीनामीश्वरी ततोऽपि वृन्दा या किल लक्ष्मीमपि तुच्छीकृत्य कयाप्यपूर्व्वश्रिया लुब्धेन विष्णुना कामिता इति भगवतीमुखात् श्रूयते"। तेन पञ्चवृन्दमात्र टङ्केषु देयेषु ईदृशी वृन्दा दातुमयोग्येति भावः ॥२२४॥

पदे निपतितेति कृष्णे स्वस्य पक्षपातं विज्ञापयितुं तेन च तं प्रसन्नीकर्त्तुं "ललिते मधुरं मन्त्रयसि तथापि तात्कालिकं दुःसह-दुःखं परिहर्त्तुं एवमयुक्तमपि कर्त्तुंकामास्मि तत् प्रसीद अनुमन्यस्व वृन्दासमर्पणं पुरोडासावघ्राणेन तूर्णं पुनीम आत्मानम्" ॥२२५॥

"ललिते विज्ञातं ते आकूतं यदेकं दिवसमेवानुमन्यसे" ॥२२६॥

मिति कथमेताभिर्म्मत्कर्णयुगारब्धताण्डवयोर्म्मकरकुण्डलयो-र्द्वन्द्वं न शुल्कितम् ॥२२७॥

नान्दीमुखी। कित्तिदा-कित्तिदाइणि राहिअ ! अजुत्तं क्खु एद ज वणमालिणो च्चेअ वुन्दाए इमस्स सुलुक्कप्पणम् ॥२२८॥

राधा। सहि वुन्दे ! किंत्ति तुण्हीं चिट्ठसि ? तुण्णं अप्पणो पक्खं उल्लासेहि। (कृष्णः वृन्दावक्त्रमवलोकयति)

वृन्दा। नागरेन्द्र ! कृतं निरर्थकं दृशस्ताण्डवेन, यदियं वृन्दा वृन्दा-वनेश्वरीमनुवर्त्तते।

सर्व्वाः (सोत्प्रासं विहस्य) भअवदि लज्जे ! कहिं गदासि ? पसीद, पसीद।

वृन्दा। सखि वृन्दावनेश्वरि ! ममात्र काचिद्विज्ञप्तिरत्राप्तावसरा वर्त्तते ॥२२९॥

राधा। सहि वुन्दे ! कोदिसी एसा भणीअदु।

वृन्दा। द्यूतकारसंसदोऽपि भुयिष्ठं घट्टपालगोष्ठी साधुभिरभितः श्लाघ्यते, तदत्र न समञ्जसः। प्राञ्जलोऽयं जनः, विक्रयोपक्रमश्चेत् क्वचिदन्यत्र विक्रीयताम् ॥२३०॥

न शुल्कितं न शुल्कीकृतं ममैव वृन्दां यदि मह्यमर्पयन्ति तर्हि लास्यवतो मन्मकरकुण्डलयोर्द्वयमेव मह्यं ददात्विति भावः ॥२२७॥

"कीर्त्तिदाकीर्त्तिदायिनि राधे अयुक्तं खल्विदं यत् वनमालिन एव वृन्दाया अस्मै शुल्कार्पणम्" ॥२२८॥

"सखि वृन्दे किमिति तूष्णीं तिष्ठसि तूर्णमात्मनः पक्षमुल्ला-सय" ॥२१९॥

द्यूतकारसभायाः सकाशादपि घट्टपालगोष्ठी श्लाघ्यते इति दुरा-चारत्वेनेति भावः। विरुद्धलक्षणया वा स्वयं मल्लक्षणो जनः प्राञ्जलः सरलः। शुल्कार्थं विक्रयस्य आरम्भश्चेत् ॥२३०॥

कृष्ण: (सस्मितम्) सत्यममूरसंभुक्ता एवाप्रतिमपूर्णलक्ष्मीभरा: सुभ्रुवो राजकुलकार्य्यमर्हन्ति । वृन्दा तु विष्णुना सुचिरं सभुज्य निर्भरमपारेण वैभवेन रिक्तीकृता, तदलमेतया ।

राधा (विहस्य) एदं क्खु 'अलाभादङ्गनात्यागस्तुरङ्गब्रह्मचर्य्यकम्' त्ति धोरेहिं भणीअदि ॥२३१॥

मधुमङ्गल: (जनान्तिकम्) विसाहे ! णिच्चिदं तुम्हाणं घट्टदाणे अणुऊलो हुविस्सं, जं काअत्थविज्जापारंगदो म्हि, ता देहि मे किंपि पारितोसिअम् ॥२३२॥

विशाखा । अज्ज ! णव्वं सक्करं दाइस्सम् ।

मधुमङ्गल: । विसाहे ! णूणं परिहससि ।

विशाखा । भअवन्तस्स सूरस्स सवामि ॥२३३॥

मधुमङ्गल: । (सहर्षं कृष्णमभ्युपेत्य) पिअवअस्स ! माणसमए पमदासअकोडि-रोसभञ्जणे विअक्खणो म्हि । दीवाअलीकोदुए सुरहीसअकोडिपूआवणे आचारिओ म्हि । ता दिज्जउ अज्ज महामहूसवे मज्झ अणब्भत्थिदपुव्वा सअकोडिदक्खिणा ।

(कृष्ण: स्मित्वा तूष्णीं तिष्ठति ।) ॥२३४॥

मधुमङ्गल: । (अपवार्य्य) विसाहे ! 'मौनं सम्मतिलक्षणम्' त्ति

अप्रतिम: अनुपम: पूर्णलक्ष्मीभरो यासां ता: ॥२३१॥

"विशाखे निश्चितं युष्माकं घट्टदाने अनुकूलो भविष्यामि यत्-कायस्थविद्यापारं गतोऽस्मि तत् देहि मे पारितोषिकम्" ॥२३२॥

"आर्य्य नव्यां शर्करां दास्यामि" "नूनं परिहससि जानामि" "भगवते सूर्य्याय शपामि" ॥२३३॥

"प्रियवयस्य मानसमये प्रमदाशतकोटिरोषभञ्जने विलक्षणोऽस्मि दीपावलीकौतुके सुरभीशतकोटिपूजायां आचार्य्योऽस्मि तद्दीयतां अद्य महामहोत्सवे मह्यं अनभ्यर्थितपूर्व्वा शतकोटिदक्षिणा" ॥२३४॥

जाणासि च्चेअ. ता देहि परिस्सुदम् । (इत्यञ्जलिं प्रसारयति ।)

विशाखा ।(स्मित्वा)गेण्हिअदु एसा सक्करा ।(इति कर्परां समर्पयति)

मधुमङ्गल: । (उच्चैर्विहस्य) धुत्ते ! चिट्ठ चिट्ठ, णिक्किदिं वो करिस्सम् । ! (इति कृष्णान्तिक मासाद्य) पिअवअस्स लहुआम्मि कज्जे अल विलम्बेण गेण्ह सुलुक्कम् ॥२३५॥

कृष्ण: । सखे मधुमङ्गल ! मधुसूदनोऽस्मि, तदेषा राधिकाख्यां गता भ्रमरी शुल्कार्थमादेया ।

वृन्दा । फुल्लेयं चम्पकलतैव सतृषो मधुसूदनस्योचिता ।

कृष्ण: । वृन्दे ! तत्त्वानभिज्ञासि, राधा खल्वभिरूपा या विपरोतापि धारा माध्वीकमयी सम्पद्यते ॥२३६॥

चित्रा । गोउलवीरवरेण्ण ! अप्पडिम-पुण्णलच्छीभराओ इमा ओ त्ति सअं च्चेअ समत्थिदं, ता विन्दपञ्चएण कधं अम्हाणं एक्कदमा गेण्हीदुं जुत्ता ? ॥२३७॥

वृन्दा । सखि चित्रे ! श्लाघ्यासि, यदेष विशृङ्खल: कोमलवाग्वल्ली-

---

तद्देहि प्रतिश्रुतम् । स्मित्वेति शर्करा कर्परांशेऽपि इति नानार्थवर्गात् । यथा यदेव मया प्रतिश्रुतं तदेव दीयते नीयतामिति अभिप्रायात् । धूर्त्तेति मम तु सरलविप्रस्य खण्डलिप्सया शब्दार्थस्यान्यथाकरणं कौटिल्यज्ञान नैवासीदिति भाव: । "निष्कृतिं व: करिष्यामि । प्रियवयस्य लघुनि कार्य्ये अलं विलम्बेन गृहाण शुल्कम्" ॥२३५॥

मधुसूदनो भ्रमर: विष्णुश्च रेफेणाधिख्यां गता रेफद्वयवन्नाम्नीत्यर्थ: । पक्षे राधिकाख्या नामा भ्रमरी कामिनी ॥२३६॥

"गोकुलवीरवरेण्य अप्रतिमपूर्णलक्ष्मीभरा इमा इति स्वयमेव समर्थितम् । तद्वृन्दपञ्चकेन हेतुना कथमस्माकमेकतमा गृहीतुं युक्ता" ॥२३७॥

पल्लवेन भवत्या स्तम्भितो गम्भीरवेदी स्तम्बेरमः ॥२३८॥

मधुमङ्गलः । पिअवअस्स ! सअगुणो सुलुक्को त्ति एत्थ असंखवाइणो सअ-सद्दस्स पन्तिदहम्मि पज्जवसाणं कुणन्तेहिं अम्हेहिं तस्स उज्जाणचक्कवट्टिणो सुट्ठु अवरद्धम् ॥२३९॥

कृष्णः । सखे ! साधु साधु । प्रियार्थरसमाधुरीमुपभोजयन् कायस्थिका-रसवतीपौरगवोऽसि । सत्यमसंख्यान्येव वित्तानि चक्रवर्त्तिवराणामभिप्रायेण क्रोड़ीकृतानि ! तथा च स्मर्य्यते—

'द्राघिष्ठे छद्मनि ज्ञाते प्रकृत्या गर्व्वशालिनाम् ।
अत्युन्नतश्रियोग्राणां यथेष्टं दण्ड इष्यते' ॥२४०–२४१॥

ललिता । दण्डेण विणा क्खणं वि गोवाणं णत्थि ओलम्बो, ता जुत्त जेव्व दण्डग्गहणम् ॥२४२॥

गम्भीरवेदी दुर्व्वारमदस्तम्बेरमः हस्ती । यदुक्तं त्वग्भेदात् शोणितश्रावात् मांसस्य व्यधनादपि । संज्ञां न लभते यस्तु गजो गम्भीरवेद्यसौ ॥२३८॥

"प्रियवयस्य शतगुणशुल्क इत्यत्रासंख्यवाचिनः शतशब्दस्य पङ्क्तिदशके पर्य्यवसानं कुर्व्वद्भिरस्माभिस्तस्मै उद्यानचक्रवर्त्तिने सुष्ठु अपराद्ध" तस्मै कापयितुमित्यर्थस्तस्येति वा ॥२३९॥

प्रियोऽर्थप्रयोजनं येषु एवम्भूता ये रसास्तन्माधुरीं पक्षे प्रिया श्रीराधिका सैव अर्थः प्रयोजनं येषु तद्रसमाधुरीम् । पौरगवः पाककर्म्माध्यक्षः ॥२४०॥

स्मर्य्यते इति स्मृतिशास्त्रवचनमेवात्र प्रमाणमस्तीति भावः । द्राघिष्ठे अतिदीर्घतमे । अत्युन्नतया श्रिया उग्राणाम् ॥२४१॥

"दण्डेन विना क्षणमपि गोपानां नास्त्यवलम्बः तद्युक्तमेव दण्डग्रहणम्" ॥२४२॥

कृष्णः । यद्यपि पञ्चभिरपि न शुल्कपर्य्याप्तिस्तथापि द्वितीयैव मम रक्षणीया, या खलु चन्द्रलेखोन्मीलनक्षमा ॥२४३॥

राधा । (सोत्प्रासं विहस्य) हन्त हन्त, देवदोवासणस्स कुसुमं ओचिणन्तीण खञ्जणच्छीणं खेमं क्खु वुन्दारण्ण उम्मदेण इमिणा एक्केण महाकलहिन्देण सव्वं आक्कमिअ भअङ्करं किदम् । केअलं सेलिन्दस्स उवसल्लमेत्तं ओलम्बणं आसि । हद्धी हद्धी, एत्थ वि दाणिन्दारम्भदम्भेण वट्टपाडिदा आरद्धा । कस्स विण्णविस्सम्ह ?

कृष्णः । नान्दीमुखि ! तव कर्णमधिरूढ़ासौ गुर्व्वी गिरामनर्गलता, यदत्र सन्मार्गरक्षा-प्रख्यातविशुद्धो मय्यपि वत्मपातिता-परिवाद-कालिमाध्यास-साहसिता, तदेनां दोर्द्दण्डयुगलेन गाढ़ं पाड़यामि ॥२४४॥

नान्दीमुखी । (पुरोऽवस्थाय वारयन्ती) सुवीर ! महातावसीपरिवारस्स मे समक्ख अक्खमं एदं कुलबालापोड़म् ॥२४५॥

कृष्णः । गोष्ठमहेन्द्रकुमारश्चूड़ामणिरस्मि मुहुरहयुनां, कथमुन्मदयुवतीनामुपेक्षिताहेऽद्य दर्पक्रोष्माणम् ? ॥१४६॥

द्वितीयैव ललितामपेक्ष्य ललिता एका राधा द्वितोयेत्यर्थः, पक्षे द्वितीया तिथिः । चन्द्रलेखा चन्द्रकला । पक्षे नखाङ्कः ।२४३॥

"हन्त देवनोपासनाय कुसुमविचिन्वतोनां खञ्जनाक्षीणां क्षेमं खलु वृन्दावनं उन्मदेन एकेन महाकलभेन्द्रेण सर्व्वमाक्रम्य भयङ्करं कृतम् । केवलं शैलेन्द्रस्य उपशल्यमात्रं अवलम्बनमासीत् । हा धिक् हा धिक् तत्रापि दानीन्द्रारम्भदम्भेन वर्त्मपातिता आरब्धा कस्मै विज्ञापयिष्यामहे" राजपुण्डूस्यास्य को नियन्तेति भावः ॥२४४॥

"महातापसीपरिवारस्य मे समक्षं अक्षमं खलु एतत् कुलबालापीड़नम्" ॥२४५॥

अहंयूनां अहङ्कारवताम् । 'अहङ्कारवानहंयुः स्यादि'त्यमरः । पक्षे

ललिता। कण्ह ! सच्चं कधेसि । एत्थ णावरज्झसि तुमम् । घट्टीदेईए ज्जेव एसो अपुव्वो कोवि पसादो, जेण सक्कुलकुमरो वि धुत्तधुरीणाणं वि सुट्ठु विम्हावणीं कञ्चणविज्जं झत्ति अज्झाविदोसि ॥२४७॥

कृष्णः। (साटोपम्)

घट्टाधिराजमवमत्य विवादमेव,
यूय यदाचरथ शुल्कमदित्समानाः ।
मन्ये विधित्सथ तदत्र गिरेस्तटेषु,
दुर्गेषु हन्त विषमेषु रणाभियोगम् ॥२४८॥

राधा। मोहण ! केत्तिअ सहिस्सम्ह ? जं 'अतिनिर्म्मथनादग्निश्चन्दनादपि जायते' त्ति वअणं पमाणम्। ता एत्थ अम्हद्दूसण ण देअम् ॥२४९॥

कृष्णः।

अपटुभ्रमकारिणीभिराभिः, कुटिनाटीभिरलं प्रसीद देवि ।
वितराद्य धनानि वा मदिष्टा,-न्यनुतिष्ठातनुसङ्गरक्रियां वा ॥२५०

यूनां मध्ये अहं चूड़ामणिः । दर्पकस्य गर्व्वस्य उष्माणं उष्मत्वं तैक्ष्णमित्यर्थः। पक्षे कामोद्रेकम् ॥२४६॥

"हे कृष्ण श्लक्ष्नं कथयसि अत्र नापराध्यसि त्वम्, घट्टीदेव्या एव एष अपूर्व्वः कोऽपि प्रसादः, येन सत्कुलकुमारोऽपि धूर्त्तधुरीणाणां सुष्ठु विस्मापनीं काञ्चनविद्यां झटिति अध्यापितोऽसि" ॥२४७॥

विषमेष्विति तटेष्वित्यस्य विशेषणम्। पक्षे विषमेषुः कन्दर्पः तस्य रणाभियोगमित्येकं पदम् ॥२४८॥

"मोहन कियत् सहिष्यामहे। यदिति निर्म्मथनादग्निश्चन्दनादपि जायते इति वचनं प्रमाणम् तदत्र अस्मद्दूषणं न देयम्,'तेन हि धाराणामपि चाञ्चल्यं जायते इति रहस्यो ध्वनिः ॥२४९॥

कुटि कौटिल्यं इक् कृपादिभ्यः। नाटी नाट्यं कौटिल्यनाट्यमत्र

वृन्दा। त्वं महासांयुगीनोऽसि संयुगे ख्यातिमागतः ।
योद्धुं ततस्त्वया सार्द्धं क्षमन्तामबलाः कथम् ? ॥२५१॥

कृष्णः। काननेचरि ! स्वरूपानभिज्ञासि ।

पश्योन्नतश्रोणिरथा मतङ्गज,-क्रमोज्ज्वलाः सुष्ठु पदातिशोभनाः ।
कामस्य चञ्चत्कचभारचामरा,-अमूरमूश्चारुचमूरुलोचनाः ॥२५२॥

राधा। णाअर ! दिट्ठं कुलबालिआविमोहणं इदं दे घट्टिन्दजालम्, ता पुणो अलं वित्थारेण। सहीसणाहा जण्णवेदिअं चलिदम्हि ॥२५३॥

परमपटौ मयि न फलतीत्यर्थः। रहस्यध्वनिपक्षे अपटोरेव वाह्यार्थानुसन्धायिनो भ्रमः स्यात् नतु परमपटो रहस्यवेदिनो ममेति। मयातु युष्मच्चापल्यं ज्ञायत एव अलं व्यञ्जनयेति भावः। अतनोरनल्पस्य पक्षे कन्दर्पस्य संगरस्य युद्धस्य क्रियां व्यापारम् ॥२५०॥

'सांयुगिनो रणे साधुरि'त्यमरः। यतः संयुगे युद्धे उपयथापि स्पष्ट एवार्थः ॥२५१॥

स्वरूपानभिज्ञासीति ममाप्यतनुसङ्गरे पराजेतुं समर्था एतास्त्वं नाभिजानासीति भावः। अमूश्चमूरुलोचनाः कामस्य चमूः सेनाः पश्य प्रतीहीत्यर्थः। सेनाङ्गान्येवाभिनयेन तर्ज्जन्या दर्शयन्नाह उन्नताः श्रोणय एव रथा यासां ताः, मतङ्गजस्येव क्रमेण पादविन्यासेन उज्ज्वलाः पक्षे क्रमेण शक्त्या। 'क्रमशक्तौ परिपाट्यामि'ति विश्वः। सुष्ठु पदैरिति शोभनाः पक्षे पदाभिशोभनाः ॥२५२॥

"नागर कुलबालिकाविमोहन इदं ते घटेन्द्रजालं तत् पुनरलं विस्तारेण। सखीसनाथा यज्ञवेदिकं चलितास्मि"। इन्द्रजालमिति प्रकटीभूते घट्टशुल्कग्रहणादावर्थेन तात्पर्य्यमिति तव वाचैवावगम्यते व्यज्यमानेति दुर्ल्लभेऽर्थेनु नास्त्येव न्यायः। अतो निर्व्विरोधमेवास्माकमितश्चलनमिति भावः प्रकटः। रहस्यस्तु कालविलम्बासहि-

कृष्ण: । घूर्णिताक्षि ! घनघट्टकरेण शीघ्रमाघ्रातासि । कथं चलने त्वं प्रभवितासि ? ।।२५४।।

चम्पकलता । किं क्खु भोअराअस्स अहिआरी होसि, जं करदाणेण आराहणिज्जो तुमम् ? ।।२५५।।

कृष्ण: । चम्पकलते ! भोगरागस्याधिकारी तथ्यमस्मि, तथापि नातीव तुष्टिर्मम करदानेनाराधने । तत: प्रयत्ननिगूढ़ान् काञ्चन-कुम्भानेव स्पर्शयन्तु भवत्य: ।।२५६।।

ललिता । हन्त मुद्धाविड़म्बणचादुरीगव्विद ! पेक्ख, इमा ओ विअ-ड्ढप्पवरा ओ गोट्ठ-जुअदिवल्ली ओ रण्णो घट्टदाणं कट्टिअ सलील चलन्ति । ता उज्जाण-चक्कवट्टिणं गदुअ फुक्करेहि ।।२५७।।

कृष्ण: ।

भुजविक्रमिणा मया कथं वा, तव हेनोरपि फुत्कृतिर्विधेया ?
द्विपदर्पहरस्य को हरेर्वा, हरिणीवृन्दविमर्द्दने प्रयास: ? ।।२५८।।

ष्णवो वयं भवता शुल्कग्रहणमिषेण चलन्त्यो निरुद्धचामहे इति ।।२५३।।

आघ्रातासि ईषद्गृहीतासि पक्षे घनो निविड़ो घट्टश्चलनं चापलं यस्य तथाभूतेन करेण मत्पाणिना समाघ्रातासि परामृष्टासि । आघ्राणलिङ्गेन करस्य गजशुण्डत्वं दुर्व्वारतया व्यञ्जितम् । यदि यास्यसि स्वकरेणैव त्वामाकर्षयामीत्यर्थ: ।।२५४।।

"किं खलु भोजराजस्याधिकारी भवसि यत् करदानेनाराधनी-यस्त्वम्" ।।२५५।।

स्पर्शयन्तु ददतु स्पर्शनं प्रतिपादनमित्यमर: । पक्षे स्पष्ट: ।।२५६।।

"हन्त मुग्धाविड़म्बनचातुरीगर्व्वित पश्य इमा विदग्धाप्रवरा गोष्ठयुवतीवल्य: राज्ञो घट्टदानं कर्त्तृत्वा सलीलं चलन्ति तत उद्यान-चक्रवर्त्तिनं गत्वा फुत्कुरु" ।।२५७।।

राधा । किं कादव्वं हरिणा, जं सरहसं वलिदा पुरदो ललिदा ? ।।२५९।।

कृष्ण: । पङ्कजाक्षि ! निष्टङ्कितमवधार्य्यताम्,—

विद्योतसे कल्पलतेव कामदा,
धुनोपि च व्यायत-चिल्लि-कार्म्मुकम् ।
इत्यर्थपुञ्जं मम देहि पुष्कलं,
किंवा सखीभि: सह सुष्ठु विग्रहम् ।।२६०।।

ललिता । (कुटिलं विलोक्य) गोविआहार ! सङ्खचूड़ोवमद्दणेण विक्खादविक्कमोसि, ता जुत्ता विग्गहाहिलासुप्पदा ।।२६१।।

राधा । हन्त सहो ओ ! किदं परिस्समावणोदणम्, ता तुरिअं उक्खिवध णिअं णिअं गग्गरिअम् ।।२६२।।

कृष्ण: । सखे सुबल ! संभृतेनावष्टम्भकुम्भिकापञ्चकेन सत्वरं घट्ट-चत्वरं परिष्क्रियतां त्वया । मया पश्चादत्र पञ्चमी धारयिष्यते, यत: पुन्नागप्रियासौ । ।।२६३।।

हरे: सिंहस्य निवृत्तिर्नाम पष्ठमङ्गमिदम् । यदुक्तम् - 'निदर्शन-स्योपन्यासो निवृत्तिरिति कथ्यते' इति ।।२५८।।

"किं कर्त्तव्यं हरिणा यत् सरभसं वलिता पुरतो ललिता" । पक्षे सरभेन सिंहविमर्द्दनेन जन्तुना संवलिता ।।२५९।।

विग्रहं युद्धं पक्षे देहम् ।।२६०।।

"गोपिकाहार ! शङ्खचूड़ोपमर्द्दनेन विख्यातविक्रमोऽसि तद्युक्ता विग्रहाभिलापुकता" गोपिकां हरतीति सचासौ शङ्खचूड़श्चेति तस्य, पक्षे गोपिकानां हाराश्च शङ्खसम्बन्धिन्यश्चूड़ाश्च तासाम् ।।२६१।।

"हन्त सख्य: कृतं परिश्रमापनोदनम् । तत् त्वरितमुत्क्षिपथ निजां निजां गर्गरिकाम्" ।।२६२।।

संभृतेन सम्यक् धृतेनावष्टम्भकुम्भिका कनकघटोपरिष्क्रियतां विभूष्यतां पञ्चमी सर्व्वा अपेक्ष्य राधैवेत्यर्थ: । पक्षे पञ्चमीतिथि: ।

सुवलः । (परिक्रम्य) ललिदे ! भारदुक्खप्पदाओ घट्टघरं लम्भेमि तुम्हकुम्भिआओ, ता सुहं चलन्तु होदीओ ॥२६४॥

ललिता । (सावज्ञस्मितमवलोक्य) हद्धी हद्धी, अरे चिल्लाअ-चाउरिआ-चोरचक्कवट्टि-लीलामच्च ! सइदाए वि ललिदाए को क्खु णीसज्झसो तिणं वि परिहरिदुं अज्झवसुसदि ? ॥२६५॥

सुवलः । (सशङ्कं परावृत्य) पिअवअस्स ! एक्कोहं कध कुम्भ-पञ्चअं आहरिस्सम् ? ता इमेहिं वअस्सेहिं सद्धं सअं च्चेअ सणिणेहेहि ॥२६६॥

कृष्णः । सखे ! सुवलोऽपि सुष्ठु दुर्व्वलोऽसि, यदेष ललितायाः फल्गुभिरेव मटस्फटिभिस्त्वमुच्चाटितः ॥२६७॥

सुवलः (सनर्म्मस्मितमपवार्य्य) पिअवअस्स ! अलं वअणमेत्तसुलहेण दप्परासिणा । सुट्ठु पच्चक्खी किद-विक्कमोसि, जं सस्सि दिअहे राहिआए सद्धं वट्टन्तस्मि कीलाज्जूए कूडेण जअं उग्-

---

पुन्नागस्य कृष्णस्य पक्षे महासर्पस्य श्रावण्या पञ्चम्या नागपञ्चमीत्वेन प्रसिद्धेः ॥२६३॥

"ललिते भारदुःखप्रदा घट्टगृहं लम्भयामि युष्मत् कुम्भिकास्तत्सुखं चलन्तु भवत्यः" ॥२६४॥

"हा धिक् हा धिक् अरे चिल्लातचातुर्य्यचौरचक्रवर्त्तिलीलामात्य शयिताया अपि ललितायाः कः खलु निःस्वाध्वसस्तृणमपि परिहर्त्तुमध्यवस्यते" । प्रसिद्धचौरश्चिल्लातस्तस्येव चातुर्य्यं यस्य तथाभूतो यश्चोरचक्रवर्त्ती तस्य लीलामात्य ॥२६५॥

"प्रियवयस्य एकोऽहं कथं कुम्भपञ्चकं आहरिष्यामि तदेभिर्वयस्यैः सार्द्धं स्वयमेव सन्निधेहि" ॥२६६॥

मटस्फटिभिराटोपैः ॥२६७॥

"प्रियवयस्य अलं वचनमात्रसुलभेन दर्पराशिना सुष्ठु प्रत्यक्षी-

घुसिअ ललिदाए आअड्ढिदमुरलीओ तुमं कोत्थुह-सङ्गोवणं कुणन्तो सुम्हेरमुहीहिं सहीहिं कडक्खिज्जन्तो सङ्काउलो तुण्णं संवुत्तो आसि ॥२६८॥

कृष्णः । (स्मृत्वा) मृषावादवैज्ञानिक ! मौनं भज । महासमीरणस्ये मे विक्रमधाटी-परिस्पन्दनारम्भे रम्भेव केयं वराकी ललिता ॥२६९॥

ललिता । विसाहे ! तं अम्ह-पिअसही-भादुअं सिरिदाम-जोइन्दं वन्देहि, जेण पराणाआमेण वलिट्टं मारुदं णिज्जिदीकदुअ महारम्भाणं गोईणं गोट्ठी उप्फुल्लीकिदा ॥२७०॥

विशाखा । (सस्मितम्) ललिदे ! साहु किंपि सुमारिदं तुए । (इति संस्कृतेन)

कृतविक्रमोसि यत्तस्मिन् दिवसे राधिकया सार्द्धं वर्त्तमाने क्रीड़ाद्यूते कूटेन जयं उद्घूष्य ललितया आकृष्टमुरलीकस्त्वं कौस्तुभसंगोपनं कुर्व्वन् सुस्मेरमुखीभिः कटाक्षविषयी क्रियमाणः शङ्काकुलस्तूर्णं संवृत्त आसीः" ॥२६८॥

वैज्ञानिकः कुशलः । 'वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि' इत्यमरः । महासमीरणस्य महावेगस्य पक्षे महापवनस्य विक्रमस्य धाटी छलादाक्रमणम् ॥२६९॥

"विशाखे त अस्मत् प्रियसखी भ्रातरं श्रीदामयोगीन्द्रं वन्दे येन प्राणायामेन मारुतं निर्ज्जितोकृत्य महारम्भाणां गोपीनां गोष्ठी उत्फुल्लीकृता" । योगीन्द्रं पक्षे उपायीन्द्रं उपायोऽत्र शामादीनां चतुर्णां मध्ये पराभवलक्षणो दण्ड एव ग्राह्यः प्राणायामेन पक्षे बलाधिक्येन मारुतं पक्षे माशब्दो निषेधवाची लुप्तस्वकत्थनमित्यर्थः ॥२७०॥

सस्मितमिति प्रस्तूयमानेऽप्युत्कर्षे परमोत्कर्षरूपोऽंशस्त्वया नाभिव्यञ्जित इत्यभिप्रायेण । 'साधु किमिति स्मारितं त्वया' ।

श्रीदामचन्द्राङ्कितपूर्व्वकायम् भाण्डीरपूर्व्वाचलमाश्रयन्तम् ।
कृष्णाम्बुदं तत्र विलोक्य वृन्दा, स्मेरेयमासीच्चपला सखी नः ॥२७१॥

अर्ज्जुनः (संस्कृतेन)

अत्र नः सवयसां गणान्तरे,
जीयते जयति वा न कः सखा ।
तत्र गोष्ठसुदृशां किमागतं,
कारणं वदत वो मदाप्लुताः ॥२७२॥

कृष्णः (राधामवलोक्य)

दातुमिच्छसि न काञ्चनानि चे,-
च्चातुरीं मनसि काञ्चन श्रिता ।
गौरि गैरिकविचित्रितोदरीम् ,
त्वं ततः प्रविश भूभृतो दरीम् ॥२७३॥

(इति राधामावृणोति ।)

ललिता । (मध्यमासादयन्ती) रअणारीअ ! सुणाहि, माहुरीमाहप्पेहिं पाअपउम-प्फंस-सोहग्गभाअत्तणं अप्पणो अमण्णिअ सङ्काउलेण णिअघरावट्ठिदिमेत्तकिदत्थमण्णेण भत्तुणा वि दूरादो सादरं वन्दिज्जन्तीए ।

(इत्यद्धोक्ते राधिका साभ्यसूयं ललितां पश्यति ।) ॥२७४॥

स्मेरेति सदैवेयं कृष्ण एव सर्व्वोत्कर्षं निश्चितवती तदानीन्तु कृष्णादप्युत्कर्षं श्रीदाम्नि दृष्ट्वेति भावः। अतएव इयं अस्माकं चपला सखी कदाचित् कृष्णोत्कर्षं पश्यन्ती कृष्णसखी वृन्दा भवति कदाचिदस्मदुत्कर्षं पश्यन्ती अस्मत् सखीति सखीत्वे चापल्यम् ॥२७१॥

सवयसां मित्राणां गणान्तरे गणमध्ये जीयत इति पराजये जये च अस्मत् सवयस्त्वमेव कारणं नतु युष्मद्भ्रातृत्वमिति । हे मदप्लुता मदव्याप्ता इति वृथैवायं भवतीनां मद इति भावः।।२७२॥

कांचन कामपि ॥२७३॥

ललिता (स्मित्वा) आकोमारं पुरिसजण-परिमल-कणिआण-हिण्ण-सव्वङ्गाए जाए अम्ह-पिअसहीए अङ्गाइं सेवापज्जुस्सुएणावि मञ्जुणा णअजोव्वणेण सज्झसादो विअ मन्थरीहुविअ अज्जवि णिब्भरं ण परिसीलिदाइं, ताए महासदीउलचक्कवट्टिणीए इमाए अङ्गस्स पेक्खणे वि किदज्भवसा ओ जणो महासाहसिआणं धुरन्धरो भणीअदि, किं उण प्फंसणे । ता अवेहि । (सर्व्वाः स्मितं कुर्व्वन्ति ।) ॥२७५॥

मधुमङ्गलः । (विहस्य) ललिदे ! अलं इमिणा गव्वभरेण । पुच्छिज्जउ अप्पणो पिअसही गन्धव्विआ, जाए दुव्वासस्स

"रतनारीकरतिवल्लभ हे शृणु माधुरिमाहात्म्यैः पादपद्मस्पर्शसौभाग्यभाक्तं आत्मनो अमत्वा शङ्काकुलेन निजगृहावस्थितिमात्रकृतार्थमन्येन भर्त्रापि दूरतः सादरं वन्द्यमानायाः" ॥२७४॥

साभ्यसूयमिति मत्समक्षमेव मम स्तुत्या पत्युर्निन्दया च लज्जा च स्वाभियोगश्च व्यज्यमानौ भवेतां तौ माभूतामिति। ललितास्मित्वेति त्वयातु लोच्यत इति तेन लज्जा स्वाभियोगौ मयातु सख्या यथार्थ वक्तव्यमेव अत्र किञ्चिद्व्यज्यमानं स्याच्चेदिष्टापत्तिरेव औत्सुक्यमहाराजस्य प्रावल्ये को वा लज्जादिदस्युप्रभावः । "आकौमारं पुरुषजनपरिमलकणिकानभिज्ञसर्व्वाङ्गाया यस्या अस्मत्प्रियसख्या अङ्गानि सेवापर्य्युत्सुकेनापि मञ्जुना नवयौवनेन साध्वसादिव मन्थरीभूय अद्यापि निर्भरं न परिशोलितानि । तस्या महासतीकुलचक्रवर्त्तिन्या अस्या अङ्गस्य प्रेक्षणे कृताध्यवसायो जनो महासाहसिकानां धुरन्धरो भण्यते किं पुनः स्पर्शने तदपेहि" । सर्व्वाः सस्मितमिति कृष्णं प्रलोभयति च निवर्त्तयति चेत्यभिप्रायात् ॥२७५॥

अलं अनेन गर्व्वभरेण पृच्छतामात्मनः प्रियसखी गान्धर्व्विका यया दुर्व्वाससो मुनेर्मुखात् अस्मत् प्रियवयस्यस्य आकौमारमाश्चर्य्य-

मुणिणो मुहादो अम्ह-पिअवअस्सस्स आकोमारं अच्चरिअ-
वम्हचरिअमाहुरी सअं च्चेअ आअण्णिदा ॥२७६॥
सुबल: । ललिदे ! सच्चावेदि एसो मुणिपुत्तओ, ता पत्तिआएहि जं
महावोरव्वदो वि पिअवअस्सो णारीणं गणादो भाएदि ॥२७७॥
अज्जुन: । आं विण्णादम् । अदो च्चेअ इमाणं कडअसद्दमेत्तेण
सम्भमाउलो भविअ कम्पन्तो पुलइदङ्गो मए वारं वारं दिट्-
ठोत्थि ।
कृष्ण: (स्मितं कृत्वा) ललिते ! नात्र विप्रतिपत्तिस्ते श्रेयसी यत:
समानधर्म्मणो: साधकयो: सहवाससौहार्द्द माधुरी झटिति महा-
व्रतसिद्धये साधु कल्पते ॥२७८॥
राधा । (दृगञ्चलं साचि विक्षिपन्तो सावहेलं किञ्चित् परावृत्य)
णाअर ! सारसेसा ण क्खु तुम्ह-चवल चादुरी, ता अलं पिट्-
ठपेसेण ॥२७९॥
कृष्ण: । (अपवार्य्य) वृन्दे ! पश्य, पश्य,

नर्म्मोक्तौ मम निर्मितोरुपरमानन्दोत्सवायामपि
श्रोत्रस्यान्ततटीमपि स्फुटमनाधाय स्थितोद्यन्मुखी ।

ब्रह्मचर्य्या माधुरी स्वयमेवाकर्णिता" ॥२७६॥

ललिते सत्यापयति सत्यं कथयति एप मुनिपुत्र: । तत् तस्मात् प्रतीहि महावीरव्रतोऽपि प्रियवयस्यो नारीणां गणाद्बिभेति" ॥२७७॥

"आं विज्ञात अतएव आसां कटकशव्दमात्रेण सम्भ्रमाकुलो भूत्वा कम्पमान: पुलकिताङ्गो मया वारं वारं दृष्टोऽस्ति" ॥२७८॥

"नागर सारशेपा न खलु युष्मच्चपलचातुरी तदलं पिष्ट-पेपेण" ॥२७९॥

निर्म्मितेत्यभ्यन्तरसुखस्य श्रोत्रस्यान्तेति गर्व्वेणावहित्थायां सत्यामप्युद्यन्मुखीति गूढ़स्मितमेवास्या हर्षव्यञ्जकम् । सौभाग्यगर्व्व-

राधा लाघवमप्यसादरगिरां भङ्गीभिरातन्वतो
मैत्रीगौरवतोऽप्यसौ शतगुणं मत्प्रीतिमेवादधे ॥
(राधा किञ्चिद्विहस्य ललितायाः कर्णमूले लपति ।) ॥२८०॥
ललिता । 'कण्ह ! गोउले विक्खादगुणो तुमं जुअराओसि, त्ति
अम्हे तुण्णि वट्टम्ह । जइ साम्पदं सीमुल्लङ्घणे पउत्तोसि, तदो
अम्हे कीस अप्पणकज्जं उवेक्खिस्सम्ह ? ॥२८१॥
अज्जुन: । किं तं कज्जं तुमहाणं, जं उवेक्खध ? ॥२८२॥
ललिता । गोवेहिन्तो णिअ-वुन्दावणस्स संरक्खणं जेव्व । इदो
अवरं किं कज्जम् ?
(अज्जुन: सावहेलं विहस्य हुङ्कृतिं कुर्व्वन् मूर्द्धानमाधुनोति ।) ॥२८३
विशाखा । (सस्मितमुपसृत्य) ललिदे ! गोउल-जुअदोउल-चक्क-
वट्टिणी अम्हपिअसही आणवेदि ।
ललिता । किं तम् ? ॥२८४॥

जनितोऽयं विब्बोक: । तथाहि । 'विब्बोको मानगर्व्वाभ्यां स्याद-भीष्टेऽप्यनादर' इति । मैत्री गौरवत इति तदीयतामयप्रणयात् चन्द्रावल्यादिनिष्ठात् ॥२८०॥

'कृष्ण गोकुले विख्यातगुणस्त्वं युवराजोऽसि इति वयं तूष्णीं वर्त्तामहे यदि साम्प्रतं सीमोल्लङ्घने प्रवृत्तोऽसि ततो वयं कस्मात् आत्मकार्य्यमुपेक्षिष्यामहे' ॥२८१॥

'किं तत् कार्य्यं युष्माकं यदुपेक्षध्वे' ॥२८२॥

ललिता-"गोपेभ्यो निजवृन्दावनस्य संरक्षणमेव इतोऽपरं किं कार्य्यम्" ॥२८३॥

"ललिते गोकुलयुवतीकुलचक्रवर्त्तिनी अस्मत् प्रियसखी आज्ञा-पयति" ॥२८४॥

विशाखा । सव्वे गव्विदा गोवा लदंकुरपुञ्जभञ्जणदक्खाणं गाइणं लक्खकोडी रक्खन्तो फलेहिं कुक्खिम्भरिणो पुप्फपल्लवेहिं मिधो णेवच्छआरिणो सुइरं अम्ह-वुन्दावणस्स विद्धंसणं कुणन्ति । ता णिट्टङ्किदं कधेहि, एदे इदा वा विरमेन्तु, किंवा करं देन्तु ।।२८५।।

मधुमङ्गलः । (सामर्षम्) विवरीदवादिणि ! मुणिव्वदिणी होहि । अथवा थोअं पि तुम्हाण दूसणं णत्थि । पिअवअस्सस्स कारुणिअदा ज्जेअ एत्थ अणत्थआरिणो संवुत्ता, जाए डाहिणाए अडाहिणाणं तुआरिसीणं तस्स वुन्दावने पवेसो पसादीकिदो । ता ण क्खु अजुत्तो पलावो ।।२८६।।

चम्पकलता । अज्ज ! अणज्जोसि तुमं, जं अपज्जालोइअ मोहं जप्पसि । ।।२८७।।

ललिता । (संस्कृतेन)

शृणोति नायं शतशोऽपि घुष्टं,
न च स्मरत्यात्मदृशापि दृष्टम् ।
श्रुतिस्मृतिभ्यां निजलोचनाभ्यां,
हीनं ततस्त्वं सखि नाक्षिपामुम् ।।२८८।।

"सर्व्वे गर्व्विता गोपा लताङ्कुरपुञ्जभञ्जनदक्षाणां गवां लक्षकोटी रक्षन्तः फलैः कुक्षिम्भराः पुष्पपल्लवैर्मिथो नेपथ्यकारिणः सुचिरं अस्मद्वृन्दावनस्य विध्वंसनं कुर्व्वन्ति तन्निष्टङ्कितं कथय । एते इतो वा विरमन्तु किम्वा करं ददतु" ।।२८५।।

"विपरीतवादिनी मुनिव्रतिनी भव । अथवा अल्पमपि युष्माकं दूषणं नास्ति प्रियवयस्यस्य कारुणिकतैवात्रानर्थकारिणी संवृत्ता । यया दक्षिणया अदक्षिणानां त्वादृशीनां तस्य वृन्दावने प्रवेशः प्रसादीकृतः । तत् न खलु युक्तप्रलापः" ।।२८६।।

विशाखा । सहि णन्दीमुहि ! अवि किं सो किर पिअसहीए महाहिसेअ-महूसवो तुए सुमरीअदि ? ।।२८९।।

नान्दीमुखी । विसाहे ! को क्खु सो पराणी भुअणे होदि, जेण महामहूसवो वि विसुमरिदुं पारीअदि ? ।।२९०।।

चित्रा । णन्दीमुहि ! अच्छीहिं पच्चक्खीकिदो वि सो महूसवो लोउत्तरदाए कण्णं मे उत्तरलेदि, ता सुणावीअदु ।।२९१।।

नान्दीमुखी । सहि चित्ते ! सुणाहि, इमाए वुन्दाए गदुअ भअवदो विण्णत्ता 'हन्त जोएसरि ! वुन्दावणरज्जे अहिसिञ्चिज्जउ राहो, ज आगासे असरीरिणी वाणी एव्वं पअडं अम्हाणं पुरदो आदिट्ठवदि' त्ति ।।२९२।।

वृन्दा । (स्वगतम्) मुकुन्दस्य निदेशादाकाशवाग्व्यपदेशेनाहमार्य्यामुदयोजयम् ।।२९३।।

"आर्य्य अनार्य्योऽसि त्वं अपर्य्यालोच्य मोघं जल्पसि" ।।२८७।।

घुष्टं अभ्यस्तं उक्तं वा आत्मनो दृशा नेत्रेणापि दृष्टं महोत्सवं न स्मरति । नाक्षिपामुमित्यतिमूढः आक्षेपविषयोऽपि नैव भवतीति भावः ।।२८८।।

"सखि नान्दीमुखि अपि किं स किल प्रियसख्याः महाभिषेकमहोत्सवस्त्वया स्मर्य्यते" ।।२८९।।

"विशाखे कः खलु स प्राणी भुवने भवति येन महामहोत्सवोऽपि विस्मर्त्तुं शक्यते" ।।२९०।।

"नान्दीमुखि अक्षिभ्यां प्रत्यक्षीकृतोऽपि महोत्सवो लोकत्तरतया कर्णं मे उत्तरलयति तत् श्रावयतु" ।।२९१।।

"सखि चित्रे शृणु अनया वृन्दया गत्वा भगवती विज्ञप्ता । हन्त योगेश्वरि वृन्दावनराज्येऽभिषिच्यतां राधा । यद्यस्मादाकाशे अशरीरिणी वाणी एवं प्रकटं अस्माकं पुरतः आदिष्टवतीति" ।।२९२।।

नान्दीमुखी । तदो महातावसीए भअवदीए आहूदाओ पञ्च-देईओ समाअदाओ ॥२६४॥

अर्ज्जुनः । काओ क्खु ताओ ? ॥२६५॥

वृन्दा ।

देवी प्रसिद्धा भुवि देवकीसुता, या कंसमाक्षिप्य जगाम केवलम् ।
भानोः कलत्रे तनया च पञ्चमी, गङ्गा तु या मानसपूर्व्विका स्मृता ॥

चित्रा । तदो तदो ? ॥२६६॥

नान्दीमुखी । तदो कणिट्ठाए मत्तण्डमहिसीए भणिदं 'भअवदि ! अणदिक्कमणिज्जं तुम्ह-सासणं णिच्चिदं क्खु अम्हेहिं सिरे गहीदं, किन्तु कहिं महिट्ठा एसा वच्छा राहो, कहि वा सोलह-कोहमेत्तवित्थिण्णं एदं वुन्दावणरज्ज' त्ति ण सुट्ठु पसीदइ मे हिअअम् ॥२६७॥

तदो भअवदीए विलोइदमुही देई एक्काणंसा संसिदुं पउत्ता ॥२६८॥

मुकुन्दस्येति सर्व्वतोऽधिकं सौभाग्यं तस्याः सूचितम् ॥२६३॥

"ततो महातापस्या भगवत्या आहुताः पञ्चदेव्यः समागताः" ॥२६४॥

"काः खलु ताः" ॥२६५॥

भानोः कलत्रे संज्ञाछाये तनया यमुना मानसपूर्व्विका मानस-गङ्गा इत्यर्थः ॥२६३॥

"ततः कनिष्ठया मार्त्तण्डमहिष्या' छायया भणितं भगवति अनतिक्रमणीयं युष्मत्शासनं निश्चितं खलु अस्माभिः शिरसि गृहीतं किन्तु क्व महिष्ठा एषा राधा क्व वा षोड़शक्रोशमात्रविस्तीर्णमिदं वृन्दावनराज्यमिति । न सुष्ठु प्रसीदति मे हृदयं" तेन सर्व्वब्रह्माण्डाधिपत्य एवाभिषिच्यतामिति भावः ॥२६७॥

"ततो भगवत्या विलोकितमुखी देवी एकानंशा संशितुं प्रवृत्ता" ॥२६८

(इति संस्कृतेन) सखि सवर्णे ! समाकर्णय,—
आम्नायाध्वर-तीर्थ-मन्त्र-तपसां स्वर्गाखिलस्वर्गिणां
सिद्धीनां महतां द्वयोरपि तयोश्चिच्छक्ति-वैकुण्ठयोः ।
वीर्य्यं यत् प्रथते ततोऽपि गहनं श्रीमाथुरे मण्डले
दीव्यत्तत्र ततोऽपि तुन्दिलतरं वृन्दावने सुन्दरि ॥२६६॥

चित्रा । तदो तदो ?

नान्दीमुखी ! तदो हरिसुप्फुल्ले सअलजणे णिवतन्त-दिव्व-कुसुम-वरिसं गअणं पेक्खिअ भाणुणन्दिणीए भणिदम्, 'भअवदि ! इदो आअन्तुं पज्जुस्सुआवि तुम्ह-अणामन्तणेण सङ्किद-हिअआ दिव्वमञ्जूसिआए अणुगदा पिअसही एसा सरस्सई

आम्नायानां वेदानां वस्तुज्ञापकत्वलक्षणं यद्वीर्य्यं, अध्वराणां ज्योतिष्टोमादीनां विशिष्टफलोत्पादकत्वलक्षणं, तीर्थानां पावनत्व-लक्षणं मन्त्राणां दुर्घटघटनलक्षणं तपसां वरणीयविशेषप्रापकत्व-लक्षणं तथा तत्तत्साध्यानां स्वर्गाणां ऐन्द्रियकसुखप्रापकत्वलक्षणं तद्भोक्तृणां स्वर्गिणां सुखप्रमत्ततालक्षणं तथैव सिद्धानां सिद्धि-मणिमादीनां ऐश्वरसुखप्रापकत्वलक्षणं तपसां महतां सिद्धि-मतां योगैश्वर्य्यादिलक्षणं चिच्छक्तिर्मायातीताह्लादसत्ताज्ञानस्वरूपा अन्तरङ्गाशक्तिस्तस्या निरुपमनित्यकल्याणगुणः तन्मयपदार्थसमु-दायाविष्करणलक्षणं वैकुण्ठस्य तत्कार्य्यस्य तत्तन्मयत्वसर्व्वोत्कर्ष-लक्षणं यद्वीर्य्यं प्रथते प्रख्यातं भवति ततोऽपि जातिप्रमाणाभ्यां गहनं वीर्य्यं माथुरे मण्डले एव दीव्यति ततोऽपि तुन्दिलतरं वृन्दावने षोड़शक्रोशमात्र एव तेन का वार्त्ता ब्रह्माण्डकोट्याधिपत्यानां तानि वृन्दावनैकप्रदेशप्रतीकोऽपि ब्रह्मणा दृष्टानीति भावः ॥२६६॥

"ततो हर्षोत्फुल्ले सकलजने निपतद्दिव्यकुसुमवर्षं गगनं प्रेक्ष्य पर्य्युत्सु-भानुनन्दिन्या यमुनया भणितम् । भगवति इत आगन्तुं

अम्बरे विलम्बइ, ता आआरीअदु' त्ति विण्णत्ताए भअवदीए सादरं आआरिदा विरिञ्चिपुत्ती तत्थ पविसिअ दिव्वमञ्जुसिअं उग्घाड़ेन्ती भणिदुं पउत्ता । (इत्यर्द्धोक्ते)

वृन्दा । (निर्भरौत्सुक्येन नान्दीमुखीवाचमाच्छाद्य सहर्षम्) ॥३००॥

पाद्मीं पद्मभुवः स्रजं प्रणयिनी सौवर्णपट्टं शची
रत्नालङ्करणं कुवेरगृहिणी छत्रं प्रचेतःप्रिया ।
द्वन्द्वं चामरयोः प्रभञ्जनवधुः स्वाहा दुकूलद्वयं
धूमोर्णा मणिदर्पणं सरभसं मत्पाणिना प्राहिणोत् । ३०१॥

चित्रा । तदो तदो ? (ततस्ततः ?)

वृन्दा । ततश्च,

स्ववाद्यध्वनिडम्बरे श्रुतिहरे गम्भीरयत्यम्बरं
गायत्यम्बुदभाजि तुम्बुरुमुखे गन्धर्व्ववृन्दे मुदा ।
नृत्यत्यप्सरसागणे च गगने राधाभिषेकोत्सवं
कर्त्तुं ताः सुरसुभ्रुवः सरभसं भव्यास्तमारेभिरे ॥३०२॥

(इति नान्दीमुखीमवेक्ष्य सलज्जम्) ततस्ततः ?

नान्दीमुखी ! तदो पेक्खन्तम्मि साणन्दं वइन्दणन्दणे भअवदीए

कापि युष्मदनामन्त्रणेन शङ्कितहृदया दिव्यमञ्जुषिकया अनुगता प्रियसखी एषा सरस्वती अम्बरे विलम्बते तदाकार्य्यतामिति विज्ञापितया भगवत्या सादरमाकारिता विरिञ्चिपुत्री सरस्वती तत्र प्रविश्य दिव्यमञ्जुषिकां उद्घाटयन्ती भणितुं प्रवृत्ता ॥३००॥

पद्मभुवः ब्रह्मणः प्रणयिनी सावित्री । सौवर्णपट्टं स्वर्णसिंहासनं कुवेरगृहिणी ऋद्धिः । प्रचेतसो वरुणस्य प्रिया गौरी । प्रभञ्जनवधूः शिवा । धूमोर्णा यमप्रिया मत्पाणिना प्राहिणोत् प्रस्थापयामास ॥३०१

अम्बुदभाजि मेघान्तरिते इति तत्र प्रकटीभवितुं पुंसां तेषामयोग्यत्वात् ॥३०२॥

णिदेसेण ताहिं भुअण-पाअणतरङ्गिणीहिं सङ्गिणीहिं देईहिं तुम्हेहिं सहीहिं सद्धं पुरडपट्टोवरि णिवेसिदाए राहिए दिव्वमहोसहि--रसामिअ--पूरिदेण मणिकुम्भ--णिउरम्वेण महाहिसेअं कुणन्तीहिं वुन्दावण रज्जस्स आहिपच्चं अप्पिम् ॥२०३

चम्पकलता । (सरोमाञ्चम्) तदो तदो ?

नान्दीमुखी । तदो हत्थं उक्खिविअ सरस्सईए सरस्सई पआसिदा । 'एदं तं सोअन्धिअं दामं जं सिणेहेण अम्माए सावित्तीए पहिदं' त्ति सुणिअ देईए एक्काणंसाए तं गेण्हिअ गोउलाणन्दस्स कण्ठे णिक्खित्तम् । तदो णम्म-सुम्हेरमुहीए मिहिरदुहिदाए वाहरिदं, 'अम्महे,धम्मविम्हारणे कम्मढ़दा वन्धुजणसिणेहाणं, जेहिं विअक्खणा वि अविआरिअ पअट्टेन्ति' त्ति समाअण्णिअ विञ्झवासिणीए भणिदं 'जउणे ! का क्खु तुए अविआरा

ततः प्रेक्ष्यमाणे सानन्दं व्रजेन्दनन्दने भगवत्या निदेशेन ताभिर्भुवनपावनतरङ्गिणीभिः सङ्गिनीभिर्देवीभिः कर्तृभिर्युष्माभिः सखीभिः सार्द्धं पुरटपट्टोपरि निवेशितायाः श्रीराधाया दिव्यमहौषधिरसामृतपूरितेन मणिकुम्भनिकुरम्वेन महाभिषेकं कुर्व्वतीभिर्वृन्दावनराज्यस्याधिपत्यमर्पितम् ॥३०३॥

"ततो हस्तमुत्क्षिप्य सरस्वत्या सरस्वती प्रकाशिता । इदं सौगन्धिकं दाम यत् स्नेहेन अम्बया सावित्र्या प्रहितमिति श्रुत्वा देव्या एकानंशया तद्गृहीत्वा गोकुलानन्दस्य कण्ठे निक्षिप्तम्" ॥३०४॥

"ततो नर्म्मसुस्मेरमुख्या मिहिरदुहित्र्या व्याहृतं अहो धर्म्मविस्मरणे कर्म्मठता बन्धुजनस्नेहानां यैः स्नेहैर्विचक्षणा अपि अविचार्य प्रवर्त्तन्ते । इति समाकर्ण्य विन्ध्यवासिन्या भणितम् । यमुने का खलु त्वया अविचारा दृष्टा प्रवृत्तिः तत्श्रुत्वा यमुनया भणितम्" ॥३०५॥

दिट्ठा पउत्ती ?' तं सुणिअ जउणाए भणिदं, 'देइ ! अम्ह-वहिणीए राहिआए पेसिदा सोगन्धिअमाला कीस तुए अप्पभा-दुणो दिण्णा ?' त्ति सुणिअ विहसन्तीए देईए हरिसेण हरि-कण्ठादो चारुहारेण सद्धं उत्तारिअ तं दिव्वसोअन्धिअमालं पिअसहीकण्ठे णिक्खिवन्तीए ससिदं, 'अइ ! गेण्ह अप्पणो मालं' त्ति ॥६०४-३०६॥ (कृष्ण: स्मितं करोति ।)

विशाखा । तदो तदो ? (ततस्तत: ?)

नान्दीमुखी । 'तदो अलं कठिणहिअअसङ्गिणा अम्हाणं इमिणा हारेण' त्ति हसन्तीए हंसपुत्तीए कोदुएण राहिआए हारो क्खु हारिणि हरिकण्ठे अप्पिदो ॥२०७॥

ललिता । तदो एकाणंसाए कसारिवक्खत्थलादो गहिदेण कुरङ्ग-णाहिणा राहिआए तिलअं णिम्मिदम् ॥३०८॥

वृन्दा । (सानन्दम्) ततश्च भगवत्या सोल्लासमभ्यधायि,—

सार्द्धं वल्लीवधुभिर्विलसत सुखिन: शाखिनो भूरिफुल्ला
रङ्गं भृङ्गविहङ्गा: प्रथयत पशव: प्रौढ़िमाविष्कुरुध्वम् ।

"देवि अस्मत् भगिन्या राधिकाया: सौगन्धिकमाला कस्मात् त्वया आत्मभ्रात्रे दत्ता इति विहसन्त्या देव्या: कण्ठाच्चारुहारेण सार्द्धं उत्तार्य्य तां दिव्यसौगन्धिकमालां प्रियसखीकण्ठे निक्षिपन्त्या शंसितम् । अयि गृहाण आत्मनो मालामिति" ॥३०६॥

"ततोऽलं कठिनहृदयसङ्गिना अस्माकमनेन हारेण इति हसन्त्या हंसपुत्र्या कौतुकेन राधिकाया हार: खलु हारिणि हरिकण्ठे अर्पित:" । हंसपुत्र्या यमुनया ॥३०७॥

"तत एकानंशया कंसारिवक्ष:स्थलाद्गृहीतेन कुरङ्गनाभिना मृगमदेन राधिकायास्तिलकं निर्म्मितम्" ॥३०८॥

सार्द्धमिति नवाधिकारे प्रजानामाश्वासनं वाहिनीनां पतिभि:

आलीभिर्वाहिनीनां पतिभिरुपचिता श्रीमती राधिकेयं
वृन्दामुद्यानपालीं शुचिमिह सचिवीकृत्य व: शास्ति राज्यम् ॥
(इत्यानन्दनिष्पन्दमभिनीय) ॥३०९॥

जग्राह कुन्दलतिकोत्कलिकाशतानि,
पत्रांकुरेण सुमना विरराज चित्रा ।
स्मेरा वभूव ललिता नवमालिकासौ,
फुल्लात्र चम्पकलता च विशाखिकापि ॥३१०॥

ललिता । णान्दीमुहि ! तदा दणिन्द-णन्दिणीए जं भणिदं तं णूणं तुए विसुमरिदम् ।

नान्दीमुखी । हला, कधं विसुमरिदव्वं, जं एदाए अम्हाणं अन्तिए मन्तिदं, 'अज्ज पहुदी अप्पणो कीलावणे ललिदा-पहुदिओ अम्ह-पिअसहीओ सुहेण सच्छन्दं कुसुमाइ ओचिणन्तु ।' तं सुणिअ विञ्झवासिणीए भणिदं 'जउणे ! तहवि माहवस्स

सेनापतिभि: शुचिं सद्गुणवदमात्यं उपधा शुद्धे अमात्ये 'शुचि: उपधा धर्म्मादौ यत् परीक्षणमि'त्यमर: ॥३०९॥

उत्कलिका उद्गतकलिका उत्कण्ठा च सुमना मालती पत्रांकुरेण चित्रा सती विरराज । पक्षे चित्रा सती सुमना: सुचित्ता पत्रां-कुरेण पत्रभङ्गेन विरराज । नवमालिका स्मेरा विकसिता वभूव । विशाखिका विगलितशाखापि चम्पकलता फुल्ला वभूव । पक्षे स्पष्टम् ॥३१०॥

"नान्दीमुखि तदा दिनेन्द्रनन्दिन्या यद्भणितं तन्नूनं त्वया विस्मृतम्" । "कथं विस्मर्त्तव्यं यदेतया अस्माकमन्तिक एव मन्त्रि-तम् । अद्य प्रभृति आत्मन: क्रीड़ावने ललिता प्रभृतय: अस्मत्प्रिय-सख्य: सुखेन स्वच्छन्दं कुसुमान्यवचिन्वन्तु" ॥३११॥

"तत्श्रुत्वा विन्ध्यवासिन्या भणितम् । यमुने तदपि माधवस्या-

आअत्ता कुसुमाणं समिद्धि त्ति ॥३११-३१२॥

वृन्दा । (राधामवेक्ष्य सौत्सुक्यम्)

देव्या दत्तविशेपका विरचितोत्तंसा शनेरम्बया
त्वष्टुर्नन्दनया निवद्धकवरा स्वीयालिभिर्म्मण्डिता ।
चञ्चच्चामरया सखि द्युसरिता सौर्य्या च संवीजिता
पुत्र्या पद्मभुवस्त्वमुच्छ्रितमणिच्छत्रा न विस्मर्य्यसे ॥

राधा (सलज्जम्) वुन्दे ! विरमेहि ॥३१३॥

कृष्ण: (स्वगतम्)

दृशमधिकदिदृक्षुरप्ययुञ्जं,
विवुधवधूत्रपयाहमानतास्य: ।
हृदि मणिवरविम्बितां तदेमां,
सपदि विलोक्य मुदा स्खलन्निवासम् ॥३१४॥

सुवल: । (अपवार्य्य) अज्जुण ! सा किर महाहिसेअत्थलो राहीए उग्गदप्पमदत्तणेण उन्मदराहि त्ति जणेहिं उग्घुसिज्जइ ॥३१५॥

मधुमङ्गल: । (अपवार्य्य) पिअवअस्स ! सव्वं सुमरन्तोम्हि ॥३१६॥

राधा । सहि वुन्दे ! गणीअदु अट्ठ-वारिसिओ काणणकरो ॥३१७॥

यत्ता कुसुमानां समृद्धिरिति" । माधवस्य वसन्तस्य कृष्णस्य च ॥३१२

देव्या एकानंशया दत्तं विशेपकं तिलकं शनेरम्बया छायया त्वष्टुर्नन्दनया संज्ञया सौर्य्या यमुनया पद्मभुव: पुत्र्या सरस्वत्या ॥३१३

हृदि स्वहृदि वरमणि: कौस्तुभ: ॥३१४॥

"अर्ज्जुन सा किल महाभिपेकस्थली राधाया उद्गतप्रमदत्वेन उन्मदराधेति जनैरुद्घुष्यते" ॥३१५॥

"प्रियवयस्य सर्व्वं स्मरणस्मि नासत्यं प्रगल्भन्ते गोपिका:" ॥३१६॥

"सखि वृन्दे गण्यतां अष्टवार्पिक: काननकर:" अत्र राधाया व्यक्तयौवने मध्यकैशोराद्य एवाभिपेकप्रकरणादवगत: । श्रीकृष्णस्य

वृन्दा । (सस्मितम्) वृन्दावनेश्वरि ! वृन्दश: प्रातिस्विकीर्धवला पालयतामसंख्यानां गोसंख्यानामनन्त एव काननकर:, तत् किं गणनाप्रयासेत ? ॥३१८॥

ललिता । विसाहे ! वुन्दावणचक्कवाट्टणी आणवेदि, गेण्ह हढेण पढमं पडुम्मण्णस्स वडुणो मणिमण्डणम् ।

मधुमङ्गल: (अपवार्य्य) भो पिअवअस्स ! णिच्चिदं एत्थ समाहाणं दुक्करं, ता पलाअणं च्चेअ अम्हाणं सरणम् ॥३१९॥

तु तदानीं शेषकैशोरमेव नित्यं स्थितं तच्च पौगण्डमध्य एवायं हरिर्दिव्यन् विराजत इति भक्तिरसामृतसिन्धूक्ते: पौगण्डवयस्येवाविर्भूतं 'एकादशसमास्तत्र गूढार्च्चि: सवलोऽवसदि'ति श्रीभागवतोक्त्या व्यवस्थापितञ्च । ततोऽत्राष्टवार्पिक: इत्यभिपेकानन्तरमष्टौ संवत्सरा व्यतिक्रान्ता इत्युक्तिन संगच्छते तत्र 'व्रजपुरवनितानां वर्द्धयन् कामदेवमि'ति । 'वृन्दावनं परित्यज्य स क्वचिन्नैव गच्छती'ति श्रीमद्भागवताद्युक्तेऽप्रकटप्रकाशगतैवेऽयं दानलीलेति केचिदाहु: । अन्ये तु 'कदाचित् स्यन्दोलिकया कर्हिचिन्नृपचेष्टये'ति दशमप्रमाणितैव हिन्दोलनदानलीला प्रकटलीलागतापीत्याहु: । तन्मते एकादशसमाव्याप्य गूढार्च्चि: तदनन्तरञ्च प्रकटार्च्चि: सन्नावसदिति व्याख्याया अष्टवार्पिकत्वमुपपाद्यते । यद्वा अभिषेकपूर्व्वतोऽपि केनाप्यगृहीतकराणामेपां करग्रहणमुचितमिति तदानीं कृष्णस्याष्टवर्पवयस्त्वादष्टवार्पिक इत्युक्तमिति ॥३१७॥

धवला गा: प्रातिस्विकी: प्रत्येकवल्लवस्वामिका: वृन्दश: शतकोटिसंख्या—प्रमाणेन चारयतां गोसंख्यानां गोपानां असंख्यानां संख्यातुमशक्यानाम् । तेनैते सर्व्वस्वमेव संदण्ड्य काननकरैरेव मूल्यभूतैर्भवत्या क्रीता एव कृष्णादयोऽभवन्निति द्योतितम् ॥३१८॥

"विशाखे वृन्दावनचक्रवर्त्तिनी आज्ञापयति गृहाण हठेन प्रथमं

कृष्ण:। हंहो गोठस्व ! ललितालगुड़ताड़नमाशङ्क्य मा संकुच, पुरस्तादेव सुदर्शनोऽस्मि।

राधा। (कृष्णमपाङ्गेन दरालिङ्ग्य) सुअल ! अलं विलज्जिदेण, काणणकरो उवणीअदु ॥३२०॥

कृष्ण: (सस्मितमवेक्ष्य)

एकस्य त्वं प्रभुरसि स तु द्वादशानां वनाना-
मेतच्चाल्पं निखिलजगतीवर्त्तिनामेव देव:।
सामन्तश्रीस्त्वमिति स महामन्मथश्चक्रवर्त्ती
पथ्यं राधे शृणु हठममुं मा कृथास्तस्य शुल्के ॥३२१॥

विशाखा। भो सुअल ! एव्वं होदु। तधावि तस्स उज्जाणचक्कवट्टिणो निदेशवट्टिणा तुह घट्टज्भक्खेण वुन्दावणचक्कवट्टिणीए अम्ह-पिअसहीए काणणकरो कधं मोअइदव्वो ? ॥३२२॥

सुबल: (साभ्यसूयम्) विसाहे ! णिच्चिदं खट्टारूढ़ासि, जं समूढ़-दुम्मद-घुम्मिदा तुमं तत्तं ण जाणन्ती पलवसि ॥३२३॥

पटुम्मन्यस्य वटोर्मणिमण्डनम्"। "भो प्रियवयस्य निश्चितं अत्र समाधानं दुष्करं तस्मात् पलायनमेवास्माकं शरणम्" ॥३१९॥

स्वस्थानस्थ: परान् द्वेष्टि य: स गोष्ठस्व उच्यते। जुगुप्सित-सौर्य्यतया सम्बोधनं सुदर्शनश्चक्रं सुन्दरश्च ॥

"सुवल अलं विलज्जितेन काननकर उपनीयताम्" ॥३२०॥

सामन्तश्रीस्त्वन्तु मण्डलेश्वरीत्यर्थ: ॥३२१॥

"भो सुवल एवं भवतु। तथापि तस्य उद्यानचक्रवर्त्तिनो निदेश-वर्त्तिना तव घट्टाध्यक्षेण वृन्दावनचक्रवर्त्तिन्या अस्मत्प्रियसख्या: कथं मोचयितव्य: " ॥३२२॥

"विशाखे निश्चितं खट्टारूढ़ासि यत् समूढ़दुर्म्मदघूर्णिता त्वं तत्त्व-मजानती प्रलपसि"। खट्टारूढ़शब्दोऽयं जुगुप्सितगर्व्ववद्वाचक:। पक्षे खट्टां आरूढ़ासि घूर्णाकुलासीत्यर्थ: ॥३२३॥

विशाखा। (सोत्प्रासस्मितम्) किं एत्थ तत्तम् ? कधेहि, सुणिस्सम् ॥३२४॥

सुबल:। किं वित्थरेण, संक्खित्तसारं सुणाहि। जो क्खु महा-मम्महचक्कवट्टी सो जेव्व णिच्चिदं पिअवअस्सरूवेण वट्टन्तो जाणीअदु। दोण्णं किर परमत्थदो भिण्णदा णत्थि ॥३२५॥

अर्ज्जुन:। विसाहे ! इदं वि थोअ च्चेअ ; ता सुणाहि। सो किर अस्सुदअरसाहम्मो सम्मोहणमाहुराभर-णव्वो सव्वोवरि विरे-हन्तो पिअवअस्सस्स सअलगोउलवइत्तणेण गोइन्दाहिसेअम-हूसवो कस्स वा गव्व ण क्खु खव्वेदि ? ॥३२६॥

मधुमङ्गल:। (सोल्लासम्) हन्त ललिदे ! सुट्ठु भणादि अज्जुणो ज उअणिसदाहिं वणं क्खु एदं कण्हवणं वण्णिज्जइ।

वृन्दा। निरधारि पूर्व्वपरयो,-र्न्यायविदग्धै: परविधिर्बलवान्।
राजनि नवेऽभिषिक्ते, पुरातने कस्य वा गणना ? ॥३२७॥

"किमत्र तत्त्वं कथय श्रोष्यामि" ॥३२४॥

"किं विस्तरेण संक्षिप्तसारं शृणु य: खलु महामन्मथचक्रवर्त्ती स एव निश्चितं प्रियवयस्यरूपेण वर्त्तमानो ज्ञायतां द्वयो: किल परमार्थतो भिन्नता नास्ति"। कथापक्षे तस्यातिविश्वासास्पदत्वात्। सिद्धान्तपक्षे महामन्मथस्य तत्स्वरूपशक्तिवृत्तित्वात् इत्यर्थ: ॥३२५॥

"विशाखे इदमपि अल्पमेतत् तत् शृणु स किल अश्रुतचरसाधर्म्म: सम्मोहनमाधुरीभरनव्य: सर्व्वोपरिविराजमानप्रियवयस्यस्य सकल-गोकुलपतित्वेन गोविन्दाभिषेकमहोत्सव: कस्य वा गर्व्वं न खलु खर्व्वयति" ॥३२६॥

"ललिते सुष्ठु भणति अर्ज्जुन: उपनिषद्भिर्वनं खल्विदं कृष्ण-वनं वर्ण्यते"। उपनिषद्भिर्गोपालतापनीभि: ॥३२७॥

मधुमङ्गलः । मुञ्चध वाआलत्तणम् । अम्ह-पिअवअस्सस्स च्चेअ कन्ताराहीसदा, अदो करहारीहिं तुम्हेहिं राअउलपुरिसा अम्हे झत्ति खण्डकुण्डलिआहिं सम्माणिज्जम्ह ।

कृष्णः । सखे सुबल ! श्यामलमण्डपिकां मण्डय, यदत्र साम्प्रतं शुल्कदासिकाः प्रवेशनीयाः ॥३२८॥

राधिका । हन्त तक्करचक्कवट्टिसामन्त सुअलः ! मह पिअसहीए सामलाए व्वदवेई सामलमण्डविआ एसा कीस तुम्हेहिं घट्टघट्टणेण दूसिज्जइ ? ॥३२९॥

कृष्णः । वक्राणां चक्रवर्त्तिनि ! कृतं राधाचक्रस्य चंक्रमणया, यदेष तरसा दुर्लक्ष्यं मनोऽपि भिन्दता धन्विनां मूर्द्धन्येन महामन्मथेनाधिष्ठितो महाघट्टरङ्गः ॥३३०॥

राधिका (संस्कृतेन)

वक्रश्रिया त्वमादौ, मध्ये चान्ते च वंशिकारसिक ।
कलकृतजगताप्रलयो, वक्रेश्वर एव देवोऽसि ॥३३१॥

कृष्णः (किञ्चिद्विहस्य)

"मुञ्चथ वाचालत्वं अस्मत्प्रियवयस्यस्यैव कान्ताराधीशता श्लेषेण कान्ताराधीशतेति । अतः करहारीभिर्युष्माभिः राजकुलपुरुषा वयं खण्डकुण्डलिकाभिः संमन्यामहे" ॥३२८॥

"हन्त तस्करचक्रवर्त्तिसामन्त सुबल मत्प्रियसख्याः श्यामलाया व्रतवेदी एषा मण्डपिका कस्मात् युष्माभिर्घट्टघट्टनेन दूष्यते" ॥३२९

चंक्रमणया भ्रमणेन मनोऽपि भिन्द्यतेति राधाचक्रवेधस्तस्यातिमुकर इति भावः ॥३३०॥

वंशिकारसिकेत्यनेन वंशीवादनकाल एव भङ्गीत्रयोपलब्धेः, वक्रेश्वरस्तन्नाम्ना शिवलिङ्गभेदः, प्रणयकर्त्तृत्वेन साधर्म्यम् ॥३३१॥

वाचि कचे भ्रुवि दृष्टौ, स्मिते प्रयाणेऽवगुण्ठने हृदि च ।
त्वामित्यष्टसु वक्रा,-मष्टावक्रायितां वन्दे ॥३३२॥

चम्पकलता । अलक्ख-वङ्किमावि तुमं लक्ख-वङ्किमासि ; ता अप्पणो समाणधम्मिणा जणेण कीलेहि । विसुद्धधम्माण अम्हाणं इदो जुत्ता गदी ।

कृष्णः । पुण्यवति ! महादानं विना गतिर्दुर्लभा ॥३३३॥

चम्पकलता । सन्तजणाणं सव्वपधीणा गदी पसिद्धा ॥३३४॥

चित्रा । पुरिसुत्तम ! पुण्णसिलोओसि, ता धम्मकम्म-पउत्ताणं अम्हाणं कुण मोक्खणम् ।

कृष्णः । चित्रे ! विचित्रेयमस्य चक्रवर्त्तिनः प्रक्रिया, यत्र धर्म्मेण दुर्लभो मोक्षः, किन्तु कामप्रयोगेण ध्रुवं लभ्यते ॥३३५॥

नान्दीमुखी । सत्थआराण मुणीणं वि अविसंवादिणी एसा रीदी,

अष्टावक्रायितमिति अष्टावक्र ऋषिर्वक्रेश्वरोपासक एवेति वन्दे इति तद्गिरैव मम वक्रेश्वरत्वेन मदुपासकत्व तत्र सिद्धमिति तां प्रति साधुवादः ॥३३२॥

"अलक्ष्यवक्रिमापि त्वं लक्षवक्रिमासि तदात्मनः समानधर्म्मिणो जनेन सह क्रीड़ाविशुद्धधर्म्माणामस्माकं इतो युक्ता गतिः" लक्षवक्रिमा लक्षसंख्यकवक्रत्ववान् ॥३३३॥

"सज्जनानां सर्व्वपथीना गदिः प्रसिद्धा" ॥३३४॥

"पुरुषोत्तम पुण्यश्लोकोसि तद्धर्म्मकर्म्मप्रवृत्तानामस्माकं कुरु मोक्षणम्" ॥३३५॥

"शास्त्रकाराणां मुनीनामपि अविसम्बादिनी एषा रीतिः यदेते कामस्यानन्तरमेव मोक्षं पठन्ति । धर्म्मं किल दूरतः प्रथम कक्षारोहणे" धर्म्मार्थकाममोक्षैश्चतुर्व्वर्ग इति अतएव मोक्षं प्रति कामस्यैव सांमुख्यं धर्म्मस्य तु व्यवहितमेवेति भावः ॥३३६॥

जं एदे कामस्स अणन्तरं च्चेअ मोक्खं पढन्ति, धम्मं किर दूरदो पढमकक्खारोहणे ॥३३६॥

कृष्ण: (स्मित्वा राधां पश्यन्) हन्त शुल्कक्रीति ! प्रीतिरेव नाथस्य तवाद्य गति:, तदानन्दय महादानीन्द्रमेनमभीष्टसेवया ॥३३७॥

ललिता । मोहण ! भूरिणा तवोहरेण च्चेअ घट्टीपालस्स दासीत्तणं सिज्झदि, एदाए उण महसहीए तं दुल्लहं जं अतवस्सिणी एसा ॥३३८॥

नान्दीमुखी । णिउञ्जलीलाकुञ्जरिन्द ! ललिदा भणादि, सोलुक्किएण तुए च्चेअ सेआउलेहिं उवासणिज्जा अम्ह-सही । जं एसा सअल-जोव्वणवदीमण्डलचक्कवट्टिणी, ता इमिणा विवरीदेण अलं जप्पिदेण ।

कृष्ण: (सहर्षम्) नान्दीमुखि ! दुरतिक्रमेयं ललिताकृताज्ञा, तदेव सेवितुकाम: प्रथमं हृदयङ्गमे शातकुम्भकुम्भे पञ्चशाखपल्लव-मर्पयामि । (इति राधामासादयति ।) ॥३३९॥

ललिता । (सभ्रूभङ्गमुपक्रम्य) णाअरम्मण्ण ! भिज्जदु एसा दे दुल्लीलदावल्लरी ॥३४०॥

हे शुल्केण क्रीत क्रीतात् करण पूर्व्वादिति ङीप् ॥३३७॥

"भूरिणा तपो भरेण एव घट्टिपालस्य दासीत्वं सिद्ध्यति एत-स्या: पुनर्मम सख्यास्तद्दुर्लभं यत् अतपस्विनी एषा" पक्षे असंतप्ता अदीनेत्यर्थ: ॥३३८॥

"निकुञ्जलीलाकुञ्जरेन्द्र ललिता भणति । भूरिणेत्यादि वाचा व्यञ्जयतीत्यर्थ: । शौल्किकेन त्वयैव सेवाकुलैरुपासनीया अस्मत् सखी यदेषा सकलयौवनवतीमण्डलचक्रवर्त्तिनी तदनेन विपरीतेन अलं जल्पितेन" ॥३३९॥

"नागरम्मन्य भिद्यतु विश्राम्यतु एषा दुर्ल्लीलतावल्लरी" ॥३४०॥

कृष्ण: । कृपणे ! विपणायितासौ स्ववशा भवत्या शुल्केन, तदत्र 'विक्रीते करिणि किमंकुशे विवाद: ?' (इति मन्दं मन्दं पदं स्पन्दयति ।) ॥३४१॥

ललिता । कण्ह ! अणहिण्णो णासि ललिदा-दुल्लालिच्चाणं, ता किंत्ति अप्पणो माहप्पं पेक्खाविदुं पउत्तासि ? ॥३४२॥

कृष्ण: । सुवीरम्मन्ये ! पश्य, विक्रमिणां चक्रवर्त्ती पुरस्तादेव चंक्र-मीति; तदलं क्लीवभङ्गकारिणा कृत्रिमभुजङ्गमेनैवामुना मुधा-टोपतरङ्गेण । तूर्णं विश्राणय घट्टशुल्कानि ॥३४३॥

ललिता । हन्त घट्टीघण्टाघोसण ! जइ सुलुक्कग्गहे दीहग्गहोसि, तदा सञ्झाओसरे अम्ह-दुआरं आअच्छेहि, सुट्ठु घणं घोलं दाइस्सम्ह ।

(कृष्ण: स्मितं कृत्वा नान्दीमुखीमुखमवलोकते ।) ॥३४४॥

विपणायिता विक्रीता स्ववशा स्वाधीना पक्षे करिणी । किम-ङ्कुशे इति यदीयं मह्यं विक्रीतैव ततोऽस्य स्पर्शे किं विप्रतिपद्यसे इति भाव: ॥३४१॥

"अनभिज्ञो नासि ललिता दुर्ल्लालित्यानां तत् किमिति आत्मनो माहात्म्यं प्रेक्षयितुं प्रवृत्तोऽसि" ॥३४२॥

विश्राणय देहि विश्राणनं वितरणमित्यमर: ॥३४३॥

"घट्टीघण्टाघोषण यदि शुल्कग्रहे दीर्घाग्रहोऽसि तदा सन्ध्या-वसरे अस्मद्द्वारमागच्छ सुष्ठु घनं तक्रं दास्यामि" । घनं घोलमिति सर्व्वदिनपर्य्यन्तप्रतिनियतं याचककर्म्मकारादिजनप्रदानावशिष्टतया मन्थनीतलस्थमित्यर्थ: । सन्ध्यावसर इति तदानीं सर्व्वजनानुपादेय-त्वेऽपि जाताम्लातकतया सलवणं तत् भवतामतिरोचकं भवेदेवेति भाव: ॥३४४॥

नान्दीमुखी। ललिदे ! कामहेणुविन्दवइणो वल्लविन्दस्स घरे किं घणं घोलं वि णत्थि, जं तस्स किदे तुम्हाणं घरे गन्तव्वम् ॥३४५

कृष्णः। सुदीर्घाक्षि राधिके। फल्गुनि ललिताप्रलापारभटीपटले त्वं निवद्धप्रत्याशा मा खलु शुल्कनिर्यातनाय वैमुख्यमपेक्षिष्ठाः। तदेप सन्निकृष्टो रहस्यं वर्णयामि। (इत्युरसि पाणिमाधित्सति।) ॥३४६॥

ललिता। दुल्लहफले हठिल्ल ! ललिदाए पुरदो भुअणपराणो गन्धवाहोवि राहीए त्थणम्वरञ्चलस्स फसणं वि ण कादुं पहवेदि। एत्थ हत्थं णिक्खेविदुं किदज्झवसाअस्स दे मुद्धदा ज्जेअ पज्जवस्सदि ॥३४७॥

कृष्णः। कृष्णकुण्डलिनश्चण्ड कृतं घट्टनयानया।
फुत्कृतिक्रिययाप्यस्य भवितासि विमोहिता ॥३४८

ललिता। (संस्कृतेन) कृतं विभीषिकया, यतः,
विलसति सुसिद्धमन्त्रे, मण्डितमतिराहितुण्डिकी ललिता।
सुकरं मूर्द्धोन्नमनं, न जिह्मगस्यात्र कृष्णस्य ॥

"ललिते कामधेनुवृन्दपतेः सर्व्ववल्लवेन्द्रस्य गृहे किं घनं तक्रं नास्ति यत्तत्कृते युष्माकं गृहे गन्तव्यम्" ॥३४५॥

शुल्कनिर्यातनाय शुल्कार्पणाय ॥३४६॥

"दुर्ल्लभफले हठिन् ललितायाः पुरतः भुवनप्राणो गन्धवाहोऽपि राधायास्तनाम्वराञ्चलस्य स्पर्शनमपि न कर्त्तुं प्रभवति। अत्र हस्तं निक्षिप्तुं कृताध्यवसायस्य ते मुग्धतयैव पर्य्यवस्यति"। श्लेषेण मुग्धता आनन्दमूर्च्छा ॥३४७॥

कृष्णकुण्डलिनः कालसर्पस्य। पक्षे कृष्णस्य कुण्डलधारिणः घट्टनया चालनेन फुत्कृतिः फणाग्रस्पर्शाघातः पक्षे चुम्वनं लक्ष्यते ॥३४८

ललिता आहितुण्डिकी व्यालग्राहिणी विलसति सुसिद्धमन्त्रे

कृष्णः। नान्दीमुखि ! घट्टाधिकारिणामभिरूपायामप्यनुतवृत्तौ पराङ्मुखी मे दक्षिणस्य रसना, पाणिश्च हठचेष्टायां पृष्ठदायी। तदत्र किं दूपणमासां रामाणां विप्रतिपत्तौ ? ॥३४९॥

ललिता। (सनर्म्मस्मितं संस्कृतेन)
मिथ्या जल्पतु ते कथं नु रसना साध्वीसहस्रस्य या
विम्बोष्ठामृतसेवनादघरिपो पुण्या प्रयत्नादभूत्।
कस्मादेव वलात् करोतु च करः सोढुं क्षमः सुभ्रुवां
रक्तः सुष्ठु न नीविवन्धमपि यः का वान्यवन्धे कथा ?

कृष्णः। (किञ्चिद्विहस्य) ललिते ! सत्यं भवत्यः कृतपुण्यपुञ्जानां शिरोमणयः, यासां भागधेयसिद्धौपधिनाकृष्टा भगवत्याः पारिपार्श्विका नान्दीमुखीयं प्रत्युपस्थिता ॥३५०॥

ललिता। णान्दीमुहि ! भअवदी–पाएहि साविदासि, तुरिअं इदो दूरीहोहि। पेक्खम्ह किं एसो अम्हाणं करेदि ॥३५१॥

नान्दीमुखी। ललिदे ! महासंकडं एदं तुम्हाणं, जं हठिल्लचक्कवट्टिणो हत्थे पड़िदाओ त्थ। ता एत्थ समए परिच्चाओ ण क्खु सिणेहस्स अणुरूवो ॥३५२॥

व्युत्पन्ना अतएव जिम्भगस्य सर्पस्य, पक्षे कुटिलचर्य्यस्य तव मूर्द्धोन्नमनं फणोत्क्रमणं पक्षे चुम्बनाद्यौद्धत्यं लक्ष्यते ॥३४९॥

रक्तः अनुरागी नीव्या बन्धं सोढुं न क्षमः कृपालुतयैव यः शीघ्रं तं वन्धं सोढुं न क्षमते स कथं वलात् करिष्यतीत्यर्थः। अन्यबन्धे कञ्चुलिकादिबन्धे ॥३५०॥

"नान्दीमुखि भगवतीपादैः शापितासि त्वरितं इतो दूरीभव प्रेक्षामहे किं एप अस्माकं करोति" ॥३५१॥

"ललिते महाशङ्कटं एतद्युष्माकं यत् हठिलचक्रवर्त्तिनो हस्ते पतितास्थ। तदत्र समये परित्यागो न खलु स्नेहस्यानुरूपः"। तेन

अर्ज्जुनः । पिअवअस्स ! जाओ पगव्भाओ सुलुक्के विप्पड़िवज्जन्ति, ताओ तुरणं अम्ह-पुरदो आणिज्जन्तु त्ति उज्जाणचक्कवट्टिणो सासणं कहं तुए विसुमरिदम् ?

कृष्णः (हर्षमभिनीय) साधु स्मारितमर्ज्जुनेन । हन्त ललिते ! सखायो मे सख्यश्च ते घट्टमेवाधितिष्ठन्तु, त्वन्तु मया सार्द्धमेकाकिनी स्वयं प्रस्थाय निष्कुटचक्रवर्त्तिनः सुष्ठु गोष्ठीगङ्गावगाहनेन खेलय निजलोचनमीनयोर्मिथुनम् ॥३५३॥

ललिता । धम्मधुरीण ! ताए च्चेअ कुलङ्गणाए अप्पणो दोउलं रक्खिदं, जाए पुण्णसिलोअमउलिणा तुए सद्धं एक्काणिणीए णिज्जणे चलिदम् ॥३५४॥

कृष्णः । किं वानया क्षेपिष्ठे घट्टकर्म्मणि दीर्घसूत्रता प्रस्तावनया । प्रसह्य तरसा शुल्कमेवाङ्गीकरवाणि । (इति राधिकामनुसाधयति ।) ॥३५५॥

ललिता । (सोल्लुण्ठं विहस्य) हन्त सोम्म सुउमार ! अत्तणो णेत्तचत्तरे राहिआतणुप्फंस-साहसिअदा तुअम्मि वट्टदि त्ति सव्वधा ण पत्तिआएदि । एसा ललिदा त्ति पसिद्धा सिद्धाणुसासना वल्लवी । ता पेक्खिदुं किदकोदूहला चिट्ठदि वित्थारेहि अप्पणो विक्कम-सव्वस्सम् ॥३५६॥

कृष्णः । (किञ्चिद्विहस्य) नमस्तुभ्यं महाचण्डि ! चामुण्डे ! नमस्तुभ्यम् । नून मुण्डमालाख्यमात्मनो मण्डनं विमुच्य दुर्व्वारमार-संहाराय गोपिकारूपेणोपस्थितासि ॥३५७॥

विशाखा । सहि ललिदे ! विजइणी होहि ।

ललिता । (स्मितं कृत्वा स्वगतम्) किदं सुट्ठु संलावविलसिदम् । ता दोण्णं अहिट्ठामिअ-पूरस्स ओगाहणे तित्थं आरम्भिस्सम् ॥३५८॥

(प्रकाशम्) विसाहे ! तत्थ गदुअ णिवेदेहि भअवदीं अम्हाणं वाढ़ं एदं विड़म्बणम् ।

यद्यपि त्वया शपथो दत्तस्तथापि मया न शक्यते गन्तुं धर्म्मापेक्षतोऽपि स्नेहापेक्षाया लोके बलवत्त्वेन दर्शनादिति भावः ॥३५२॥

"प्रियवयस्य याः प्रगल्भाः शुल्के विप्रतिपद्यन्ते तास्तूर्णं अस्मत् पुरत आनीयन्तामिति उद्यानचक्रवर्त्तिनः शासनं त्वया कथं विस्मृतम्" ॥३५३॥

"धर्म्मधुरीन् तयैव कुलाङ्गनया आत्मनो द्विकुलं रक्षितम् । यया पुण्यश्लोकमौलिना त्वया सार्द्धं एकाकिन्या निर्जने चलितम्" ॥३५४॥

कृष्णः क्षेपिष्ठे क्षिप्रता मे ॥३५५॥

"हन्त सौम्य सुकुमार आत्मनो नेत्रचत्वरे राधिका-तनुस्पर्शसाहसिकता त्वयि वर्त्तत इति सर्व्वथा न प्रत्येति एषा ललितेति प्रसिद्धा सिद्धानुशासना वल्लवी तत् प्रेक्षितुं कृतकौतूहला तिष्ठति सुष्ठु विस्तारय आत्मनो विक्रमसर्व्वस्वमिति" सर्व्वमेतद्वचनडाम्बर्य्यं ललितायाः । एतेनैवोपाधिना श्रीकृष्णबलात्कारमाशासानायाः स्वसख्याः वाम्यरूपप्रौढ़िरक्षार्थमेव अन्यथा चिरादासन्नकान्तायाः प्रतिक्षणमनुभूतरूपगुणनर्म्मोद्रिकायाः सहसैवात्यौत्सुक्यचुलुकितधैर्य्यपुञ्जत्वे दाक्षिण्यमयः प्रकट एव उत्मादोऽपि संभाव्येत सच दानघट्टविवादवचनसमरप्रतिकूल एवेति ॥३५६॥

किञ्चिद्विहस्येति प्रायोऽज्ञानसूचक एव हासः सच युष्मत् सखीचापल्यप्रकटोत्थापनपूर्व्वकं तत् प्रौढ़िध्वंसकस्वविजयेच्छोर्मम प्रसभो नाभिप्रेत इति तदाज्ञापयति चेति ॥३५७॥

"सखि ललिते विजयिनी भव" । "कृतं सुष्ठु संलापविलसितम् । तद्द्वयोरभीष्टामृतपूरस्यावगाहने तीर्थमारप्स्ये" ॥३५८॥

"विशाखे तत्र गत्वा निवेदय भगवतीं अस्माकं वाढ़मिदं विड़-

नान्दीमुखी। (स्वगतम्) एसा भअवदी माहवीमण्डवन्तरिदा पेक्खन्ती सव्वं सुणादि ॥३५९॥

(प्रकाशम्) ललिदे ! भअवदी क्खु गोउलेसरीए पासे वट्टदि।

राधिका (सपरिहासं विहस्य जनान्तिकम्) हला ललिदे ! अप्पणो दि भुइट्ठो अम्हेसु तुम्ह-सिणेहो अज्ज च्चेअ सुट्ठु पच्चक्खीकिदो, जं घट्टआलदो जादं अम्हाणं जादणं तत्थ अप्पसमप्पणेण मोआविदुं उवक्कमन्ती तुमं इङ्गिदेण लक्खीअसि, ता धण्णासि ॥३६०॥

ललिता। अइ सूरव्वदेक्कविस्सुदे ! असमवाणीसमरे च्चेअ सच्चं कुसलम्हि, तुमं उण असमवाणसमरे, जं पुणो पुणो दिट्ठपुरिसआर-सोट्ठव-सारासि। ता पसीद, कड़क्खजिम्भणवाणेण णं महावीरम्मण्णं जिम्भअन्ती क्खणं एत्थ चिट्ठ। अम्हे थोअं अग्गदो गदुअ पड़िवालेम्ह तुमम् ॥३६१॥

म्वनं" "एषा भगवती माधवीमण्डपान्तरिता सर्व्वं शृणोति" ॥३५९॥

"ललिते भगवती खलु गोकुलेश्वर्य्याः पार्श्वे वर्त्तते"। "हला ललिते आत्मनोऽपि भूयिष्ठः अस्मासु युष्मत्स्नेहः अद्यैव सुष्ठु प्रत्यक्षीकृतः। यत् घट्टपालात् जातां अस्माकं यातनां तत्र आत्मसमर्पणेन मोचयितुं उपक्रामन्ती त्वं इङ्गितेन लक्ष्यसे तत् धन्यासि"। इङ्गितेनेति सहसैव चण्डममान्थर्य्यं तव कारणं अन्यच्च दुर्व्वारमारसंहाराय गोपिकारूपेणोपस्थितेति त्वां प्रति यदेव कृष्णेनोक्तं तदेव सखि ललिते विजयिनी होहीति विशाखया तत्र मारसंहारे विजययुक्ता भवेति भङ्ग्या त्वयि परिहास एव व्यञ्जितस्तत् श्रुत्वा त्वया स्मितमेव कृतं ननु तां प्रति किञ्चित् प्रत्युक्तं इति तत्र तवाभिलापोऽवगत इति ॥३६०॥

"अयि सूर्य्यव्रतैकविश्रुते" पक्षे वीरव्रताख्याते "असमवाणीस-

राधिका। (सप्रणयाभ्यसूयम्) अवेहि अप्पणो आआरसंगोवणेक्कदक्खे ! अवेहि। दाणिं च्चेअ पेक्खिस्सम्।

कृष्णः। (स्वगतम्) सम्प्रति मन्थरितचण्डिमेव संलक्ष्यते ललिता। (प्रकाशम्) साधु साधु ललिते ! समयाभिज्ञासि, यदद्य मुधा विवादघटां विघटय्य घट्टमधितिष्ठसि ॥३६२॥

ललिता। छलकेलिछइल्ल ! एसो हठिल्लदा-लउड़ीमेत्त-ओट्टम्भणो वल्लवाणं गणो विअ ण क्खु सारग्गाहिणीणं वल्लवीणं गणो ॥३६३॥

विशाखा। (संभ्रममभिनीय) ललिदे ! महापमादो महापमादो।

ललिता। कीदिसो एसो ?

विशाखा। अइ कलहलोलुहदा-विम्हारिदधम्मे ! विरमेहि। तेहिं जण्णिएहिं संदिसिअ पेसिदं अम्हाणं जं हवणिज्जं हेअङ्गवीणं हरन्तीहिं तुम्हेहिं कुलङ्गणाणं कुलकण्णआणं वा दूसणआरिणि

मरे एव सत्यं कुशलास्मि त्वं पुनरसमवाणसमरे यत् पुनः पुनर्दृष्टपुरुषकारसौष्ठवसारासि तत् प्रसीद कटाक्षजृम्भणवाणेन एनं महावीरम्मन्यं जृम्भयन्ती क्षणमत्र तिष्ठ वयमल्पमग्रतो गत्वा प्रतीक्षामहे त्वाम्"। सूर्य्यव्रतेति तव सूर्य्यव्रतारम्भस्य कारणं प्रयोजनं च सर्व्वे जानन्त्येवेति भावः। असमवाणी वक्रवाग्विलासः असमवाणः कन्दर्पश्च पुरुषकारः पुरुषार्थसाधकत्वं पुरुषायितत्वञ्च ॥३६१॥

"अपेहि आत्मन आकारसंगोपनैकदक्षे अपेहि इदानीमेव प्रेक्षिष्ये" ॥३६२॥

"छलकेलिविदग्ध एष हठिल्लता लगुड़ीमात्रावष्टम्भनो वल्लवानां गण इव न खलु सारग्राहिणीनां वल्लवीनां गणः" ॥३६३॥

"ललिते महाप्रमादो महाप्रमादः"। ललिता "कीदृश एष"। विशाखा "अयि कलहलोलुपता विस्मारितधर्म्मे विरम। तैर्याज्ञिकैः संदिश्य प्रेषितं अस्माकं यत् हवनीयं हैयङ्गवीनं हरन्तीभिर्युष्माभिः

कामिजणे दिट्ठि-क्खेवोवि सव्वधा ण कादव्वो। (इति नासिकाग्रे तर्ज्जनीमासज्य) हद्धी हद्धी, तुए उण उम्मत्ताए मोहेण मोहं जेव्व जप्पन्तीए वहुआलं वअणं वि संमीसिदम् ॥३६४॥

ललिता। (विषादमभिनीय) विसाहे ! सुट्ठु कधेसि, सव्वं मुद्धाए मए विसुमरिदम्। ता चिन्तेहि एत्थ किंपि णिक्किदम्।

वृन्दा। (विहस्य) यज्ञपुरुषस्य विष्णोरनुस्मरणमेव मुनयः सर्व्वाघविध्वंसनं व्याहरन्ति, ततः स्मर्य्यतामसौ। (ललिता 'विण्णु विण्णु' इति कीर्त्तयन्तो नासिकामभिस्पृश्य कर्णं स्पृशति।) ॥३६५॥

कृष्णः (सस्मितम्) ललिते ! सत्यं विदूषितासि, तदत्र तरसा सन्निधेहि। सद्य एव दोषास्पृष्टां करवाणि भवतीम्। (इत्यनुसृत्य भुजाश्लेषं नाटयति।) ॥३६६॥

ललिता। (ससाध्वसमपसृत्य सनिर्व्वेदमिव) हन्त हन्त, परकलत्तमिलावण-विलास-साहसिएण कुलवालिआहं प्फसणे दूसिदम्हि।

राधिका (स्मितं कृत्वा) ललिदे ! अम्ह-सङ्गादो तुण्णं अवेहि, जं रदहिण्डअ-प्फंस-कलङ्किदासि ॥३६७॥

कुलाङ्गनानां कुलकन्यानां वा दूषणकारिणि कामिजने दृष्टिक्षेपोऽपि सव्वथा न कर्त्तव्यः"। "हा धिक् हा धिक् त्वया पुनरुन्मत्तया मोहेन मोघमेव जल्पन्त्या वहुकालं वचनसंमिश्रितम्" ॥३६४॥

"विशाखे सुष्ठु कथयसि सर्व्वं मुग्धया मया विस्मृतम्, तच्चिन्तयात्र किमपि निष्कृतम्" ॥३६५॥

दोषैरस्पृष्टां पक्षे दोषा भुजेन स्पृष्टाम् ॥३६६॥

'हन्त परकलत्रम्लापनविलाससाहसिकेन कुलवालिकाहं स्पर्शे दूषितास्मि"। स्मितमिति मदङ्गस्पर्शयितुकामयैवानया स्वस्पर्शपरा-

ललिता। अइ ! विणोदं कुणन्तीए अलिअं च्चेअ एदं भणिदं मए। कुदो मादिसीए पइव्वदासिहण्डिणीए प्फंस-महासाहसे एसो भुअ-भुअङ्गमो उत्थादुं पहवेदु ? ॥३६८॥

राधा। अइ असच्चभासिणि ! विण्णादं विण्णादं, चिट्ठ चिट्ठ। किदब्भुत्थाणाइं तुह तणुरुहाइं च्चेअ सक्खित्तणं तणन्ति ॥३६९

ललिता। रअणारीअ ! सुट्ठु क्खुहिदम्हि, जं तुए दूसिदं मं सहीओ ण प्फंसन्ति। अदो 'न दुःखं पञ्चभिः सह' त्ति भणिदी जधा पअडीहोदि तधा करेहि।

कृष्णः। चम्पकलते ! पयोधरोल्लेखि-दीर्घशाखोऽयं तमालः, तदेनमालम्ब्य परिफुल्ला भव ॥३७०॥

चम्पकलता। (सकम्पं किञ्चिदपसृत्य) छइल्ल ! पुणो वि ललिदं जेव्व मिलाणं करेहि, जं 'न शयानः पतत्यधः' त्ति वअणं सुणीअदि।

भवोऽपि प्रथमं स्वीकृतमित्यभिप्रायात्। ललिते "अस्मत् सङ्गात् तूर्णमपेहि यत् रतहिण्डकस्पर्शकलङ्कितासि,' रतहिण्डकः स्त्रीचौर ॥ ६७

"अयि विनोदं कुर्व्वत्या अलिकमेव इदं भणितं मया कुतो मादृश्याः पतिव्रता शिखण्डिन्याः स्पर्शमहासाहसे एष भुज-भुजङ्गम उत्थातुं प्रभवतु" ॥३६८॥

"अयि असत्यभाषिणि विज्ञातं विज्ञातं तिष्ठ तिष्ठ। कृताभ्युत्थानानि तव तनुरुहाण्येव साक्षित्वं तन्वन्ति" ॥३६९॥

"रतनारीक सुष्ठु क्षुभितास्मि यत् त्वया विदूषितां मां सख्यो न स्पृशन्ति। 'अतो न दुःखं पञ्चभिः सहे'ति भणितिर्यथा प्रकटीभवति तथा कुरु" ॥३७०॥

"छविल पुनरपि ललितामेव म्लानां कुरु। न शयानः पतत्यधः इति वचनं श्रूयते" "अपि नाम प्रियसखीं विशाखां कठिनोरुपञ्च-

ललिता । अवि णाम पिअसहीं विसाहं कढिणोरु-पञ्च-साहोवसोहिदं अइरादो पेक्खिस्सम् ॥३७१॥

कृष्णः । विशाखिके ! तरुणालिङ्गिता सुच्छाया भव, तदितअम्पकलतेव मा भङ्गमुपयासीः ।

विशाखा (तूर्णमपसर्पन्ती) कलङ्किणि ललिदे ! कधं 'विदूपयति निर्लज्जः स्वयं दुष्टः परानपि' त्ति वअण-पमाणं कादुं पउत्तासि ? ता सुप्पअड जेव्व दे आऊदम् । अल अलिएण विलक्खणभावेण । दिट्ठिआ चिन्ताउलासु अम्हेसु अतक्किदं सुलुक्कस्स योग्गा किदासि तुमं देव्वेण । (ललिता किञ्चिदपसृत्य तं प्रेक्ष्य दृगञ्चलं कुञ्चयति ।) ॥३७२-३७३॥

कृष्णः । (स्मित्वा राधां दिधोर्पन्) विलोलाक्षि ! ललिता-लोचनभङ्गीवात्यया वाढमान्दोलितपाणिपल्लवोऽस्मि, तदद्य नारोपय सभ्ये मयि साभ्यसूयं चक्षुः ॥३७४॥

राधा । (ससाध्वसं विशखामनुसरन्ती) सहि ! परित्ताहि अत्ताणअं च्चेअ, जं राहाए मालिण्णे विसाहा मलिणा भणीअदि ॥३७५॥

शाखोपशोभितां अचिरात् प्रेक्षिष्ये" । पक्षे पञ्चशाखः पाणिः कठिनः इति पुरुषपाणेः काठिन्यं सल्लक्षणमेव ॥३७१॥

तरुणा वृक्षेण पक्षे तरुणेन मया यूना । सुच्छाया पक्षे सुकान्तिः ॥३७२॥

"तत्सुप्रकटमेव तवाकूतं अलं अलिकेन विलक्षणभावेन दिष्ट्या चिन्ताकुलासु अस्मासु अतर्कितं शुल्कस्य योग्यकृतासि त्वं देवेन" ॥३७३॥

सभ्ये इति त्वत्सख्या यदभिप्रेतं अनुतिष्ठामि तत्तवैवेति विचारयेति भावः ॥३७४॥

"सखि परित्राहि आत्मानमेव यद्राधाया मालिन्ये विशाखा मलिना भण्यते" राधा-विशाखयोरैक्यादिति ललितायां वहिरङ्गत्वं

ललिता । अइ गन्धव्विए ! धुत्तमउलिणा लुद्धएण अणुद्दुदा तुमं कीस णं पञ्चमुहीं मुक्किअ एक्कं कुरङ्गिअं सरणं गच्छसि ? ता मह अङ्कं अलङ्करेहि, तुरिअं सङ्काउलो भविअ पलाअदु एसो ॥३७६॥

राधिका । (कुतुकेन भूरिणा भ्रूभङ्गेनाधिक्षिपन्तीव सनर्मस्मितं संस्कृतेन)

विश्रम्भघातिनि चिरादुपरुध्य शुद्धा,
विश्रम्भतस्त्वमिह नः स्वगृहादनैषीः ।
लोभाद्व्रतं यदि निजं व्यधुनोस्तदस्तु,
किं दूषयन्त्यपि सतीस्त्रपसे न देवि ? ॥३७७॥

ललिता । हद्धी हद्धी । सहि वुन्दे ! भणाहि, कधं सुद्धा हुविस्सम् ।

वृन्दा । ललिते ! कृतमेतया चिन्ताचर्य्यया । निकुञ्जमहातीर्थे रतिवल्लभजागर्य्याव्रते प्रारब्धे का तावदघस्य सम्भावनापि ?

कृष्णः । केलिकुतूहलितया कुतः स्वकर्म्मणि मन्थरोऽस्मि, यदद्य शुल्कार्थमुद्यमः खलु साधीयान् ।

प्रकटमर्पयति ॥३७५॥

"अयि गान्धर्व्विके धूर्त्तमौलिना लुब्धकेन अनुद्रुता त्वं कस्मादेनां पञ्चमुखीं त्यक्त्वा एकां कुरङ्गिकां शरणं गच्छसि तन्ममाङ्कं अलंकुरु त्वरितं शङ्काकुलो भूत्वा पलायतु एष" । गन्धर्व्वः तरस्वी रामः सृमरो गवयः शश इति गन्धर्व्वः प्रकृष्टपशुविशेषः तस्य पत्नी गान्धर्व्विका । पक्षे हे गान्धर्व्विके लुब्धकेन मृगयूना लोभिना च । पञ्चानां सखीजनानां मध्ये मुख्यां पञ्चमुखीं ललितां पक्षे सिंहभार्य्याम् ॥३७६॥

विश्रम्भो विश्वासः ॥३७७॥

"सखि वृन्दे भण कथं शुद्धा भविष्यामि" ॥

नान्दीमुखी। ललिदे ! पेक्ख, पच्चासीददि मज्झण्णो। ता कधी-अदु केत्तिओ सुलुक्को तुम्हाणं सम्मदो ॥३७८॥

ललिता। हन्त दाणिन्द ! जइवि अम्हाणं पञ्चपाइआ च्चेअ एत्थ जुत्ता, तहवि तुम्ह-मुहं अवेक्खिअ एसा मणिमुद्दिआ उव-णीदा। (इति चित्रांगुलेराकृष्य मुद्रिकां पुरस्तादुपन्यस्यति।)

कृष्णः। (सव्याजामर्षम्) सखे ! क्षिप्र क्षिप्यतामद्रिमूर्द्धनि क्षुद्रेयं मुद्रिका। (सुबलः प्रक्षेपमुद्रामभिनीय मुद्रिकां करे सङ्गोप-यति।) ॥३७९॥

ललिता। (सरोषम्) वुन्दे ! दिट्ठं तुए जं दुल्लहा मणिमुद्दिआ पक्खित्ता।

नान्दीमुखी। हला, जह तस्स णअणिहीणं अहिवइणो कुवेरस्स महाचिन्तामणिमणीसिदेण सादर-पसारिदे हत्थे फुट्ट-कप-ड्डिआ-णिक्खेवो, तह जेव्व एसो तुम्ह ववहारो ॥३८०॥

ललिता। (स्वगतम्) दोण्ण सुट्ठु उक्कण्ठदाणं आसासणं भङ्गीए करिस्सम्। (इति परिक्रम्य जनान्तिकम्) हला राहि ! जधारिहं दाणं विणा दुल्लहं अम्हाणं इदो पत्थाणं; ता तुह

"ललिते पश्य प्रत्यासीदति मध्याह्ने तत् कथ्यतां कियान् शुल्कः युष्माकं सम्मतः" ॥३७८॥

"हन्त दानेन्द्र यद्यप्यस्माकं पञ्चपादिका एवात्र युक्ता तदपि युष्मन्मुखं अपेक्ष्य एषा मणिमुद्रा उपनीता"। पादिका चत्वारिंश-त्कपर्द्दिका ॥३७९॥

"वृन्दे दृष्टं त्वया दुर्ल्लभा मणिमुद्रिका प्रक्षिप्ता" "यथा तस्य नवनिधीनां अधिपतेः कुवेरस्य महाचिन्तामणिमनीषितेन सादर-प्रसारिते हस्ते छिद्रकपर्द्दिकानिक्षेपस्तथैवैष युष्मद्व्यवहारः" ॥३८०॥

"द्वयोरुत्कण्ठतयोराश्वासं भङ्ग्या करिष्ये" "हला राधे यथार्थं

कण्ठ-ट्ठिदं हारं च्चेअ सुलुक्कीकरेम्ह। (इति वलादिव हार-मुत्तार्य्य सनर्म्मस्मितम्) उक्कण्ठदे ! कीस अधीरासि ? एसा णिसिट्ठत्था मोत्तिआवली दूदी कण्हं अलंकादुं चलिदा, ता अहिसारे सज्जा होहि। ३८१-३८२॥

राधिका। अइ संभोअ-संरम्भिणि ! अलं इमिणा दम्भ-गम्भीरि-मारम्भेण। एत्थ विवाद-महामहे अदक्खिणावि तुमं दक्खि-णासि णिम्मिदा पणएण सहीहिम् ॥३८३॥

ललिता। (कृष्णमवेक्ष्य) घट्टणाह ! एसा अणग्घा मोत्तिआ-वली मए उपणिहीकिदा। अदोपदोसे सुवण्णोवणएण पुणो तुअत्तो मोआवइदव्वा।

कृष्णः। (सहर्षं हारमादाय स्वगतम्) सोऽयं शङ्खचूड़स्य चूड़ा-मणिरेव नायकीकृतोऽस्ति, यः सानुकम्पमार्य्येण प्रलम्वरिपुणा राधिकायं प्रसादीकृतः। तदनेन ममाधुना प्रत्याशावीजस्यांकुरा-वस्थता विस्तृता। (इति हारेण स्वकण्ठं प्रसाधयति।) ॥३८४

दानं विना दुर्ल्लभं अस्माकमितः प्रस्थानं तत्तव कण्ठस्थितं हारमेव शुल्कीकुर्म्मः" ॥३८१॥

"उत्कण्ठते कस्मादधीरासि एषा निसृष्टार्था मौक्तिकावली दूती कृष्णं अलं कर्त्तुं चलिता"। 'विन्यस्तकार्य्यभारा या द्वाभ्यामेकतरेण वा। युक्त्योभौ घटयेदेषा निसृष्टार्था निगद्यते'। "तदभिसारे सज्जा भव" ॥३८२॥

"अयि संभोगसंरम्भिणि अलमनेन दम्भगम्भिरिमारम्भेण अत्र विवाद-महामखे अदक्षिणापि त्वं दक्षिणा निर्म्मिता प्रणयेन सखीभिः" ॥३८३॥

"घट्टनाथ एषा अनर्घा मौक्तिकावली मया उपनिधीकृता"। 'पुमानुपनिधिर्न्यासः' इत्यमरः। "अतः प्रदोषे सुवर्णोपनयेन पुनस्त्वत्तो

राधिका । (जनान्तिकम्) ललिदे ! पेक्ख भाअधेअं तवस्सिणीए मोत्तिआवलीए ।

ललिता ।

तुह णिसेविअ उण राहि, त्थणसम्भुं मोत्तिआवली सुद्धा ।
हरिणो विहरइ हिअए, तुह कहणिज्जो कहं महिमा ? ॥३८५॥

राधिका । कुडिले ! अलं पलावेण । पेक्खीअदु इदो वि पउरं भंगुराए भमर-कलङ्किदाए वणमालाए सोहग्ग-लीलाइदम् (इति संस्कृतमाश्रित्य) ॥३८६॥

विशुद्धाभिः सार्द्धं व्रजहरिणनेत्राभिरनिशं
त्वमद्धा विद्वेषं किमिति वनमाले रचयसि ।
तृणीकुर्व्वत्यस्मान् वपुरघरिपोराशिखमिदं
परिष्वज्यापाद महति हृदये या विहरसि ॥३८७॥

मधुमङ्गलः । कल्लाणि ललिदे ! महाघट्टवालिन्दो तुम्हेहिं आणन्दिदो, ता एसो वुहुक्खिदो एक्काए हेअङ्गवीणगब्भाए गुरुअगग्गरीए काअत्थोवि काअत्थो किज्जउ ॥३८८॥

मोचयितव्या" सुवर्णानां पक्षे सुवर्णाया: राधाया उपनयेन ॥३८४॥

"ललिते पश्य भागधेयं तपस्विन्या मौक्तिकावल्याः" । "तव निपेव्यपुना राधे स्तनशम्भुं मौक्तिकावली शुद्धा । हरेर्विहरति हृदये तव कथनीयः कथं महिमा" ॥३८५॥

"कुटिले अलं प्रलापेन प्रेक्ष्यतां इतोपि प्रचुरं भंगुराया भ्रमरकलङ्किताया वनमालायाः सौभाग्यलीलायितमिति" । तस्या मत्सम्बन्धः कोऽस्तीति वृथा श्लाघया मां पीड़यसीति भावः ॥३८६॥

विशुद्धेति महाभावोन्मादेन मादनो नामायम् । यदुक्तं 'अत्रेर्षाया अयोग्येऽपि प्रवलेर्षा विधायिता' ॥३८७॥

"कल्याणि ललिते महाघट्टपालेन्द्र युष्माभिरानन्दितः तदेष वुभुक्षितः एकया हैयङ्गवीनगर्भया गुरुतरगगर्य्या कायस्थोऽपि कायस्थः

विशाखा । हंहो लोलुह ! मा क्खु एव्वं भणाहि, सत्ततन्तुणो किर हेअङ्गवोण एदम् ॥३८९॥

मधुमङ्गलः । विसाहे ! धण्णाओ क्खु जण्णिअ-वम्हणीओ, जाहिं अप्पघरस्स वि तं अङ्गिरस-सत्त उवेक्खिअ तस्स सुट्ठु मिट्ठण्णेहिं सव्वे वल्लआ भुञ्जाविदा । तुम्हेहिं उण परघरस्स सत्ततन्तुणो जोग्गेहिं वि णअणीदेहि णवतन्तुओ वि एक्को एसो वि ण भुञ्जावीअदि ।

कृष्णः । ललिते ! यदेष महाघट्टेश्वरस्य ममोपहाराय हारो निसृष्टस्तदतीव सम्यगनुष्ठितम् । साम्प्रतमुद्यानचक्रवर्त्तिनोऽप्यभीष्टशुल्केन सपर्य्या पर्य्यालोच्यताम् ॥३९०॥

ललिता (सप्रणयरोषम्) तुए जाणिअ पत्तम्हि, ता ण क्खु अजुत्ता एसा विड़म्बण-कदत्थणा ॥३९१॥

क्रियताम्" काये तिष्ठतीति कायस्थः । अधुनायं न काये तिष्ठतीति किन्तु कृतगर्गरीस्थ एव तद्गतप्राणत्वादिति भावः । तेन मत्काये गर्गरीघृतं स्थापयित्वा मज्जीवनमेव स्थापयेति द्योतितम् ॥३८८॥

"हे लोलुप माखल्वेवं भण सप्ततन्तोर्यज्ञस्य किल हैयङ्गवीनमिदम्" ॥३८९॥

"विशाखे धन्याः खलु याज्ञिकब्राह्मण्यः याभिः आत्मगृहस्यापि तत् आङ्गिरससत्रमुपेक्ष्य तस्य सुष्ठु मिष्टान्नैः सर्व्वे वल्लवा भोजिताः । युष्माभिः पुनः परगृहस्य सप्ततन्तोर्योग्यैरपि नवनीतैर्नवतन्तु कोऽपि एक एषोऽपि न भोज्यते" ॥३९०॥

"त्वया ज्ञात्वा प्राप्तास्मि तस्मान्न खलु अयुक्ता एषा विड़म्बनकदर्थना" इति । मया सर्व्वशुल्कतयैव दत्तोऽपि हारस्त्वया स्ववर्त्तनमात्रे पर्य्यवसितः कृतः इति यथा सुखमेवाहमद्य त्वया विड़म्बयितुं प्राप्तेति भावः ॥३९१॥

नान्दीमुखी । महादाणिन्द ! अप्पणो अहिमदं दाणं दिढ़ं कहिज्जउ, जहा मज्झत्थोभविअ मए परिच्छिज्जइ ।

कृष्ण: । नान्दीमुखि ! समाकर्ण्यताम् , ॥३६२॥

वदितुमधिकमार्य्यापारिषद्यास्तवाग्रे,
कथमुचितमथेष्टं केवलं मे परार्द्धम् ।
इह यदि तदभावं वक्षि किं तत्र कुर्य्यां,
भवतु मयि परार्द्धर्यां न्यस्य शिष्टा: प्रयान्तु ॥३६३॥

नान्दीमुखी । रङ्गिल्लपुंगव ! चित्ता तुम्ह चित्ताणुवट्टिणी, ता एसा च्चेअ सुलुक्काइदा ।

कृष्ण: । हस्तोपकण्ठवर्त्तिनी चित्रा, तदसौ नातिदुर्ल्लभा ।

(प्रविश्य)

पौर्णमासी । नागर ! नागरीमूर्द्धाभिषिक्त ! यत्र निवद्ध-महास्पृहोऽसि तां किल परार्द्धेनापि दुर्ल्लभामनर्घामेव जानीहि ।

कृष्ण: (सापत्रपमभिवाद्य) भगवति ! केवलं शुल्कवित्तानामुपलब्धये गृहीताग्रहोऽस्मि, न तु काकिनीपादमूल्यानां भवद्गोपीनाम् ॥३६४॥

"महादानेन्द्र आत्मनोऽभिमतं दानं दृढ़ं कथ्यतां यथा मध्यस्थीभूय मया परिच्छिद्यते" ॥३६२॥

आर्य्यायाः पारिषद्याः पारिषदि साध्व्या परिषदोऽन्य इत्यन्योऽपि इति जयादित्यः । परार्द्धं एक दश शत सहस्रेत्यादिनामष्टादश यत्र एक संख्योत्तराः सप्तदशविन्दवस्तिष्ठन्ति । परार्द्धर्यां परार्द्धमूल्यां पक्षे श्रेष्ठां राधां न्यस्य उपनिधीकृत्य ननु परार्द्धकनकटङ्कार्तयैव प्रयोजन सिद्धेर्दिति भावः । 'पुमानुपनिधिन्र्यास इत्यमरः' ॥३६३॥

"रङ्गिलपुङ्गव चित्रा तव चित्तानुवर्त्तिनी तदेषैव शुल्कोचिता"। चित्रेति पञ्चसु कनिष्ठत्वाच्च सैव नान्दीमुख्या तथा वक्तुं शक्या ननु ललितायाः इति भावः ॥३६४॥

राधिका । भअवदि ! दिट्ठिआ विड़म्वणम्वुरासिणो पारं अम्हेहिं दिट्ठं, ज सअं एत्थ तत्थहोदी समाअदा ।

पौर्णमासी (जनान्तिकम्) ॥३६५॥

दानीन्द्रस्य प्रसभमनुरीकृत्य मानोद्धुराणां,
दानं विश्वप्रकटमटवीमण्डलाखण्डलस्य ।
संरब्धानां कलहलहरीलुब्धता-दुर्म्मुखीणां
पातः शातोदरि न भविता किं विड़म्वाम्वुधौ वः ? ॥३६६॥

ललिता । भअवदि ! पेक्ख, दुल्लहो हारो अम्हेहिं दिण्णो, तहवि ण मुक्किअम्ह ॥३६७॥

पौर्णमासी । ललिते । पश्य, भवतीनां कलहकूटकषायेण पाटलित-चित्तदुकूल: प्रतिकूल इव शिखण्डचूड़स्तिष्ठति, तदद्य विना प्रियोपहारमहार्य्य-संरम्भडम्बरोऽसौ मनस्वी ॥३६८॥

नान्दीमुखी । भअवदि ! आणवेदु, इमाणं मज्झे एदं भारं का क्खु वहिस्सदि ॥३६९॥

"भगवति दिष्ट्या विड़म्वनाम्वुराशेः पारमस्माभिर्दृष्टं सत् स्वयमत्र तत्र भवती समागता" ॥३६५॥

अनुरीकृत्य अनङ्गीकृत्य मानोद्धुराणां गर्व्वोन्नतानां शातोदरि हे कृशोदरि ॥३६६॥

"भगवति पश्य दुर्ल्लभो हारोऽस्माभिर्दत्तस्तदपि न मुच्यामहे" ॥३६७॥

पाटलित श्वेतरक्तीभूतम् । एतच्चित्तस्य स्वतः शुद्धत्वात् संप्रति युष्मत्कलहकृदुक्तत्वाच्च श्वेतरक्तत्वमित्यर्थः । शिखण्डचूड़: पिञ्छचूड़ः प्रियस्य वस्तुनः पक्षे प्रियाया उपहारं विना अहार्य्यः त्याजयितुमशक्यः संरम्भडम्बरो यस्य सः मनस्वी वीरः ॥३६८॥

"भगवति आज्ञापय आसां मध्ये एतं भारं का खलु वक्ष्यति"

पौर्णमासी। या पञ्चसु सरोजाक्षी परमाराधिका भवेत्।
धीरा सैवास्य विज्ञेया धुरीणाराधने धुरि॥

(ललिता मनागिव स्मित्वा राधिकां पश्यन्ती दृगन्तं कूणयति। राधिका चिन्तामिव नाटयन्ती वृन्दा-कर्णमूले लगति।) ॥४००॥

वृन्दा। भगवति! वेदिमध्यमेयं निवेदयति 'हन्त विश्ववेदिनि! प्रपञ्चितचारुचातुरी-चमत्कृतिं ललितामेवात्र महासङ्कटे निरटङ्कयदालिमण्डलं, केवलमसौ प्रतीक्षायास्तवानुज्ञां प्रतीक्षमाणा समक्षमवतिष्ठते' ॥४०१॥

ललिता। (स्मितं कृत्वा) हिअअ-रअणस्स विजअम्मि संवुत्ते अलं इमाए हठरङ्गरक्खाए।

पौर्णमासी। नायुक्तमुक्तं ललितया ॥४०२॥

राधिका। (किञ्चिदुच्चैरिव) भअवदि! पसीद पसीद। इमस्सिं दुरन्तव्वसणे कढोर-घट्टीवालहत्थे मा क्खु कादरो पइदि-दक्खिणो एसो जणो सुलुक्कीअदु। (इति संस्कृतेन) ॥४०३॥

भ्राम्यत्येप गिरेः कुरङ्गकुहरे कृष्णो भुजङ्गाग्रणीः
स्पृष्टो येन जनः प्रयाति विषमां कामप्यसाध्यां दशाम्।

वोढुं पारयिष्यतीत्यर्थः ॥३९९॥

या पञ्चसु मध्ये परमाराधिका परमाराधनयोग्या भवतीत्यर्थः। पक्षे परः श्रेष्ठः प्रेममयः मारः कन्दर्पस्तेन आराधिका तत्सुखोत्पादयित्री पक्षे श्रेष्ठा राधिका इति ॥४००॥

आलिमण्डल कर्त्तृ निरटङ्कयत् निरनैपीत् असौ ललिता प्रतीक्षायाः पूज्यायाः। पूज्यः प्रतीक्ष्य इत्यमरः ॥४०१॥

स्मितमिति तदवहित्था समुद्घाटनार्थं "हृदयरत्नस्य विजये संवृत्ते अलमनया हठरङ्गरक्षया" ॥४०२॥

"अस्मिन् दुरन्तव्यसने कठोरघट्टीपालहस्ते मा खलु कातरः प्रकृतिदक्षिण एप जनः शुल्कयताम्" ॥४०३॥

नाभद्रं न च भद्रमाकलयितुं शक्तास्मि दृष्टिच्छटा-
मात्रेणास्य हताहमिच्छसि कुतः प्रक्षेप्तुमत्रापि माम्?

(इति लीलया शुष्कं रुदती पादोपकण्ठे लुठति।)

पौर्णमासी। (भुजाभ्यामाश्लिष्य) वत्से! मा रोदनं कृथाः। सर्व्वमिदं ते शुभोदर्कं भविष्यति ॥४०४॥

कृष्णः। भगवति! सत्यं भागधेयभागस्मि, यदत्र साधीयसि समये तत्रोपस्थितिर्बभूव। ततः स्वीकृतशुल्कमेवात्मानमवधारयामि। ॥४०५॥

पौर्णमासी (जनान्तिकम्) रामनीयकनिधे! रमणीमणिरेव तवोपकण्ठस्थलशोभनीनभूव। किमन्येन फल्गुना शुल्केन? ॥४०६॥

कृष्णः (सानन्दमात्मगतम्) दिष्ट्या मदभीष्टा शुल्कीकृता भगवत्या राधिका। (प्रकाशम्) भगवति! सत्यमस्य मेदुर-महारागकौमुदीडम्बर-करम्बितस्य रमणीरत्नस्य लब्धये भवत्याः प्रसादवीथिमन्तरेण नान्या युक्तिरभिवर्त्तते ॥४०७॥

पौर्णमासी। (सनर्म्मस्मितम्) नागरेन्द्र! मया चिन्तामणिरियं प्रस्तुता, भवता तु कान्तामणिरवधारिता ॥४०८॥

कृष्णः। (सलज्जस्मितम्) भगवति! मद्गिरामप्यत्रैव विश्रान्तिः,

भ्राम्यतीति कामपीति असाध्यामिति दृष्टिच्छटामात्रेणेत्यादिभिस्तद्विषयकः स्वप्रेमैव भङ्ग्या पक्षे व्यञ्जितः ॥४०४॥

साधीयसि समीचीने समये स्वीकृतशुल्कं प्राप्तशुल्कम् ॥४०५॥

रमण्याः श्रीराधायाः मणिः शङ्खचूड़रत्नं हारनायकीभूतं श्लेषेण स्त्रीरत्नं राधैव ॥४०६॥

मेदुरः स्निग्धः महान् राग आरुण्यं प्रेमा च तस्य कौमुदीडम्बरेण करम्बितस्य युक्तस्य ॥४०७॥

चिन्तामणिः हारनायकीकृता ननु राधारूपेत्यर्थः। कान्तामणिः कान्तैव मणिरित्यर्थः ॥४०८॥

यदेतस्य ललनाललामस्य सङ्गमे भवत्पारिषद्याः साचिव्यविद्या-सम्पदेव हेतुरासीत् ॥४०९॥

पौर्णमासी । चातुरीविद्यामहोपाध्याय ! कृतं वैलक्ष्यवैभवेन, चिन्तामणिलाभ एवावश्यं कान्तामणि-लाभाय कल्पते । न हि प्रत्युपशोभायामुपस्थितायां भानुजायाः श्रियो विष्णुपदसेवायां व्यभिचारिणुता घटते । ततस्त्वमद्य पूर्णोऽसि ॥४१०-४११॥

वृन्दा । पूर्णिमायामुपस्थितायां को नाम कलानिधेरपूर्णतावकाशः ? ॥४१२॥

पौर्णमासी । वृन्दे ! राधामनुरुध्यमानेन विधुनैव मधुरीकृतेयं माधवीया पौर्णमासी ।

वृन्दा । तदेनं पूर्णमेव पूर्णिमा समक्षमुपलक्षयतु विशाखासख्या ।

पौर्णमासी । वैदग्धाचन्द्रिकाचन्द्र ! वाढ़मत्र प्रतिभूरभुवम् । सायं

अत्रैव चिन्तामणावेव राधैव चिन्तामणिरिति भावः । ललनाया ललामस्य भूषणस्य श्लेषेण ललनासु भूषणभूताया राधाया इत्यर्थः । पारिषद्या नान्दीमुख्याः ॥४०९॥

वैलक्ष्यभावेन विस्मितवाहुल्येन । विलक्षो विस्मयान्वित इत्यमरः चिन्तामणीति यदैवास्या हारः प्राप्तस्तदैवेयमेव प्राप्ताभूदिति भावः ॥४१०।

भानुजायाः सूर्यसम्बन्धिन्याः श्रियः शोभायाः विष्णुपदमाकाशम् । पक्षे भानुजाया राधायाः श्रियः विष्णोस्तव पादसेवायाम् । संहारनामाऽयं सप्तममङ्गम् । यदुक्तम्-संहार इति तत् प्राहुर्यत्कार्यस्य समापनमिति ॥४११॥

कलानिधेश्चन्द्रस्य पक्षे कृष्णस्य ॥४१२॥

राधां विशाखानक्षत्रं अनुराध्यमानेन चन्द्रेणैव माधवीया वैशाखी तस्यां विशाखानक्षत्रयोगो भवेदेवेत्यर्थः । पक्षे विधुना कृष्णेन । पूर्णिमा कर्त्री विशाखैव सखी तया एनं विधुं उपलक्षयतु

तवाभीष्टमेव शुल्कमर्पयिष्यामि । तदनुमन्यस्व, साम्प्रतममूरध्वरवेदीप्रसाधनाय साधयन्तु ।

कृष्णः (सापत्रपम्) यथाज्ञापयति भगवती ।

पौर्णमासी । सर्व्वानन्दकदम्बमूर्त्ते ! यद्यपि वाढ़मेतया हृदयङ्गमया ते लीलया कृतार्थास्मि, तथापि किमप्यभ्यर्थयितुमिच्छामि ।

कृष्णः (सहर्षम्) भगवति ! शीघ्रमाज्ञापय किं ते भूयः प्रियं करवाणीति ॥४१३॥

पौर्णमासी । निरवद्य-केलिमाधुरी-सुधासिन्धो ! साधीयसि प्रसङ्गे कृता हि प्रार्थना निश्चितमेव फलगर्भिणी भवेदित्यधुना निवेदयामि—

सहचरीकुलसंकुलया गुणै,रधिकया सह राधिकयानया ।
तमिह नर्म्मसुहृन्मिलितः सदा, घटय माधव घट्टविलासिताम् ॥

किञ्च—राधाकुण्डतटी-कुटीरवसतिस्त्यक्तान्यकर्म्मा जनः
सेवामेव समक्षमत्र युवयोर्यः कर्त्तुमुत्कण्ठते ।
वृन्दारण्यसमृद्धि-दोहदपद-क्रीड़ाकटाक्षद्युते
तर्षाख्यस्तरुरस्य माधव फली तूर्णं विधेयस्त्वया ॥

कृष्णः । (सहर्षाभ्युपगमम्) भगवति ! तथास्तु । तदेहि, प्रातिस्विकाभीष्टकृत्याय प्रयाम । (इति निष्क्रान्ताः सर्व्वे ।) ॥४१४॥

पक्षे विशाखायाः सख्या राधया तेन तयोराधामाधवयोस्तत्रैव रहः केलिकुञ्जे ललितादिभि. प्रवेशः कारितः पौर्णमास्या वलादि-सूचितम् । ततः कचित् क्षणान्तरं विरचितदिव्याकल्पौ तावागतौ विलोक्याह वैदग्धीति ॥४१३॥

साधीयसि श्रेष्ठे । वृन्दारण्यस्य तद्वासिमात्रस्यापि समृद्धेर्दोहदपदं अभीष्टो विषयः क्रीड़ाकटाक्षद्युतिरपि यस्य हे तथाभूत ! । तर्षो मनोरथः ॥४१४॥

इति श्रीश्रीदानकेलिकौमुदी नाम भाणिका समाप्ता ।
ग्रथिता सुमनःसुखदा, यस्य निदेशेन भणिका-स्रगियम् ।
तस्य मम प्रियसुहृदः, कण्ठतटीं क्षणमलंकुरुताम् ॥
गते मनुशते शाके चन्द्रस्वर-समन्विते ।
नन्दीश्वरे निवसता भाणिकेयं विनिर्म्मिता ॥

सुमनसः पुष्पाणि सुमनसो भक्ताश्च । तस्य प्रियसुहृदः श्रीराधा-
कुण्डवासिनः श्रीरघुनाथदासस्येत्यर्थः ॥
दानकेलिकलेरन्ते राधामाधवयोर्युगम् ।
कामलोभमदाक्रान्तमेकाकारमहं भजे ॥
इति श्रीदानकेलिव्याख्या समाप्ता ।

गोविन्दस्य कृपां वन्दे यस्योद्गमनमात्रतः ।
लोलास्फूर्तिः सदा भूयाद्रूपेण सह मोदते ॥
[ग्रथिता सुमनः सुखदा यस्य निदेशेन भाणिका स्रगियम्।
तस्य मम प्रियसुहृदः कुण्डतटीं क्षणमलंकुरुताम् ॥
गते मनुशते शाके चन्द्रस्वरसमन्विते ॥१४१६॥
नन्दीश्वरे निवसता भाणिकेयं विनिर्म्मिता ॥]
अथ भाणिकालक्षणम् ॥
भाणिकाश्लक्ष्णनेपथ्या मुखनिर्व्वहणान्विता ।
भारती कैशिकीवृत्तियुतैकाङ्कविनिर्म्मिता ॥
उदात्तनायिकामञ्जुपुरुषात्राङ्गसप्तकम् ।
उपन्यासोऽथ विन्यासो विरोधः साध्वसं तथा ॥
समर्पणं निवृत्तिश्च संहारश्चापि सप्तमः ।
उपन्यासप्रसङ्गेन भवेत् कार्य्यस्य कीर्त्तनम् ॥

निर्व्वेदवाक्यव्युत्पत्तिर्विन्यास इति कथ्यते ।
भ्रान्तिनाशो विरोधः स्यान्मिथ्याख्यानं तु साध्वसम् ॥
उपालम्भवचः कोपपीड़येह समर्पणम् ।
निदर्शनस्योपन्यासो निवृत्तिरिति कथ्यते ॥
संहार इह तत् प्राहुर्यत् कार्य्यस्य समापनम् ।
शेष नाटकवज्ज्ञेयं बुधैः प्रस्तावनादिकम् ॥
रूपकं द्विविधं पाठ्यं ज्ञेयश्च , तत्र भाणिकेयं गेयरूपा ॥

अथ दाननिर्व्वर्त्तनकुण्डाष्टकम् ।

नमः श्रीदाननिर्व्वर्त्तनकुण्डाय ॥
स्वदयितगिरिकच्छे गव्यदानार्थमुच्चैः
कपटकलहकेलिं कुर्व्वतो नव्ययूनोः ।
निजजनकृतदर्पैः फुल्लतो रीक्षकेऽस्मिन्
सरसि भवतु वासो दाननिर्व्वर्त्तने नः ॥१॥
निभृतमजनि यस्माद्दाननिर्वृत्तिरस्मिन्
तत इदमभिधानं प्राप यत्तत् सभायाम् ।
रसविमुखनिगूढ़े तत्र तज्ज्ञैकवेद्ये
सरसि भवतु वासो दाननिर्वर्त्तने नः ॥२॥
अभिनवमधुगन्धोन्मत्तरोलम्बसंघ-
ध्वनिललितसरोजव्रातसौरभ्यशीते ।
नव मधुर-खगालीक्ष्वेलिसञ्चारकम्रे
सरसि भवतु वासो दाननिर्वर्त्तने नः ॥३॥
हिमकुसुमसुवास-स्फार-पानीयपूरे
रसपरिलसदालीशालिनोर्नव्ययूनोः ।

अतुलसलिलखेलालब्धे सौभाग्यफुल्ले
सरसि भवतु वासो दाननिर्वर्त्तने नः ॥४॥

दरविकसितपुष्पैर्वासितान्तर्दिगन्ता-
खगमधुपनिनादैर्मोदितप्राणिजाताः ।
परित उपरि यस्य क्ष्मारुहा भान्ति तस्मिन्
सरसि भवतु वासो दाननिर्वर्त्तने नः ॥५॥

निज निज नवकुञ्जे गुञ्जिरोलम्बपुञ्जे
प्रणयि नव सखीभिः संप्रवेश्य प्रियौ तौ ।
निरुपमनवरङ्गस्तन्यते यत्र तस्मिन्
सरसि भवतु वासो दाननिर्वर्त्तने नः ॥६॥

स्फटिकसममतुच्छं यस्य पानीयमच्छं
खग-नर-पशु-गोभिः संपिवन्तीभिरुच्चैः ।
निज निज गुणवृद्धिर्लभ्यते द्रागमुष्मिन्
सरसि भवतु वासो दाननिर्वर्त्तने नः ॥७॥

सुरभिमधुरशीतं यत् पयः प्रत्यहं ताः
सखिगणपरिवीतो व्याहरन् पाययन् गाः ।
स्वयमथ पिवति श्रीगोपचन्द्रोऽपि तस्मिन्
सरसि भवतु वासो दाननिर्वर्त्तने नः ॥८॥

पठति सुमतिरेतद्दाननिर्वर्त्तनाख्यं
प्रथितमहिमकुण्डस्याष्टकं यो यतात्मा ।
स च नियतनिवासं सुष्ठु संलभ्य काले
कलयति किल राधाकृष्णयोर्दानलीलाम् ॥९॥

इति श्रीमद्रघुनाथदासगोस्वामिविरचितं
श्रीदाननिर्वर्त्तनकुण्डाष्टकम् ॥

भाषा—दानकेलिकौमुदी

गुरु-गौराङ्घ्रिरजसां कृष्णदासेन लिप्सुना।
मयानुवाद्यते सन्तः ! श्रीदानकेलिकौमुदी ॥

गोवर्द्धन की दानघाटी में शुल्क (कर) ग्रहण छल से रोकी हुई श्रीराधा की किलकिञ्चित स्तवकिनी रूप दृष्टि हम सब की शोभा वृद्धि करे जो अन्तर में ईषत् हास्य-निबन्धन से उत्फुल्ल है, जिस के पक्ष्म समूह जलकण से परिव्याप्त है, अन्तःभाग किञ्चित् पाटलवर्ण है, पुनः जो रसिकता के द्वारा उत्सिक्त है, जिसका अग्रभाग संकुचित है एवं मधुरता के द्वारा जिस की तारा किञ्चितवक्र है। तात्पर्य—श्रीराधा सखीगण के साथ गोवर्द्धन तट (तरहटी) स्थित मार्ग होकर यज्ञार्थ घृत लेकर जा रही थी, वहाँ दानघाटी में अवस्थित होकर कौतुक करते हुए शुल्क-ग्रहण छल से श्रीकृष्णने मार्ग-रोध किया जिस से कि उस समय कृष्णदर्शन कर श्रीराधा का किलकिञ्चित भाव प्रगट हुआ। गर्व, अभिलाष, रोदन, कुछ हास्य, असूया, भय तथा क्रोध ये सात भाव हर्ष के कारण एक ही समय में जब उदित होते हैं तब उस दशा को किलकिञ्चित भाव कहते हैं। यहाँ श्रीकृष्ण--संदर्शन से हर्षोदय के कारण अन्तर में ईषत हास्य, "कोई देख न ले" इस विवेचना से नेत्र के पांख अश्रु-जल से व्याप्त, जिस से अपने भाव-गोपन हेतु रोदन व्यक्त है। श्री कृष्ण के द्वारा मार्ग-रोध करने पर उन के नेत्रों का अन्तः भाग अरुण वर्ण हो गया जो क्रोध को प्रकट करता है। "रसिकता के द्वारा नेत्र परिवर्द्धित" यहाँ अभिलाष सुव्यक्त हो रहा है, "न जाने क्या होगा" इस भावना से चक्षुः संकुचित होना भय को व्यक्त करता है। पुनः मधुरता के द्वारा

चक्षुः का तारा जो व्याभुग्न अर्थात् ईषत् वक्र हुआ है उस से गर्व एवं असूया प्रकट हो रहे हैं। स्तवकपक्ष में-"अन्तःस्मेरता" अर्थात भीतर ईषत उत्फुल्लता है, "जलकण" इस शब्द से मकरन्द का उद्गम है, "किञ्चित पाटलिता" इस शब्द से श्वेत एवं अरुण वर्ण का उद्गम होना है, "रसिकता" इस शब्द से एवं मधुर रस का उद्गम है। "कुञ्चित" शब्द से कोरकता "एवं मधुर-व्याभुग्न-तारोत्तारा" शब्द से माधुर्य्य तथा कुटिलाकार व्यक्त हो रहा है ॥ १ ॥

मुरारी श्रीकृष्ण में राधिकानुराग जय प्राप्त हो रहा है जो कि विभु अर्थात सर्वव्यापक होकर भी क्षण क्षण में वृद्धिशील है, जो गुरु अर्थात सर्वश्रेष्ठ होकर भी गौरवचर्य्या अर्थात सम्मान-नाद से रहित है और जो बार बार वक्रिमा-भाव को धारण करके भी विशुद्ध है ॥ २ ॥

नान्दीपाठ के बाद सूत्रधार रङ्गस्थल में आकर कह रहा है-अब सविस्तार नान्दिपाठ का प्रयोजन नहीं है ॥ ३ ॥

सूत्रधार—(चारों ओर दृष्टिपात करके) अहो ! मेरी इस मङ्गलाचरणचन्द्रिका से सन्दीपित मनोहर-भाव वाली साधु-मण्डली नन्दीश्वर पर्वत की उपत्यका में अर्थात निम्नस्थ-भूमि में क्यों भ्रमण कर रही है ? ॥ ४ ॥

(पुनर्वार अवलोकन कर)

कोई भक्त तो लीला-श्रवणजात हर्ष से पुलकित होकर शरीर में प्रफुल्लता का विस्तार कर रहा है, कोई बहुकाल तक श्रीकृष्ण-विच्छेद का अनुभव कर शुष्कवदन एवं विवर्ण होकर विदीर्ण मन हो रहा है, कोई तदाकार-अन्तःकरण-वृत्ति हो जाने पर कृष्ण साक्षात्कार में तत्परिजनत्व-भावना से गर्व-मद एवं हर्ष को धारण कर गर्जन करता हुआ इधर उधर भाग रहा है और कोई दर्शनानन्द जाड्य-मोह से निष्पन्दता को धारण कर गिरता जा रहा है। अतः श्रीकृष्ण-विलास के उदय होने पर भक्तों की इसी प्रकार दशा होने लगी है ॥ ५ ॥

(क्षणकाल मन में परामर्श कर) हाँ इस का कारण जान गया, यह तो अतिश्रेष्ठ प्रेम मदिरा का उत्सव आडम्बर है ॥ ६ ॥

क्यों कि—प्रेमसमूह के उदय होने पर साधुगण अपनी भावबृद्धि एवं विकारों को स्थगित नहीं कर पाते हैं। जिस प्रकार कि-चन्द्रमा के उदय होने पर समुद्र अपनी वृद्धि तथा विकारों को सम्वारित नहीं कर सकता है। दोनों अश्रान्त, गम्भीर, दुरधिगमपार अर्थात् जिन के पार का अधिगम करना असाध्य, असीम अर्थात जिन की सीमा का अवधारण नहीं किया जा सकता ऐसे हैं। वे साधुगण किसी से अहार्य्य परम-मर्य्यादा तथा श्रीहरि के परमास्पद को धारण कर के भी आज अपनी वृद्धि एवं विकारों का सम्वरण नहीं कर पा रहे हैं।

(पुनः दृष्टिपात करके) हाँ ऐसा ही है। क्यों कि श्रीकृष्ण की केलिचर्य्या विश्वविलक्षण और अतिविमोहिनी है ॥ ७ ॥

(इस प्रकार परामर्श कर मस्तक घूर्णन पूर्वक धैर्य्यावलम्बन कर) अहो ? श्रीराधा के साथ गोपराजनन्दन की प्रेम-प्रज्वलित मधुर विवाद-गोष्ठी कर्णकुहर प्राप्त होकर आत्मारामगण को भी ब्रह्मानन्द से निवृत्त कर देती है ॥ ८ ॥

(अनन्तर नट प्रवेश कर आनन्द के साथ)

यह नाट्यकला—मुख, प्रतिमुख, गर्व, विमर्ष एवं निर्वहण नामक पञ्च सन्धि को तिरस्कार कर तथा उपन्यास, विन्यास, विरोध, साध्वस, समपर्ण, निवृत्ति एवं संहार इन सात अङ्ग में वलिष्ठ होकर मानो (स्वामी, अमात्य, सुहृत, कोष, राष्ट्र, दुर्ग एवं वल इन सप्तांग राज्यश्री की भाँति) संहृत और

प्राकृतवाणी युगल से भूषित होकर शोभा प्राप्त हो रही है ॥ ९ ॥

सूत्रधार—भो पाण्डित्य-पारदर्शिन् नटाचार्य्य ! आपने सम्यक् रूप से ज्ञात किया होगा, मैं सुहृदों की अनुज्ञा प्राप्त कर दानकेलिकौमुदी नामक भाणिका का अभिनय करने के लिये उद्यत हो रहा हूँ। इसी लिये यहाँ निज अभीष्ट देवता का स्मरणात्मक मङ्गलाचरण पाठ करता हूँ ॥ १० ॥

(ऐसा कह कर अञ्जलि जोड़ कर)

जिन्होंने नाम के द्वारा रसज्ञों को आकृष्ट किया है, जो अपने चरित्र के द्वारा व्रजराज नन्द एवं साधुओं के आनन्द को उद्दीप्त करने वाले हैं और जिन का रूप चराचर सब को उत्सव प्रदान करता है वे सनातनात्मा अर्थात् नित्य-विग्रहवाले प्रभु श्रीकृष्ण जय युक्त हो रहे हैं। महाप्रभुपक्ष में-जिन की जिह्वा हरिनाम के द्वारा आकृष्ट है, जो अपनी शीलताचरण के द्वारा साधुओं में आनन्द उद्दीपन करते हैं और रूप नामक निज व्यक्ति मुझ में उत्सव-प्रदान करने वाले वे सनातनगोस्वामी जय युक्त हो रहे हैं ॥ ११ ॥

नट— भाव ! (अर्थात हे सूत्रधार !) देखिये देखिये ? सङ्गीतनिष्ठ तृतीय-ग्राम के अध्यापक आप के गान्धर्वविद्याप्रबन्ध के द्वारा समस्त रसिक-चूड़ामणि मृगधर्म्म का अर्थात् चित्त की एकाग्रता का अवलम्बन कर रहे हैं जो कि आत्म-विषयक अनुसन्धान में असमर्थ हो रहे हैं ॥ १२ ॥

सूत्रधार — प्रकटित -मनोज्ञा -अलङ्कारशालिनी (अर्थात् सङ्गीतनिष्ठ ललित अलङ्कार-युक्त गान्धर्व-गान जिसकी यह भाणिका महाविद्या रसिकेन्द्र-समूह की नान्दीमुखी अर्थात् मङ्गलाभिमुखिणी क्यों नहीं होगी।

पक्षान्तर में—ललिता के द्वारा अलंकृत गान्धर्व्वा अर्थात् श्रीराधा

जिस से प्रकाशित होगी वह महती विद्यावाली रसिकश्रेष्ठों की मङ्गलाभिमुखिणी क्यों नहीं होगी ॥ (नेपथ्य में)अहे नटाचार्य्य ! यथार्थ कह रहे हो, क्यों कि यह नान्दीमुखी आज रसिक वृन्द चूड़ामणि व्रजराजनन्दन श्रीकृष्ण में गान्धर्व्वविद्या को पक्षान्तर में राधिका को अर्पण कर आनन्दनप्रदायिनी होगी॥

सूत्रधार—यहाँ वनदेवी वृन्दा सुबल के साथ क्यों आगमन कर रही है। अत एव नाटयविषय में नटों को नियुक्त करने के लिये यहाँ से हम प्रस्थान करें। (ऐसा कह कर सूत्रधार एवं नटाचार्य्य दोनों प्रस्थान करते हैं)॥ १३ ॥

यहाँ प्रस्तावना अर्थात् उपस्थित विषय का प्रस्ताव है।

(तदनन्तर सुबल के साथ कथोपकथन करती वृन्दा प्रवेश करती है)

वृन्दा—("अहे नटाचार्य्य ! उत्तम उत्तम" यह पूर्वोक्त वचन कह कर—) भो सुबल ! इस मङ्गलवार्त्ता में तुम को प्रफुल्लमुख क्यों नहीं देख रही हूँ ? ॥ १४ ॥

सुबल—इस प्रसङ्ग में ज्ञानशून्य के कारण मैं मुग्ध हो रहा हूँ अतः स्पष्ट करके कहो ॥ १५ ॥

वृन्दा—आज श्रीराधिका पार्श्वदेश में सखियों से परिमण्डित होकर गुरुजन की अनुज्ञा से गोविन्दकुण्ड के तटवर्त्ति यज्ञ-मण्डप में हैयङ्ग-वीन (ताजा घी) बेचने के लिये जावेगी। इस बात को ज्ञात कराने के लिये पौर्णमासी के उपदेशानुसार नान्दीमुखी ने गोविन्द के निकट गमन किया है ॥ १६ ॥

सुबल—(आनन्द के साथ) निखिल माधुरी-श्रेष्ठा राधिका आज इस लघु-प्रयोजन के लिये क्यों गुरुजन के द्वारा अनुज्ञाता हुई है ? ॥ १७ ॥

वृन्दा— मुनिजनों ने इस कार्य का उपदेश दिया है कि-जिस दिन जिस के द्वारा हवनयोग्य मनोहारी हैयङ्गवीन यज्ञ में उपहारी-

कृत होगा उस दिन उस की अभीष्टसिद्धि होगी। यह मख की प्रक्रिया है ॥ १८ ॥

सुबल—किस महान व्यक्ति का यह यज्ञ है ?

वृन्दा—सुविख्यात नाम वाले वसुदेवजी का ॥ १९ ॥

सुबल—मधुपुरी का त्याग कर उन्होंने क्यों इस बन के बीच यज्ञारम्भ किया है ?

वृन्दा—मरे कंस के जीवित रहते किस प्रकार मथुरा में यज्ञ-सिद्धि हो सकती। इसीलिये उन्होंने गर्ग के जामाता भागुरिजी को अपने प्रतिनिधि रूप में नियुक्त किया है ॥ २० ॥

सुबल—स्पष्ट जाना जाता कि यह यज्ञ आभिचारिक है ॥२१॥

वृन्दा—नहीं नहीं, यह शान्तिकर यज्ञ है। जिस में अपने पुत्र से भी अधिक प्रिय मित्रपुत्र श्रीकृष्ण एवं निजपुत्र बलराम की शान्ति ही फल है।

सुबल—(क्षणकाल चिन्ता करके कौतुक के साथ)॥ २२ ॥ आज प्रियवयस्य श्रीकृष्ण की चिरकाल से हृदयस्थित गुरुतर केलिघट्टाधिकारित्व का अनुरूप दानग्रहण विलास लीला लालसा सिद्धि हुई ॥ २३ ॥

वृन्दा—सुबल ! हम सब के सम्बन्ध में यह दानलीला निधि की भाँति आचरित हो रही है। अतः आओ मानसगङ्गा के तट पर अवतरण करें (ऐसा दोनों करने लगे)॥ २४ ॥

सुबल—मानसगङ्गा के दक्षिणपार्श्व में बन के बीच हंससमूह की ध्वनिघटा का श्रवण करो ॥ २५ ॥

वृन्दा—यह हंस समूह की ध्वनि नहीं है परन्तु पशुपाल-बालाओं की नूपुरध्वनि है। (पुनः आनन्द के साथ निरूपण कर) ॥ २६ ॥

हे सुबल ! दूर से देखो, रक्तवर्ण वस्त्र से आच्छादित मस्तक पर कुण्डलाकार वेडा है, उस पर हैयङ्गवीन पूर्ण अचलायमान सुवर्णघट को धारण कर श्रीराधिका सखीगण से परिवृता होकर मानसगङ्गा तट पर स्वेच्छापूर्वक उपस्थित हो रही है ॥ २७ ॥

सुबल—अहो ! चञ्चल स्वभाववाली सहचरियों से बार बार श्रीराधा उद्दीप्ता हो कर अपनी मधुरिमा के द्वारा वृन्दाटवी को उज्ज्वलान्वित कर रही है जिस प्रकार कि इन्द्रधनुलता से जलद-मण्डली मण्डित होती है ॥

वृन्दा--श्रीराधा-रूपमाधुर्य्य-सम्बधी वचनों के उद्देश्य में आकस्मिक भाव का अवधारण कर रही हूँ। (ऐसा कह कर वदन अवनत पूर्वक लज्जा के साथ) ॥ २८ ॥

श्रीकृष्ण ने लज्जा त्याग कर ईर्षावती अथच निजाभीष्ट लक्ष्मी का तृणाज्ञान पूर्वक परित्याग कर मल्लक्षण वृन्दा नामक जन को बहु सम्मान प्रदान किया है वह यह वृन्दा जिस के दासत्व में अवसर प्राप्त नहीं होता, इस पृथ्वी में कौन व्यक्ति उसर ाधा की प्रशंसा करने में समर्थ हो सकता है ॥ २९ ॥

जो भी हो, तो भी अपनी वाणी को सौरभशालिनी करने के लिये किञ्चित् राधा-सौरभ का वर्णन करूँगी।

(ऐसा कह कर सुबल के प्रति दृष्टिपात करके) ॥ ३० ॥

श्रीराधा के बलवान मुखमण्डल से चन्द्रमा की अथवा पद्म की सुषमा तिरस्कृत हो जाती है इस प्रकार की प्रशंसा किन अ-पण्डितों से की जाती है। क्यों कि दूर से मुखमण्डल का अनुभव कर विशुद्ध सुधाशालिनी चन्द्रश्रेणी अथवा पद्मश्रेणी अपनी सौन्दर्य्य दर्पश्री का परित्याग पूर्वक विशीर्ण हो जाती है ॥ ३१ ॥

सुबल—उस का यह उत्कर्ष थोड़ा सा है।

वृन्दा--सुबल ! तुम गोवर्द्धन पर्वत के ऊपर श्याममण्डप

के पीछे शिखण्डमौलि श्रीकृष्ण को ले जाओ। मैं इन गोपाङ्गनाओं के मनोहर विलास कौशल को देखने के लिये धीर से जा रही हूं। (ऐसा कह कर सुबल के साथ गमन करने लगी)

अब विष्कम्भक होता है -

(तदनन्तर सखीचतुष्टय से आसज्जिता राधा प्रवेश करती है) ॥३२

राधा--अहो ! बनश्रेणी की कैसी नयन-लोभनीयता है। (संस्कृतभाषा का अवलम्बन कर) ललिते ! देखो देखो, यह पनश्रेणी, ध्वज-वज्र-अङ्कुश तथा पङ्कजादि चिन्हों से अङ्कित पदपङ्क्ति के द्वारा उज्वल हार ही है और नखर के द्वारा जिसकी विकाशोन्मुख कलिकाऐं छिन्न भिन्न होकर भूतल में गिरी हुई हैं। जिस का अवलोकन कर मेरा अन्तर कम्पित हो रहा है ॥३३-३४॥

ललिता--(हँस कर) विशाखे ! देखो देखो, (ऐसा कह कर संस्कृत में) जहाँ कानन में सुधा-सिक्त वेणुमाधुरी के द्वारा पशु-पक्षियों के समस्त शारीरिक कर्मों का विस्मरण होता जा रहा है, उन का मन अतिदृढ़ समाधि (चित्तैकाग्र्य) से विरत नहीं हो रहा है ॥ ३५ ॥

राधा--(स्वगत) स्पष्ट ज्ञात हो रहा है कि आज व्रजेन्द्रनन्दन अलक्षित-भाव से आकर हैयङ्गवीन उपहरण-कारिणी हम सब के मार्ग का अवरोध करेंगे ॥ ३६ ॥

(प्रकाश्य में) हे सखि ललिते ! वर्त्तमान हम सब के इस गमनावसर में कुछ हँसती हुई पौर्णमासी ने क्या कहा है ॥३७॥

ललिता--उन्होंने यह कहा है कि -आज तुम सब का कोई अपूर्वलाभ उपस्थित देख रही हूँ ॥ ३८ ॥

राधा--ललिते ! तुम कथा-प्रसङ्ग में महातापसी सर्वज्ञा पौर्णमासी को जिज्ञासा करो ॥ ३९ ॥

ललिता--कैसी जिज्ञासा ?

राधा--नान्दीमुखि आदि ने पूर्वजन्म में कैसा महाव्रत किया है ?

ललिता--तुम ने उन की महाव्रत-कारिता का अवगत किस प्रकार किया ?

राधा--हाय दुःख हाय दुःख, हे मुग्धे ! तुम इस प्रकार जिज्ञासा कर रही हो, जिस का दुर्लभ-गन्धलेश तुम जैसे व्यक्तियों को स्वप्न में भी सुदूर है, उस मन्द मन्द आन्दोलित मकरकुण्डलों की किरण पराग कन्दली से सुन्दर मुखारविन्द का अत्याश्चर्य्य महामाधुरी मकरन्द को जो नेत्र रूप भ्रमरों के द्वारा निरन्तर पान कर रही हैं ॥ ४२ ॥

इसी लिये कह रही हूँ कि-उस परमाभीष्ट अलाभ से दुःख रूप तुषानल से ज्वालायमान हम सब की उस महाव्रत में दीक्षा उपयुक्त है क्यों कि नान्दीमुखि आदि की यह पदवी जिस प्रकार भविष्यत् जन्म में दुर्लभ न होगी ॥ ४३ ॥

विशाखा--राधे ! नान्दीमुखी आदि से तथा गोपकन्यागण से अथवा अविशेष समुदाय गोकुलवासिजन से कोई एक महाव्रतकारिणी महाभागिनी लक्षित हो रही है ॥ ४४ ॥

राधा-- (उत्कण्ठा के साथ) हे विशाखे ! निश्चय करके कहो कि वह गुणवती -शिखामणी कौन है ?

ललिता (स्वगत) तुम से द्वितीय व्यक्ति कौन है ?

राधा----सखि ! मैंने जान लिया, जान लिया, सत्य कहती हो, (संस्कृत में) अन्य कोई नहीं है, एक मात्र मुरली की प्रशंसा की जा सकती है क्यों कि उस ने श्रीकृष्ण अधरामृत-माधुरी के पान द्वारा उन्मत्त होकर केलि रूप मधुरध्वनि कर समस्त गोकुल को व्याकुलित कर लिया है ॥ ४५-४६ ॥

ललिता--(हास्य पूर्वक कहने लगी) सत्य, मुरली गोरवर्णी

है, वह अपनी ध्वनि के द्वारा धीरगण के मन को तरलित करती है, पुनः वह उत्तम वंशोत्पन्ना है अर्थात् त्वक्सार प्रयुक्त सार विशिष्टा है। पुनश्च महारसशालिनी एवं माधुर्य्यवर्षिणी है ॥४७॥ राधापक्ष में-मुरली कूजन के द्वारा जिस का धीरमन चञ्चल हो रहा है, जो गौरी अर्थात् गौरवर्णा है, जो सद्वंशोत्पन्ना है पुनः जो रसिका है और माधुर्य्यवर्षिणी है ॥ ४७ ॥

राधा—अहे क्यों हँसी करती हो ? आत्मीयजनों के प्रसाद से मन्दभाग्य इस व्यक्ति के द्वारा उनके मुख-मण्डल का दो तीन बार मात्र दर्शन हुआ है। परन्तु स्वभावसिद्ध मादकता प्रयुक्त मधुर माधुरी मधु ने हृदय को उन्मथित कर समस्त विस्मरण कर दिया। अतः ध्यानयोग से भी उन का दर्शन दुर्लभ हो रहा है॥४८

(ऐसा कह कर औत्सुक्य प्रकाश पूर्वक संस्कृतभाषा में) हे कृशोदरि सखि ! हम सब वेणुकुल में जन्म प्राप्त करने के लिये तपस्या करेंगी, वेणुजन्म को सामान्य मत समझो, सब से वेणु जन्म ही उत्कृष्ट है क्यों कि यह मुरली बहु तपस्या के द्वारा मुकुन्द की बिम्बाधर-मधुरिमा को अङ्गीकार कर रसास्वादन कर रही है ॥

बृन्दा—(प्रवेश करके) सखि ललिते ! क्यों कथाभिनिवेश से संरुद्ध हृदया हो कर इन्द्रध्वजवेदी की पदवी में आरोहण-शील अपने को नहीं जान रही हो ॥ ४९ ॥

सब—(मुख फिरा कर) सखि ! सत्य कह रही हो, क्यों कि हम सब गोवर्द्धन पर्वत के पृष्ठदेश में आयी हुइ हैं। अतः गोवर्द्धन की दक्षिणदिशा में गोविन्दकुण्ड के तटवर्त्ति मार्ग का अनुसरण करें (ऐसा कह कर वैसा ही करने लगीं)

बृन्दा—(निवारण कर) चम्पकलते ! देख देख ॥ ५० ॥ विधाता ने निश्चय प्रभु श्रीकृष्ण के परम सन्तोष विधान के लिये उन की निखिल प्रेयसीवर्ग से अत्यद्भुत विविध-माधुर्य्य का आकर्षण कर श्रीराधा का निर्माण किया है। क्यों कि श्रीहरि अन्य नारी स्पृहा का परित्याग कर केवल श्रीराधा में ही रमण करते रहते हैं ॥ ५१ ॥

राधा—(दक्षिण दिशा में दृष्टिपात करके) अहो ! मानस-गङ्गा के प्रफुल्लित कमल-समूह में निपतित भ्रमरों की कलध्वनि की कैसी कोमलता है ? ॥५२॥

बृन्दा—(अभिलाष के साथ) अहो सम्मुख में कमलपुञ्ज में मत्त मधुकर का अवलोकन करो, पुष्पपरागों के द्वारा इस के शरीर का उत्तरभाग पीतवर्ण हो रहा है वह बार बार घूँमता हुआ कौतुक पूर्वक मधुकर रमणीसमूह का संरोध कर ध्वनि-धृष्टता के द्वारा मस्तक कम्पन कर बिहार कर रहा है ॥ ५३ ॥

राधा—(स्वगत) निश्चय बृन्दा ने कुछ मन में विचार कर यह कहा है (प्रकाश्य कर) हे बृन्दे ! ये समस्त कुसुमकीड़े भ्रमरियाँ धन्य हैं क्यों कि निरन्तर कान्त के साथ क्रीड़ा करती हैं, सूर्य्योपासका मन्दभागिनी हम सब के सम्बन्ध में दूर से भी क्षण काल कान्त-सन्दर्शन सुदुर्लभ हो रहा है ॥ ५४ ॥ (संस्कृत में) हे सखि ! हमारे दोनों श्रवण माधव-गुणानुबाद का श्रवण नहीं कर रहे हैं। अतः इन का वधिर होना उत्तम है। दोनों नेत्रों ने उन का अवलोकन नहीं किया है। इसी लिये उन का अन्धत्व होना उचित है ॥ ५५ ॥

बृन्दा—हे सखि राधे ! तुमको मन्दगामिनी क्यों देख रही हूँ ?

ललिता—सखि राधे ! तुम तो दिन रात दिव्यलीला के द्वारा विहार करती हो तो भी क्यों निर्व्वेद प्रकाश करती हो ?

बृन्दा—हे राधे ! तुम तो हैयङ्गवीन की भाँति कोमलाङ्गी

हो, किस प्रकार हैयङ्गवीन-कलश को वहन कर चल रही हो, बड़े खेद की बात है, तुम्हारे मस्तक में मल्लिपुष्प का अर्पण करने पर व्यथा-बोध होता है, अहो आज उस मस्तक पर कलश देख रही हूँ, कृपा करके मेरे मस्तक पर हैयङ्गवीन-कलसी को अर्पण करो ॥ ५६-५७ ॥

राधा—सखि ! कलसी भार मुझे मन्थर नहीं कर रहा है। मेरे मना करने पर भी ललिता ने बलपूर्वक इन भूषणों को पहराया है। अतः अलङ्कारभार से मैं मन्थर हो रही हू ॥ ५८ ॥

बिशाखा—राधे ! कुछ समय अवस्थान करो, मैं भली भाँति भूषण भार को उतार देती हूँ। (ऐसा कह कर यथोचित भूषणों को उतारने लगी) ॥ ५९ ॥

वृन्दा—जब कि अनलङ्कृता श्रीराधा का सन्दर्शन कर चन्द्रावली की सखी पद्मा अति लज्जित हो जाती है तब मणिमय-भूषणरचना की आवश्यकता क्या है ॥ ६० ॥

राधा—हे वृन्दे ! इस यज्ञ में हैयङ्गवीन उपहरण-कारिणी हरिणनयना हम सब का सर्वाङ्गयोग्य भूषणसमूह का लाभ होगा मुनिजनों से ऐसा सुना गया है ॥ ६१ ॥

वृन्दा--केवल भूषणों की उपलब्धि ऐसा नहीं परन्तु यज्ञ में घृत लेकर गमन के समय अपनी अभीष्टपूर्त्ति भी। अतः अभीष्टप्रदायक गोवर्द्धनस्थ ब्रह्मकुण्डादि तीर्थों को अञ्जलि बाँध कर प्रार्थना करो (ऐसा सब करने लगीं) ॥ ६२ ॥

चम्पकलता--सखि चित्रे ! ब्रह्माण्ड घट के स्रष्टा कमलयोनि ब्रह्मा के कुण्ड के द्वारा गोवर्द्धनशिखर की भूमि दक्षिणदिशा की ओर शोभायमान हो रही है ॥ ६३ ॥

चित्रा--सखि ! इसी स्थल पर भक्तवत्सल हरिराय नामक नारायण-मूर्त्ति निवास कर रही है ॥ ६४ ॥

वृन्दा--देखो देखो, हे सखि ! यह गोवर्द्धन बहुशिरवाला अनन्तदेव से भी विशेष प्राप्त हो रहा है क्यों कि अघनाशन श्रीहरि इस के क्रोडदेश में मस्तक में तथा उदरभाग में प्रेयसियों के साथ अद्भुतलीला का विस्तार कर रहे हैं ॥ ६५ ॥

ललिता— (श्रीराधा का अवलोकन कर संस्कृत में)
हे गौरि ! गोवर्द्धन की सौरभयुक्त निविड़ शोभाशालिनी विशाल पाषाणखण्ड के प्रति दृष्टिपात करो, हे सखि ! यहाँ रसिकेन्द्र ने बैठ कर तुम्हारे वक्षः स्थल पर मृगमद पङ्क के द्वारा सुन्दररूप में तिलक रचना की है ॥ ६६ ॥

चम्पकलता —(परस्पर में मन्त्रणा कर के संस्कृत में) सखि ! सुनो, ऊपर में बलाका अर्थात् बकपङ्क्ति शोभायमान हो रही है, और चारों ओर विद्युतविलास हो रहा है, मेघ अपनी कान्ति के द्वारा पर्वतश्रृङ्ग के नीलमण्डप को दुगुणा शोभित कर रहा है। अर्थान्तर-श्रीकृष्ण गुञ्जाहार एवं पीताम्बर पहन कर अपनी कान्ति के द्वारा गोवर्द्धन उपरिस्थित नीलमण्डप की शोभा को द्विगुण बढ़ा रहे हैं ॥ ६७ ॥

ललिता—(आनन्द के साथ) चम्पकलते ! सत्य कहती हो, यह मेघ नहीं है, परन्तु कण्ठ में लम्बित विस्तीर्ण हार-वाले पीताम्बर, पर्वत के कुञ्जप्रदेश का अबलम्बन कर विराजमान हैं। अतः हम सब का मनोरथवृक्ष पुष्पित हुआ है ॥

राधा—(वृन्दा के प्रति दृष्टिपात करके कम्पितशरीर से संस्कृत में) ॥ ६८ ॥
हे सखि ! सम्मुख में पर्वत शिखर में स्थित होकर आकाश की गौरवर्ण कान्ति को अङ्गीकार कर जगत रूप वेणुवृक्ष में कन्दर्प-भ्रमि स्वरूप घूर्ण समूह को अर्पण कर तथा धैर्य रूप अन्धकार का भेदन कर नीलोत्पलनयनाओं के अमृतनिधान नेत्रबन्धु अर्थात

नेत्र शीतलकारी किस अद्भुतचन्द्र का उदय हो रहा है ॥

वृन्दा— सखि राधे ! सुनो, ॥ ६६ ॥

वृन्दा— सखि राधे ! सुनो, त्रिभुवन की समस्त मृगनयनाओं के वाञ्छितार्थ पूरण के लिये समर्थवान् भुजद्वय का आन्दोलन कर कुलाङ्गना व्रजबालाओं की मदनवेदना का-उन्मादन रूप व्रत प्रणयि वक्षःस्थल के द्वारा शोभायमान रसिकमौलि श्रीकृष्ण उदय प्राप्त हो रहे हैं ॥ ७७ ॥

राधा—(विस्मय के साथ संस्कृत में) सखि ! श्रीहरि बहु वार हमारे नेत्रपथ में पथिक हुए परन्तु पहले कभी इस प्रकार अपूर्व मधुरिमा नहीं देखी, जिस की एक अङ्ग की किञ्चिन्मात्र शोभा का पान करने में नेत्र समर्थ नहीं हो रहा है, अब यह नेत्र एक ही समय में सर्वाङ्ग-शोभा को किस प्रकार पान कर सकता है ॥ ७१ ॥

वृन्दा—हे राधे ! तुम जब जब सम्मुख में माधव को देखती हो, तब तब उन को अपूर्व करके कहती रहती हो। क्या वे तुम्हारे लिये वास्तविक नित्यनूतन हैं अथवा अनुराग एवं उन्माद के कारण इस प्रकार नेत्रद्वय विस्मयापन्न हो रहा है ? ॥

(तदनन्तर मधुमङ्गल, सुबल, अर्ज्जुनादि सखासमूह से उपास्य-मान होकर नान्दीमुखी को जिज्ञासा करते करते श्रीकृष्ण उपस्थित हुए) ॥ ७२ ॥

कृष्ण—(उत्कण्ठा के साथ) अहो ! गोवर्द्धन पर्वत के समीप में उपस्थित, कर्णकुण्डलस्थ मणिशिला पर कटाक्षवाणों को शाणित करने वाली, भ्रुधनु-कम्पन से सर्वस्व हरण सूचन-कारिणी यह रमणी कौन है ? जो कि निजविभ्रम के द्वारा सर्व जगद्धैर्य्यसर्वस्वहारी मुझ को भी व्यग्र कर रही है ॥ ७३ ॥

(पुनर्वार निरूपण करके) हाय ! किस प्रकार से यह प्रियतमा मेरी हृदयकपोतपालिका की भूषण स्वरूप पारावती हुई ? (ऐसा

कह कर नान्दीमुखी को अभिनन्दन कर आनन्द के साथ) जो उच्च शब्द-सम्पति के द्वारा बसन्तादिराग का वर्द्धन कर कर्ण प्रदेश के अलङ्कार का बिस्तार कर रही है, जो मधुरास्फुटध्वनि के द्वारा युक्त है वह षड्जादिस्वरों से अधिक परिवादिनी अर्थात वीणा प्राप्त है। अर्थान्तर में-जो मुक्ताहार की शोभा के द्वारा अपने अनुराग का वर्द्धन कर कर्णदेश की शोभा विस्तार कर रही है, जो चौषठकला से अञ्चित (युक्त) है आज हमे वह राधा परिवादकारिणी की भाँति प्राप्त हो रही है ॥७४॥

नान्दी —हे गोकुलानन्द ! तुम्हारे पार्श्वस्थित ये समस्त गोपिकाएँ जिस प्रकार मुझ को न देखें उस प्रकार प्रच्छन्नरूप में ठहरती हूँ। (ऐसा कह कर छिप गई) ॥ ७५ ॥

कृष्ण—हे सखागण ! तुम सब शीघ्रता पूर्वक महाघट्ट के अधिकार सूचक शृङ्गवाद्यादि करो, मैं भी निजविम्बाधर में वंशी अर्पण करता हूँ। (सब वैसा ही करने लगे)

वृन्दा—(स्वगत) क्यों ये समस्त गोपिकाएँ केलिमुरलीध्वनि को श्रवण कर घूर्णित मस्तक होकर वृक्षों को धारण कर रही हैं- वेणु की यह मधुरध्वनि तरु-लताओं को प्रफुल्लित कराने के लिये औषधि विशेष है और मानो कोकिलादि ब्राह्मणबालकों के कुहु रूप वेदपाठ-पारायण के स्थगित करण में सन्ध्याकालीन मेघ-गर्जन है, चन्द्रवदना गोपबालाओं की कामाग्नि-शिखा का उद्दीपन में मन्द मन्द बहने वाला पवन है और श्रीराधा के धैर्य्यरूप पर्वतराज को दमन के लिये वज्र स्वरूप है। इस प्रकार से वेणुध्वनि विलास कर रही है ॥ ७६ ॥

कृष्ण—(श्रीराधा के प्रति कटाक्षपात कर आनन्द के साथ) अहो ! कन्दर्पबान्धव अर्थात यौवन वयस के द्वारा आज श्रीराधा के अङ्ग उल्लास युक्त होने पर मुखकमल कृपा, औदार्य्य एवं

माधुर्य्यादि गुणयुक्त नर्मवाक्य के साथ सख्य विधान करने को इच्छा कर रहा है, दोनों नेत्र क्रम से कुटिल-निरीक्षण के साथ मैत्रीलाभ के लिये वाञ्छा कर रहे हैं, और पदयुगल लीला-युक्त मन्दगति के साथ सङ्गविधानार्थ अभिलाष कर रहे हैं ॥७७॥

राधा—(यत्नता से भावगोपन का अभिनय पूर्वक वाम-स्कन्ध अन्य ओर कर संस्कृत में) ॥ ७८ ॥

भूमण्डलवर्त्तिनी युवतिओंके नयन रूप भृङ्गों के द्वारा नीलोत्पल-दल से अधिक शोभा वाली अपनी अङ्गशोभा का आस्वादन करा कर, मत्त हस्तिशावक के लीलातरङ्ग उलंघन कारी गोवर्द्धन पर्वत स्थित यह अरण्यधूर्त्त मेरे धैर्य्य का ग्रास कर रहा है।

कृष्ण—(पर्वतशृङ्ग से अवतरण पूर्वक राधा को देख कर आनन्द के साथ) श्रीराधा अपने स्थूल पयोधरयुगल में हार को स्थान देकर मानो उस के प्रति अनुग्रह विस्तार कर रही है, उस ने बल करके श्याम कुटिल केश को चूड़ामणि अर्पण किया है, मृगनयनी उस के नेत्र से कर्ण तक कज्जल विन्यस्त हो रहा है मानो दोनों नेत्र ईर्षा प्रकट कर सारल्य परित्याग कर कौटिल्य-भाव का अवलम्बन कर रहे हैं ॥ ७९-८० ॥

ललिता—(अपवार्य्य) राधे ! जिस व्यक्ति को पर्वतशृङ्ग से अवतरण करना देख रही हो वह हठ पूर्वक कुहक प्रदर्शन कर किसी वाणिज्य महास्वार्थ लाभ के लिये आ रहा है। अतः अन-देखें की भाँति विश्वस्तचित्त से यहाँ से चली चलें नहीं तो यह हम सब को उद्वेगान्वित करेगा ॥ ८१ ॥

राधा—सखि ! धीरे धीरे चलो, क्यों कि यह पर्वततट स्फु-टित प्रस्तर समूह से विरचित है ॥ (ऐसा कह कर दृष्टिपात पूर्वक गमन करने लगी) ॥ ८२ ॥

कृष्ण—सखे सुबल ! ये समस्त रमणियाँ क्यों हम सब की

अवज्ञा करती, विलास के साथ नूपुर झनझनाती, मनोहर आलाप करती जाने को प्रवृत्त हो रही हैं। अतः अर्जुन के साथ शीघ्र इन को प्रत्यावर्त्तित करो ॥ ८३ ॥

सुबल—(शीघ्रता से अर्जुन के साथ परिक्रमण कर) अहो ! आश्चर्य्य ! तुम सब क्यों गर्व के साथ घट्टचत्त्वरनाथ का अना-दर कर घृतविक्रयार्थ चली जा रही हो, अतः निवृत्त होकर सुन्दर-ता पूर्वक हम सब को प्रबोधित करो।

सब—(अवहेला पूर्वक अनसुनी की भाँति चलने लगीं)

सुबल—(वेग से दौड़ कर) अहो, आत्ममाहात्म्य का विस्तार मत करो शीघ्र लौट कर आजाओ ॥ ८४ ॥

सब—(निर्वेद की भाँति प्रत्यावर्त्तन कर के) अहे ! क्रूर-भाषिन् ! क्यों तुम हम सब को परावर्त्तित कर रहे हो ? ॥ ८५ ॥

सुबल—अहे ! पहले तुम सब पृथ्वीपर मस्तक रख कर महाघट्टदानीन्द्र को प्रणाम करो ॥ ८६ ॥

विशाखा—(ईषत् हास्य के साथ) अहो ! क्या व्रजराज-नन्दन हमारे वन्दन योग्य नहीं हैं ? अवश्य हो सकते थे। परन्तु भगवती पौर्णमासी ने निषेध किया कि-इस अलौकिक-यज्ञ में हैयङ्गवीन उपहरणादि में तुम सब व्रतधारण करने वाली हो अतः ब्राह्मण के अतिरिक्त अन्य किसी को प्रणाम मत करना ॥

अर्ज्जुन—विशाखे ! यह हमारे वृन्दावन के राजा महा-दानीन्द्र हैं। इन्होंने अब व्रतारम्भ किया है। अतः व्रतधारण-वालाओं के द्वारा व्रतधारणकारी को प्रणाम करने पर कोई दोष नहीं है ॥

ललिता—वह व्रत कैसा है ?

कृष्ण—(ईषत् हास्य के साथ) वस्त्रादि उपार्ज्जन में अक्षम अर्बुद ब्राह्मणों को वस्त्रदान रूप महाव्रत।

पक्षान्तर में-अर्व्बुद संख्यक युवतियों के ओष्ठाधरखण्डन रूप महाव्रत ॥ ८९ ॥

ललिता—घट्टाधिकारिता उचित हो रही है क्यों कि इस प्रकार महापदवी-समारोहण के बिना अपनी व्रतरक्षा दुष्कर होती है ॥

कृष्ण—(कुछ हँस कर सम्मुख में दृष्टिपात करके)

सखे मधुमङ्गल सुनो ॥ ९० ॥

